शोध-प्रभा

(शब्दतत्त्वविमर्शः)

प्रधानसम्पादकः

प्रो० वाचस्पति उपाध्यायः

सम्पादकः

प्रो० रमेशकुमारपाण्डेयः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

अनुसन्धान-प्रकाशन-विभागीया
त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

२५ वर्षे द्वितीयोऽङ्कः (जुलाई-दिसम्बरमासाङ्कः) २००० ई.

(शब्दतत्त्वविशेषाङ्कः)

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदिल्ली-११००१६

प्रकाशकः
कुलपतिः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कटवारियासरायः, नवदिल्ली-११००१६

ISBN : 81-87987-07-3

२५ वर्षे द्वितीयोऽङ्कः, जुलाईमासतो दिसम्बर २००० ई० पर्यन्तम्

वार्षिकं मूल्यम् — १००.०० (शतं रूप्यकाणि)

अस्याङ्कस्य मूल्यम्—

मुद्रकः
अमरप्रिंटिंगप्रैसः
८/२५, विजयनगरम्, दिल्ली-११०००९
दूरभाषः : ७२५२३६२, ७१३५७२५

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनु-सन्धेयविषयाणां प्रकाशनं च विद्यते ।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते ।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादि-पुरस्सरं प्रकाशनमप्यस्यां क्रियते ।

६. प्रकाशित-निबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च सोऽङ्को (एका प्रतिः) लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति ।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते । तदर्थं द्वे प्रतिकृती प्रेषयितव्ये । आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते ।

८. अस्याः वार्षिकं मूल्यमस्ति १००-०० रु० (शतं रूप्यकाणि) एकाङ्कस्य च ३०-०० रु० (त्रिंशत् रूप्यकाणि) । विशेषाङ्कस्य मूल्यं स्वतन्त्रतया निर्धारितं भवति । इदं शुल्कं **कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ, नई दिल्ली-१६,** इति सङ्केतेन (बैंकड्राफ्ट, पोस्टल आर्डर अथवा मनीआर्डर) द्वारा प्रेषणीयम् ।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः ।

सम्पादकः

शोधप्रकाशनपरामर्शदात्री समितिः

१. प्रो० कमलेशदत्तत्रिपाठी (का. हि. वि. वि.)

२. प्रो० रमेशचतुर्वेदी (अध्यक्षः)

३. प्रो० शुकदेवचतुर्वेदी

४. प्रो० वासुदेवघुशेः

५. प्रो० चन्द्रकान्तदवेः

प्रधानसम्पादकः

प्रो० वाचस्पति उपाध्यायः

कुलपतिः

सम्पादकमण्डलम्

१. प्रो० चन्द्रशेखरशुक्लः

२. डॉ० (श्रीमती) अमिता शर्मा

३. डॉ० जयकान्तसिंहशर्मा

सम्पादकः

प्रो० रमेशकुमारपाण्डेयः

शोधसहायकमण्डलम्

१. डॉ० (श्रीमती) अन्विता शर्मा

२. श्रीमान् के.के. षैन्

मुद्रणसहायकः

श्रीज्ञानधरपाठकः

नैवेद्यम्

अनाद्यनेहसो नाभूत्केवलमागमस्वाध्यायमात्रं सन्तोषहेतुः प्रातिभचक्षुषामपितु विधीयते स्मोहापोहो विभिन्नप्रस्थानागमानां यार्थार्थ्यं निर्णेतुं मनीषिभिः। अतो यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर इति मनुवचनमनुसृत्यैव प्रावर्तत भगवत्पादशङ्करवचनं श्रुतिमतस्तर्कोऽनुसन्धीयतामिति। दूराग्रहं दूरमपास्य तर्कमुपयुञ्जते स्म पुरा ऋषय इति गम्यते तदीया काचिदुन्मुक्तविचारशीलता। तत्र भवति स्म विनिगमकं क्वचिदागमः क्वचिदन्तर्दृष्टिः क्वचिदनुभूतिः क्वचिच्च स्वाभिरुचिः, न जातु पूर्वाग्रहः। अत एव कथम्भूतोऽपि तत्त्वदर्शी न शशाक सामाजिकीं मूल्यव्यवस्थामुपेक्ष्याधारभूतामाचारमान्यतां प्रत्याख्यातुमिति पुष्णाति तदीयां कल्याणभावनां गहनाम्। दार्शनिकवर्त्मनां मिथो भेदेऽपि कषायमुक्ते जीवनेऽभूद् विश्वासः पुण्यात्मनाम्, तेषां विचारसन्दोहोऽद्यापि समुज्जीवयति चिन्तनविकासं सातत्येन प्रवर्त्तनाय।

पारे वाचां महिमा अनादिनिधनाया भगवत्या वाचः, न केवलं शब्दात्मकता तस्या अपितु सैव विवर्त्ततेऽर्थरूपेणापि, तत एव च जायते नामरूपात्मकः सर्वोऽपि सर्ग इति 'वागेव विश्वा भुवनानि जज्ञे' 'वागेवार्थं पश्यति वागेवार्थं ब्रवीति, वागेवार्थं निहितं सन्तनोति, वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते इत्याद्यः श्रुतिगणस्तस्या जगत्कारणत्वमेकत्वं सत्यत्वं ब्रह्मत्वं च प्रमाणयति। यत्सायुज्यं मुमुक्षुभिरिष्यते तथापि सा वाग्योगविदोऽतिरिच्य नात्मानं विवृणोति। हस्तगतोऽप्यर्थो नैतदनुग्रहमन्तरेण स्ववैभवमाविष्करोति, किं बहुना

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

तद्गतं लावण्यमयं किमपि तरलं सर्वथापीच्यं पावनममृतोपमं तत्त्वं मार्गयितुं क्षमन्ते कुशला रसज्ञाः कवीश्वराश्च, वागपि प्रतिभावन्तं स्वाध्यायपरमासाद्य स्वावदातं स्वरूपं प्रकटीकरोति तदीयमिदमेव वैलक्षण्यं सुधीधौरेयाः सुधीरं गहनं चिन्तयाञ्चक्रुः परन्तु नेदं विस्मर्त्तव्यं यच्छाब्दिकानां नैयायिकानां मीमांसकानां साहित्यिकानाञ्च चिन्तनान्याकल्प्यापि शिष्यते तन्निहितं बहुवैभवमनालोचितपूर्वम्। परुदत्र विद्यापीठेनानुष्ठिते सप्तपर्णीकार्यक्रमे शब्दतत्त्वमुपजीव्य सञ्जातव्याख्यानान्युत्सङ्गे निधाय प्रकाममुत्स्मयते शोधप्रभेयमिति सस्नेहं नूयन्ते लेखनसाहाय्यमाचरन्तो वाग्विद्याविशारदाः।

इयं हृद्यविन्यासा तलावगाहिपाण्डित्यप्रसूतप्रचुरसन्दर्भगर्भा शोधप्रभा शब्दतत्त्वानुशीलनदिशि कञ्चनापूर्वं क्रमं प्रवर्त्तयन्ती नूतननूतनां कामपि सरणिमनुसरन्ती शास्त्रपरम्परामग्रेसारयति, आदधाति चासौ शब्दसूक्ष्मेक्षिकामयीं तेजस्वितामधीतौ व्युत्पित्सूनामित्यस्या वाग्योगविद्भिः समुन्नीते प्राचीननवीनमतसम्मर्दे आर्ष-विवेच्याकलने प्रसन्नाभिनिवेशमभिनन्दयन्नत्र शोध-प्रकाशनक्रियाकलापे व्यापृतात्मन आचार्यरमेशकुमार-पाण्डेयाय धन्यवादं वितन्वन् सर्वेषां पाठकानां शं परामेव वाचमभ्यर्थयते।

प्रो० वाचस्पति उपाध्यायः

कुलपतिः

विमर्शवेदिका

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम्।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥

सम्पूर्णं वाङ्मयं भगवत्याः वाग्देव्याः प्रत्यक्षं स्वरूपमेव। सूक्ष्मात्सूक्ष्ममपि भाषिकं तत्त्वं वाचो विलक्षणं महत्त्वं बिभ्रद्देव्याः द्योतनत्वं विद्योतयति। वस्तुतः प्रकृतिः मानवेषु वाग्योगस्यार्हत्वं विधाय तत्र च भाषिकं नैपुण्यं प्रदाय स्वानुभूति-प्रकाशनायाद्वितीयां काञ्चित् विलक्षणां शक्तिं विहितवती। निरन्तरमनुसन्धानपरैर्मानवैरपि निरर्थकानामपि स्फुटध्वनीनां संयोजनादिसंस्कारविधिना बहुविधभाषायाः सार्थकं स्वरूपं परिकल्पितम्। एतत् विलक्षमेव पाण्डित्यम्। वस्तुतः भावविशेषबोधनपरं सार्थकशब्दनिर्माणं वाक्चातुर्यविशेषमपेक्षते। अनुमीयते यत् मानवोत्पत्तेः समनन्तरमेव भाषायाः समुत्पत्तिस्तदनन्तरञ्च क्रमशस्तद्विकासः सञ्जातः। मूलतो लोकव्यवहारतः समृद्धिमादधाना परिष्कारपथमनुसरन्ती भाषा मानवीय-बोधमपि संस्करोति नित्यशः। भाषा—बोधयोरयं सम्बन्धोऽविभाज्यः शाश्वतश्च।कविकुलगुरुकालिदासेन

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

इत्यत्र वागर्थयोर्यत्सम्पृक्तत्वं प्रदर्शितं न तत्र केवलं धर्मबुद्धिरेवापितु विलसति किमपि भाषिकं रहस्यमपि।

वाग्योगविदां चिन्तनपरिस्पन्दनमेव न केवलं वाण्याः विलासादधिगम्यतेऽपितु भाषिकतत्त्वपरिशीलनमपि तत्प्रतिफलनमेव। शब्दार्थयोः सम्बन्धमाधृत्य महान् मतिकलहो दृश्यते मतिमत्सु विद्वत्सु प्रस्थानगौरवाश्रयात्। ध्वनिवर्णपदवाक्यानां परस्परं सम्बन्धं विद्योतयितुमुद्यतानां तत्तत्प्रस्थानपरायणानां विदुषां सिद्धान्तपरिशीलनयैव शब्दतत्त्वमीमांसेति विषयो विद्यापीठस्य विगतव्याख्यानमालायाः समुपकल्पितो माननीयैः कुलपतिभिः। तत्तद्व्याख्यानेषु समुपस्थितान् विषयान् अन्याँश्च तद्विषयकशोधनिबन्धान् क्रोडीकृत्य प्रस्तुतोऽयं शोधप्रभा-अङ्कः समुपतिष्ठते वाक्तत्त्वविदः संस्कृतविदुषः।

संस्कृत-हिन्द्याङ्गलभाषासु संस्कृतवाङ्मयमाश्रित्य शोधपूर्णं निबन्धजातं परिप्रकाशयन्ती शोधप्रभा विद्यापीठस्य व्याख्यानपरम्परां प्रवर्तते। अस्माकं विद्यापीठे शारदव्याख्यानमाला-लालवहादुरशास्त्री-व्याख्यानमाला—श्रीपट्टाभिरामशास्त्रिस्मारकव्याख्यानमाला—श्रीकुन्दकुन्दव्याख्यानमालेति चतस्रः व्याख्यान-मालाः नियमेन प्रतिवर्षं समायोज्यन्ते। तत्र विविधेषु विद्याक्षेत्रेषु लब्धकीर्त्तयो विद्वांसो व्याख्यानं कुर्वन्ति, येषां प्रकाशनं शोधप्रभायां विधीयते। अनेनैव क्रमेण विगतवर्षे शब्दतत्त्वमीमांसेति विषयमाधृत्य आचार्यप्रवराणां पं० रामयत्नशुक्लमहोदयानाम्, पं० कैलाशपतित्रिपाठिमहोदयानाम्, पं० पारसनाथद्विवेदिमहोदयानां व्याख्या-नान्यभूवन्। एतेषामाचार्याणां व्याख्यानभावनामेव भूमिकीकृत्य शोधप्रभायाः प्रस्तुताङ्कस्य कल्पना विद्यते।

अस्मिन्नङ्के शब्दतत्त्वसंवदेनपराः विचारनिर्भेदनिपुणाः अष्टादशलेखाः प्रकाश्यन्ते। एवं प्रतिभाविशेषो-द्भासितशोधपूर्णा संस्कृतसौरभं वितन्वतीयं विदुषां सन्तोषाय भविष्यतीति कामयमानोऽहं प्रमादादज्ञानाद्वा सञ्जातस्य दोषजातस्य प्रशमनार्थं निर्देशादिप्रदानैश्च उत्साहश्रियः संवर्धनार्थमभ्यर्थये सुमनसः विदुषः।

प्रो० रमेशकुमारपाण्डेयः

संपादकः

विषयानुक्रमणिका

शब्दतत्त्व-मीमांसा

■ प्रो० वासुदेवघुशेः:

नत्वा गणपतिं वाणीं गुरून् विद्याप्रदांस्तथा।
शब्दतत्त्वस्य मीमांसाविषये किञ्चिदुच्यते।।
व्याख्यानमालासत्रस्य स्वागताख्येऽभिभाषणे।
विषयस्थापनादत्र स्वकर्तव्यं विनिर्वहे।।

१. प्रास्ताविकम्

गुरवे भर्तृहरये शब्दब्रह्मविदे नमः।
सर्वसिद्धान्तसन्दोहसारामृतमयाय च।।[१]

मान्या मुख्यातिथयः, अध्यक्षाः, मुख्यवक्तारः, कुलपतयः,

अन्ये विद्वांसः, छात्राश्च!

शब्दतत्त्वम् अस्ति सर्वशास्त्राणां विचार-विषयः। परं विद्यते तत्र दृष्टिभेदः। **नैयायिकानां** प्रमाणविचारदृष्ट्या चिन्तनम्। **मीमांसकानां** वेदप्रमाण्यस्थापनदृष्ट्या चिन्तनम्। **साहित्यिकानां** काव्यस्वरूपनिर्धारणदृष्ट्या चिन्तनम्। **वैयाकरणानां** च साधुत्वान्वाख्यान- दृष्ट्या चिन्तनम्। सत्स्वपि दृष्टिभेदेषु प्रायशः सर्वैरेव शास्त्रैः शब्दविचारः स्वशास्त्रस्य विचारविषयत्वेन परिगृह्यतं। अयं विचार एव **शब्दतत्त्व-मीमांसा** शब्देनात्राभिमतः।

अतः तामभिलक्ष्य एका **सङ्गोष्ठी** कल्पयितव्या इति आसीत् प्राथमिकः कल्पः। परम् आयोजनवैक्लव्यात्, व्याख्यानमालानां व्याख्यानविषयत्वेनैव सा **शब्दतत्त्व-मीमांसा** विभज्य त्रिषु शास्त्रेषु (व्याकरण-दर्शन-साहित्येषु) परिकल्पनीया इति अभूद् अपरः कल्पः। तदनुसारेणाद्य[२] **व्याकरणशास्त्रे शब्दतत्त्वविमर्शः** इत्यमुं विषयमधिकृत्य प्रवर्तते एषा **शारदीय-ज्ञान-महोत्सव-व्याख्यानमाला।**[३]

---

१. वाक्यपदीयद्वितीयकाण्डस्य पुण्यराजकृतटीकायाः समाप्तिश्लोकः ५९

२. ७.२.२००० दिनाङ्के

३. तस्या उद्घाटनसत्रे कृतं 'स्वागतभाषणम्' अत्र प्रस्तूयते।

परं यथा आसीत् प्रथमः कल्पः, तथा तिसृणामपि व्याख्यानमालानामेकसङ्गोष्ठीरूपत्वेन उद्घाटनं तु सर्वासामपि व्याख्यानमालानामेकतन्त्रेणैव परिकल्प्यते। अतः नेदं केवलं १. **शारदीय-ज्ञान-महोत्सव-व्याख्यानमालाया** उद्घाटनं, किन्तु २. **म० म० आचार्य-पट्टाभिरामशास्त्रिस्मारकव्याख्यानमालायाः**, ३. संस्कृतवर्षमुपलक्ष्य आयोजिताया **विशिष्टव्याख्यानमालायाश्चापि** उद्घाटनम् इत्यपि मन्तव्यम्। तिसृष्वपि विषयस्यैक्यात् युज्यते चैतत्।

२. विषयोपस्थापनम्

तत्र किं तावत् शब्दतत्त्वम्? के च शब्दतत्त्वविदः? कथं च शब्दतत्त्वज्ञानम्? इत्यादयः प्रश्नाः नूनं संभवन्ति। वर्तते चात्र शास्त्रकाराणां ततच्छास्त्रदृष्टौ बद्धादराणां मतभेदः। तत्र तत्त्व शब्दस्य 'स्वरूप' परत्वमास्थाय अयं मतभेदः स्पष्टां भवति। अतः तद्विषयेऽत्र किञ्चित् प्रस्तूयते।

(i) मीमांसकमतम्

पूर्वमीमांसकाः नित्यवर्णरूपत्वं शब्दस्य अङ्गीकुर्वन्ति। अत एव शबरस्वामी **न च प्रत्यक्षो गकारादिभ्योऽन्यो गोशब्दः**[1] इति स्वमतं प्रतिपादयति। स्वपूर्ववर्तिनो मीमांसावृत्तिकारस्येदं मतम् **अथ गौरित्यत्र कः शब्दः? गकारौकारविसर्जनीया इति भगवानुपवर्षः**[2] इति ग्रन्थेन भाष्यकृता शबरस्वामिना प्रस्तूयते।

उत्तरमीमांसाया भाष्यकाराः शङ्करभगवत्पादा अपि मतमिदं समर्थयन्ते–

वर्णा एव तु शब्दा इति भगवानुपवर्षः[3] इति।

मीमांसावार्त्तिककाराः कुमारिलभट्टा अपि **तत्त्वावबोधः शब्दानां नास्ति श्रोत्रेन्द्रियादृते।**[4] इति वदन्तः श्रोत्रेन्द्रियग्राह्यवर्णानामेव शब्दत्वं स्वीकुर्वन्ति। उक्तं च तैरेव

पररस्परानपेक्षाश्च श्रोत्रबुद्ध्या स्वरूपतः।
वर्णा एवावगम्यन्ते न पूर्वापरवस्तुनी।।[5] इति।

तस्मात् प्रत्यक्षपरीक्षया **वर्णा एव शब्दाः** इति मीमांसकानां तदनुयायिनां वेदान्तिनां च सिद्धान्तः।

---

१. शाबरभाष्यम, भाग १, पृ० ४८ (आनन्दाश्रमसंस्करणम्)
२. शाबरभाष्यम्, भाग १, पृ० ४५ (आनन्दाश्रमसंस्करणम्)
३. ब्रह्मसूत्रशाङ्करभाष्यम्, अ० १, पा० ३, सू० २८
४. तन्त्रवार्त्तिकम्, १.३.१८
५. श्लोकवार्त्तिकम्, स्फोटवादे, श्लोकः ९

(ii) नैयायिकमतम्

नैयायिकाः आप्तोक्तः शब्दः प्रमाणम् इति स्वीकुर्वन्ति। तदुक्तं गौतमेन– आप्तोपदेशः शब्दः।[1] इति।

यदि शब्दस्य नित्यत्वं स्यात् तर्हि तस्य आप्तप्रणीतत्वरूपम् आप्तोक्तत्वं न स्यात्। अतः ते अनित्यानां वर्णानामेव शब्दत्वमङ्गीकुर्वन्ति।

उक्तं च जयन्तभट्टेन–

अनित्यानां वर्णानामेव वाचकत्वं प्रतिष्ठापनीयम्[2] इति।

एवं च तद्रीत्या **'वर्णसमूहः पदम्, पदसमूहश्च वाक्यम्।'**[3]

न्यायभाष्यकृता वात्स्यायनेनापि अत एवोक्तम्–

'वाक्यस्थलेषु खलु वर्णेषूच्चरत्सु प्रतिवर्णं तावच्छ्रवणं भवति, श्रुतवर्णमेकमनेकं वा पदभावेन स प्रतिसन्धत्ते, प्रतिसन्धाय पदं व्यवस्यति, पदव्यवसायेन स्मृत्या पदार्थं प्रतिपद्यते, पदसमूहप्रतिसन्धानाच्च वाक्यं व्यवस्यति, सम्बद्धांश्च पदार्थान्गृहीत्वा वाक्यार्थं प्रतिपद्यते।'[4] इति।

एवं चैतन्मतरीत्या **अनित्यवर्णरूप एव शब्द** इति सिद्धान्तः।

(iii) साहित्यिकमतम्

आलङ्कारिका साहित्यिका वा काव्यशरीरविचारप्रसङ्गे तदभिमतं शब्दस्वरूपं कीदृशमिति व्युत्पादयन्ति। प्रथमतः दण्डी काव्यशरीरविषये स्वमतमित्थं प्रस्तौति–

अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्।।
तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलिः।।[5] इति।

परं भामहः मतमिदमनभ्युयन् तन्निषेधपुरःसरं स्वाभिमतं काव्यस्वरूपं वर्णयति–

रूपकादिमलङ्कारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छत्यलङ्कृतिम्।।

---

१. न्यायसूत्रम् १.१.७
२. न्यायमञ्जरी, भाग २, पृ० १४४ (मैसूरसंस्करणम्)
३. न्यायमञ्जरी, भाग २, पृ० १४३ (मैसूरसंस्करणम्)
४. न्यायभाष्यम्, अ०१, आ० २, सूत्रम् ६२
५. काव्यादर्शः १.९-१०

तदेतदाहुः सौशब्द्यं नार्थव्युपत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः।।
शब्दार्थौ साहितौ काव्यम्[१]....................... इति।

मम्मटोऽपि तददोषौ शब्दार्थौ[२]............ इत्यादिकं वदन् भामहमेवानुसरति।

किन्तु पण्डितराजो जगन्नाथः पुनः

रमणीयार्थप्रतिपादकः शब्दः काव्यम्[३] इति लक्षणमङ्गीकुर्वन् काव्यस्वरूपे शब्दस्यैव प्राधान्यम् अभ्युपैति।

परमिमे साहित्यिकाः शब्दस्य स्वरूपविचारे प्रायशः वैयाकरणमतानुयायिनः सन्तः तान् बुध-शब्देन[४] सम्बोधयन्तः स्वीयमाधमर्ण्यमेव प्रकटयन्ति। अतः तैः सह न वैयाकरणानां तादृशो विरोधः, यादृशो मीमांसकैः सह नैयायिकैश्च सह सः इति बोध्यम्।

(iv) वैयाकरणमतम्

अतः वैयाकरणाः 'प्रधानमल्ल' न्यायेन मीमांसकमतं खण्डयन्तः स्वाभिमतं शब्दस्वरूपं शब्दतत्त्व[५] -रूपं स्फोट[६] -रूपं वा स्वग्रन्थेषु व्यवस्थापयन्ति। स चायं वैयाकरणसिद्धान्तः प्रामुख्येन भर्तृहरिणा वाक्यपदीये व्यवस्थापितः। परवर्तिभिश्च वैयाकरणैः तदाधारेणैव स्वग्रन्थेषु विवेचितः प्रस्फोटितश्च।

अद्यतनव्याख्यानमालाया व्याख्यानस्य च प्रधानो विषयः स एव व्याकरणशास्त्रे शब्दतत्त्वविमर्शः इति। मुख्यवक्तृमहोदयैः तस्यैव वक्तव्यत्वेन नाहमत्र तद्विषयं किमपि वक्तुकामः। किन्तु यथाक्रमं स्वागतमात्रमत्र व्याहरामि।

३. स्वागतवचनम्

एतादृशे गाम्भीर्यपूर्णे विषये व्याख्यानद्वयं प्रददातुं समागतानां राष्ट्रपतिसम्मानितानां वाराणसीस्थवैयाकरणपरम्पराया विद्वत्सु मूर्द्धन्यानां पण्डितप्रवराणां श्रीमतां रामयत्नशुक्लमहोदयानां सर्वादौ स्वागतं व्याहरामि।

---

१. काव्यालङ्कारः, १.१४-१६
२. काव्यप्रकाशः, १.४
३. रसगङ्गाधरः, प्रथमानने, पृ. ४
४. काव्यप्रकाशः (बुधैः वैयाकरणैः.......), १.४
५. वाक्यपदीयब्रह्मकाण्डस्य प्रथमश्लोकोऽत्रानुसन्धेयः
६. वैयाकरणभूषणसारस्य प्रथमश्लोकोऽत्रानुसन्धेयः

अद्यतनसभाया आध्यक्ष्यं वोढुं सम्प्राप्तानां विद्वद्वरेण्यानां **पण्डितपारसनाथ द्विवेदि**महाभागानामपि स्वागतं वच्मि।

अस्या व्याख्यानमालासङ्गोष्ठ्या उद्घाटनार्थ सर्वाधिकं कष्टमविगणय्य दूरतः समुपस्थितानां मान्यवराणां पूर्वकुलाधिपतीनां **प्रो० रमारञ्जनमुखर्जी**महोदयानां स्वपक्षतः, विद्यापीठपक्षतः, कुलपतिपक्षतश्च हार्दं स्वागतं समुपकल्पयामि।

अन्ते **योजकस्तत्र दुर्लभः** इति सूक्तिं चारितार्थयतामन्वर्थवाचस्पतीनां कुलपतीनां स्ववचःप्रसूनैः स्वागतविधिमुपकल्प्य, मुख्यातिथीन् उद्घाटनभाषणार्थं सम्प्रार्थयामि।

किमधिकेन

मतभेदेन शास्त्राणां शब्दतत्त्वावधारणे।
प्रवर्ततां विचारोऽत्र विदुषां समुपस्थितौ।।

इति शम्।

सहायक-ग्रन्थ-सूची

१. पूर्वोत्तरमीमांसयोः
(i) शाबरभाष्यम्
(ii) तन्त्रवार्त्तिकम्
(iii) श्लोकवार्त्तिकम्
(iv) व्रह्मसूत्रशाङ्करभाष्यम्

२. न्याये
(i) न्यायसूत्रम्
(ii) न्यायभाष्यम्
(iii) न्यायमञ्जरी

३. साहित्ये
(i) काव्यादर्शः
(ii) काव्यालङ्कारः
(iii) काव्यप्रकाशः
(iv) रसगङ्गाधरः

४. व्याकरणे
(i) वाक्यपदीयम्
(ii) पुण्यराजकृतटीका
(iii) वैयाकरणभूपणसारः

शब्दतत्त्वविमर्शः

■ प्रो० रामयत्नशुक्लः

तत्त्वं ब्रह्मणि याथार्थ्ये, इति कोशात् तत्त्वशब्दो ब्रह्मपरः याथार्थ्यपरो वा। तत्र ब्रह्मपरत्वे शब्द एव तत्त्वं शब्दतत्त्वं, शब्दोब्रह्म, शब्दात्मकं ब्रह्मेति फलितोऽर्थः। याथार्थ्यपरत्वे शब्दस्य याथार्थ्यस्वरूपमिति वाच्योऽर्थः। उभयथापि शब्दतत्त्वं विवेचनीयमेव। इदानीमहं शब्दतत्त्वं विवेचयितुमवरोहक्रमेण प्रवर्त्ते।

जीवमात्रस्य सर्वा अपि प्रवृत्तयः किमपि फलमुद्दिश्यैव जायन्ते तथा चोक्तम्– प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तते, इति।

यद् उद्दिश्य धात्वर्थक्रियायां प्रवृत्तिस्तद् फलम्। इदञ्च लक्षणं साध्यसाधनोभय साधारणम्। वस्तुतस्तु अन्येच्छानधीनेच्छाविषयत्वं फलत्त्वम्। इदं लक्षणं वास्तविकं सुखे एव समन्वितं भवति। साधनेषु या इच्छा सा सुखेच्छाधीनैव।

यत् साधनं सुखानुबन्धि, तत्रैव इच्छाविषयित्वं, तद्भिन्ने इच्छाविषयत्वाभावः। सुखेच्छायाः निरुपाधिकत्वमेव। तत्रापि निरतिशयसुखस्यैव इच्छाविषयत्वं, न हि कोऽपि लोकः सातिशयं सुखं कामयते, मम सुखं न्यूनं सातिशयं वा स्यात् इति। तच्च निरतिशयसुख-मात्मैव, निरुपाधिकप्रेमास्पदत्वाद्, आत्मनि निरुपाधिकप्रेमास्पदत्वदर्शनात् न हि कोऽपि आत्मनोऽभावं वृणोति तथा चोक्तं पञ्चदश्यां–

इयमात्मा परानन्दः परप्रेमास्पदं यतः।
मानभूवं हि भूयासमिति प्रेमात्मानीक्ष्यते।।

तत्प्रेमात्मार्थमन्यत्र, नैवमन्यार्थमात्मनि।
अतस्तत् परमं तेन परमानन्दतात्मनः।। प०त०वि०–८.९

स आत्मा निरतिशयानन्दरूपः, नित्यज्ञानरूपः, नित्यसत्तारूपश्चेति। स्वप्नजागरसुषुप्त्यादिषु विषयाणां व्यभिचारेऽपि ज्ञानस्वरूपाव्यभिचारात्, ज्ञानस्यैकत्वम्, मणीनां परस्परं व्यावृतत्त्वेऽपि सर्वानुगतसूत्रस्य यथैकत्वम्, तद्वत् स्वप्नादीनां परस्परव्यावृतत्त्वेऽपि ज्ञानस्यैकत्वम्, अनेकत्त्वे, अनित्यत्वे च गौरवं, प्रमाणाभावश्च, यतः संविदेका अतो नोदेति नास्तमेति। असाक्षिकयोरुत्पत्तिविनाशयोरसिद्धेः। स्वोत्पत्तिविनाशयोस्तयैव संविदा ग्रहीतुमशक्यत्वात् अनवस्थाभयात् संविदन्तराभावाच्च। तस्माज्ज्ञानं नित्यमेकञ्च। सा च एषा संवित् स्वप्रकाश–

रूपैव प्रयोगश्च–

संवित् स्वयंप्रकाशा, अवेद्यत्वे सति अपरोक्षत्वात् व्यतिरेके घट्वत्, न च विशेषणासिद्धिः संविदः स्वयं संवेद्यत्वे कर्मकर्तृत्वविरोधात् परवेद्यत्वे अनवस्थानात्। अतः संवित् स्वयंप्रकाशैव। सा च संविदात्मैव, नित्यत्वे सति स्वप्रकाशत्वात् यन्नैवं न तदेवं यथा घटः। एवं रीत्या आत्मनः नित्यसंविद्रूपत्वप्रसाधनेन सत्यत्वमपि साधितं भवति। नित्यत्वातिरिक्तसत्यत्वाभावात्। ननु आत्मनः परमप्रेमास्पदत्वे आत्मनि धिङ्मामिति। द्वेषोपलध्यनुपपत्तिः, तत्र द्वेषस्य दुःखसम्बन्धनिमित्तकत्वेनान्यथासिद्धत्वात्, आत्मनो नित्यासंगत्वेऽपि औपाधिकद्वेषादिसंभवाच्च। सर्वोऽपि लोकः निरतिशयं ज्ञानं, निरतिशयसत्वं निरतिशयानन्दमेव च परमप्रेमास्पदतया कामयते अतः निरतिशयेच्छाविषयत्वेन सत्यज्ञानानन्दानामेकरूपत्वमेव। अतएव सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्म इत्यादि श्रुतयः ब्रह्मणो निरूपणं कुर्वन्ति। योऽयम् अहमास्पदतया प्रतीयमान आनन्दरूप आत्मा स एव तत्त्वमस्यादिवाक्येन लक्षणया ब्रह्मतया उच्यते–

इत्थं सच्चित् परानन्दः, आत्मायुक्त्या तथाविधम्।
परं ब्रह्मतयोरैक्यं श्रुत्यन्तेषूपदिश्यते।।

ननु आत्मनः परमानन्दरूपतायाः अभाने तस्य परमप्रेमास्पदता न स्यात्, भाने च संसारदशायां विषये स्पृहा न स्यादिति चेत् तत्रोच्यते–

यतो भानाभानपक्षयोरुभयोरपि दोषाः अस्ति अतः
आत्मनोऽसौ परमानन्दता, भानेऽपि न प्रतीता भवति।

तत्र दृष्टान्तमाह–

अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत्।
भानेप्यभानं भानस्य प्रतिबन्धेन युज्यते।।

छात्रसमुदायमध्यस्थपुत्रध्वनिः पितुर्भासमानोऽपि सामान्यतः, विशेषतो ममपुत्रस्यायमेव ध्वनिरिति न भासते, तथैव आत्मनः परमानन्दतायाः सामान्यतः भानेऽपि विशेषतोऽभानं भवति। यद्वा भानस्य प्रतिबन्धेन अभानं भवति। पुत्रध्वनेः विशेषतोऽभाने बहुभिः सहपठनं प्रतिबन्धः। परमानन्दतायाः विशेषतः भाने अनादिरविद्यैव प्रतिबन्धः। सोऽयं व्यामोह अविद्यापरपर्यायः आत्मनः परमानन्दरूपतायाः भानविरोधीति सर्वोलोकः आत्मनः सामान्यतः प्रतीतां परमानन्दरूपतां आत्मनि अबुद्ध्वा संसारविषयेषु एव अन्विष्यन् आजीवनं तत्र प्रयतमानोऽपि अप्राप्यताम् नितरां परां शान्तिमाप्नोति यावत् व्यामोहनिवृत्तिर्न स्यात्। अविद्यावृतिविनाशस्तु तत्त्वज्ञानादेव भवति।

अविद्यावृत्तितादात्म्ये विद्ययैव विनश्यत इति तमेव विदित्वाति मृत्युमत्येति नान्यः पन्थाः विद्यतेयनाय इत्यादिश्रुतिस्मृतित्यादीनि प्रमाणानि। न्यायदर्शनकारोऽपि तत्त्वज्ञानान्निश्रेय–

साधिगम इत्याह। तत्त्वज्ञानञ्च अद्वैतिमते 'ब्रह्मात्मज्ञानमेव अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकम् संसारकारणाज्ञानतमसश्चण्डभास्करः।'

वैयाकरणास्तु तत्त्वज्ञानं, शब्दब्रह्मणोज्ञानं मन्यन्ते। एतन्मते शब्दस्य ब्रह्मतया स्वीकारोऽस्ति। वाग्वैब्रह्मेत्यादिश्रुतयः तत्र प्रमाणानि। भर्तृहरिरपि अमुमेवार्थमाह–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। इति।

यद् ब्रह्म जगद् जन्मादिकारणं यतो वा इमानि भूतानि जायन्ते इत्यादि श्रुतिभिः उपदिष्टम्, तस्य अवस्थाद्वयम् विद्यया अविभागावस्था, एकमेवाद्वितीयमित्यादि श्रुतिप्रतिपाद्या अविद्यादशायां प्रविभागावस्था च। तस्माद् वा एतस्मात् वा आत्मनः, आकाशः सम्भूतः इत्यादिश्रुत्या बोधिता। तत्र प्रविभागदशायां विविधतया तद् ब्रह्म प्रतीयते, आकाशादिप्रपञ्चस्य नामरूपव्याकृतस्य तत्र प्रतीतेः। तत्र ब्रह्मणि कार्यानुरूपाः विविधाः शक्तयोऽपि कल्पिताः अनिर्वचनीयाः।

ताभिरेव प्रविभागः कल्पितः। अविद्याशक्तिमच्च सर्वकार्यानुकूलशक्तिभिः समाश्रितं विविधकल्पनागोचरं भवति। विद्यादशायामविभागरूपम्। जगद्रूपेणाविवर्तावस्थायां सर्वविकल्पातीतं रूपं तदेवानादिनिधनमेव इह कारिकायां विवक्षितम्। अथवा जगद्रूपेण विवर्तावस्थायामपि ब्रह्म अनादिनिधनमेव। इदं रजतमित्यत्र शुक्तेः रजतत्त्वेन प्रतीतावपि न हि शुक्तौ वस्तुतो रजतगुणयोगो यद्वत्, तद्वत्। यद् ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि श्रुतिषु विनिर्दिष्टम् तच्च ब्रह्म शब्दतत्त्वं शब्दात्मकम् इत्यर्थः। अनेन अत्र मते शब्दतत्त्वमेव ब्रह्म। यदनादिनिधनं नित्यं ब्रह्म तद् शब्दतत्त्वमेवेति फलितम्। श्रुतिसिद्धस्य ब्रह्मणः शब्दतया ज्ञापने तात्पर्यम्।

ननु प्रागुक्तं ब्रह्म सर्वविकल्परहितम् इति, उक्तं कथमिदानीम् तद् विपरीतमुच्यते शब्दतत्त्वमिति चेन्न शब्दस्य ब्रह्मरूपतया विकाराणाञ्च शब्दोपादानकतया शब्दतत्त्वोपपत्तेः। तथा हि– घटकुण्डलादयो विकाराः मृत्सुवर्णादिप्रकृत्यन्विता हि अनुभूयन्ते, तथैवैते रूपादयो विषयाः शब्दानुगताः एव दृश्यन्ते। तदुक्तम्–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।। इति।

अत एषां शब्द एव प्रकृतिः।

यद्यपि रूपादीनां भिन्नेन्द्रियग्राह्यत्वेन शब्दरूपत्वानुपपत्तिः, एकेन्द्रियग्राह्यत्वरूपस्य सादृश्यस्य अभावात्, तथापि भिन्नेन्द्रियग्राह्यत्वस्य आविद्यकत्वेन वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवेत्यदिश्रुत्या प्रकृतेरेव सत्यत्वलाभान्न दोषः। किञ्च यद्यर्थः शब्दात्मको न भवेत् तदा शाब्दे ज्ञाने न प्रतीयेत। किन्तु शब्देन शब्द एव प्रतीयेत, अन्येन अन्यस्य प्रतीत्यनुपपत्तेः। प्रतीयते च शब्देनार्थः इति शब्दप्रकृतिकतया शब्दात्मकोऽर्थः। किञ्च सर्वेऽपि

स्थितिप्रवृत्तिनिवृत्तिरूपाः व्यवहाराः शब्देनैव क्रियन्ते, इत्यतोऽपि तेषां व्यवहाराणां तद्विषयाणाञ्च मूलभूतं शब्दात्मकं ब्रह्मैवेति, अतोऽपि अत्र शब्दतत्त्वमित्युक्तिर्ब्रह्मणि प्रयुज्यते। अतः शब्दतत्त्वस्यैव रूपाद्यात्मना विवर्तः स्वीकार्य इति शब्दतत्त्वं ब्रह्मेत्युक्तम्। सोऽयं शब्दब्रह्मवादः ब्रह्माद्वैतवादम् अनुसरतीति प्रतीयते। तस्य शब्दब्रह्मणः श्रुतिसिद्धसर्वकारणत्वोपपादनाया अक्षरमिति। अनादिनिधनेत्यनेन नित्यत्वलाभात् अक्षरपदं अक्षरोपपादानपरं कार्यकारणयोरभेदोपचारात्। प्रत्यक्चैतन्यज्ञानरूपेऽन्तरविधया सन्निवेशिताः पदवाक्यरूपाः वर्णाः परप्रत्यायनार्थं प्रयत्नेन विवक्षुसमवेतेन अभिव्यज्यन्ते, इत्येवं शब्दब्रह्मोपादानिका वर्णव्यक्तिः घटव्यक्तिरिव मृदुपादानिका। तथा चोक्तम्–

सूक्ष्मामर्थेनाविभक्तत्वामेकाम् वाचमभिष्यन्दमानाम्।
उतान्येविदुरन्यामिव चैनां नानारूपामात्मनि सन्निविष्टाम्।।

पूर्वार्द्धेन अविभक्तसूक्ष्मा वाणी उक्ता, उत्तरार्द्धेन भेदवत्त्वेन सा प्रतिपादिता। वस्तुतोऽभिन्नैव इति बोध्यम्। अस्यां कारिकायां पूर्वार्धेन ब्रह्मणः तटस्थलक्षणम् उक्तं, तादृशार्थस्य शब्दब्रह्मणि सर्वदा सत्वात्। तच्च शब्दब्रह्म अखण्डज्ञानरूपं अखण्डसद्रूपं अखण्डानन्दरूपञ्च, उक्तयुक्तंः, वृद्धिरादैच् इति सूत्रमारभ्य अ अ सूत्रे समापनमकारि भगवता पाणिनिना। तत्रोपक्रमोपसंहाराभ्यामिदं विज्ञायते, यथा अकारो वासुदेवो मायामाश्रित्य द्वित्रिमात्रिकेण आकाराद्यात्मना वर्धते। अन्ते च सृष्टिं विलाप्य परमात्मा अ अ इत्येव भवतीति अष्टाध्यायीसूत्रोपक्रमोपसंहाराभ्यां प्रतीयते। अनेनापि पूर्वार्थ एव। मायापारतन्त्रेणैव भेदः न तु स्वाभाविको भेदः। अत एव उक्तम्–

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्त्तते।।

यद् शब्दतत्त्वं ब्रह्म एकमेवाम्नातं एकमेवाद्वितीयमित्यादिश्रुत्या पौनःपुन्येनाम्नातम्। तथा हि लोके घटरूचकादयो विकाराः ये च मृत्सुवर्णादयोऽविकारिणः, तत्र विकारिणामेकत्वे विकाराणां परस्परं नानात्वेऽपि तत्सर्वं सर्वप्रकृतेर्ब्रह्मण एकत्वात् तथैवैकम् इत्याम्नातम्। तच्चैकत्वं भेदव्यवच्छेदमात्रं, नत्वेकत्वसंख्यायोगरूपम्, तथा च श्रुतयः–

सलिल एवैको द्रष्टा अद्वैत एवाभवत् इति।
सदेव सोमेदमग्रआसीदेकमेवाद्वितीयम् इत्यादि।।

अभिन्नस्य शब्दब्रह्मणा कथं नानात्वमित्यत आह–भिन्नं शक्तिव्यपाश्रयादिति। शक्तिभेदाश्रयणात् भिन्नमित्यर्थः। वस्तुतोऽभिन्नमेवेति भावः। अत एव पृथक्त्वेनेव, इत्यत्र इव पदं दत्तम्। स्वरादिनिपातमव्ययमितिसूत्रे अव्ययपदेनेदमेव विशुद्धं निर्धर्मकं ब्रह्म संकेतितमस्ति।

अत एवाथर्वणश्रुतिः, तद् व्याख्यानप्रसंगे प्रोक्ता भगवता भाष्यकृता–

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति।।

स्त्रीपुंनपुंसकानि सत्वगुणाः एकत्वादीनि च केचिद् वियन्ति, केचिद् न वियन्ति यन्न व्येति तदव्ययम्। अत्र प्रदीपकाराः–

यन्न व्येति, इति नानात्वं न गच्छतीति, अनेन स्पष्टं प्रतीयते यल्लिंगसंख्यादि-सकलधर्मसहितं यद्वस्तु तदेवाव्ययं तच्च निर्धर्मकं ब्रह्मैवास्ति ब्रह्म च सच्चिदानन्दरूपतया शब्दरूपतया च वेदेषु विनिर्दिष्टम्।

तदेव शब्दतत्त्वं ब्रह्म मायासम्बन्धेन परमात्मपरमेशवरपदेन कीर्त्यमानां सृष्टिं विदध ाति, चित्ताद्यन्तःकरणेन सम्बद्धं सद् जीवात्मपदेनोच्यमानं नानाविधभोगान् अपवर्गञ्च अनुभवति। एतच्च भगवता सूत्रकृता अपि संसूचितमस्तिइन्द्रियमिन्द्रलिंगमिन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रदत्तमितिवेतिसूत्रं विरचयता। तथा हि– इन्द्र आत्मा, तस्य लिंगम्, करणेन कर्तुरनुमानात् इति, उक्तम् श्रीदीक्षितेन। अयं भावः–

अत्र सूत्रे इन्द्रपदमात्मपदं तस्य लिंगमिति विग्रहे इन्द्रशब्दात् घप्रत्यये, तस्य इयादेशे इन्द्रियशब्दनिष्पत्तिः। तत्र इन्द्रस्य लिंगं ज्ञापकं अनुमापकं इन्द्रियम्, कथं भवति, इति जिज्ञासायाम् उक्तं करणेन कर्तुरनुमानात् इति। करणम् हि सकर्तृकं यथाच्छेदनादिक्रियायां कुठारः करणमस्ति तत्र कर्त्ता हि कश्चन लौहकारादिर्भवत्येव। एवमेवेन्द्रियाणां चक्षुरादीनां दर्शनादि क्रियायामात्मकर्तृकत्वमस्त्येव।

किन्तु अत्रेयमाशङ्का समुदेति, यत् शरीररूपे पक्षे सात्मकत्वसाधने इन्द्रियाणां लिंगत्वम् नैव भवितुमर्हति, अतीन्द्रियत्वात् तेषाम्, लिंगज्ञानाभावे अनुमितेरसंभवः। अत्रोच्यते निमीलनो-न्मीलनादिक्रियया शरीररूपे पक्षे पूर्वमिन्द्रियानुमितिः, चेष्टादीनां च कर्मेन्द्रियानुमितिः कार्या।

अनुमानञ्च – इदं शरीरं सात्मकं चक्षुरादीन्द्रियवत्त्वात् ततश्च इदं शरीरं चक्षुरादीन्द्रियवत् निमीलनोन्मीलनादिक्रियावत्त्वात्।

अत्रायं विशेषः–

पूर्वानुमानेन यस्य कर्त्तुरात्मनोनुमानं स जीवात्मैव, तस्यैव सोपाधिकस्य इन्द्रियवत्त्व-सम्भवात्। परमात्मा तु इन्द्रियादिरहित एव। किन्तु इन्द्रेण सृष्टम्, इन्द्रेण दत्तम् इति विग्रहद्वये तु इन्द्रः परमात्मैव, जीवात्मनः इन्द्रियसृष्टत्ववदातृत्वयोरभावात् पुनः इन्द्रेण जुष्टम्, इन्द्रेण दुर्जयम् इति विग्रहे जीवात्मैव बुद्ध्यते, तेनैव इन्द्रियस्य सेवनात् दुर्जयाच्च। तथा चात्र सूत्रे इन्द्रपदेन विग्रहभेदेन जीवपरमात्मनोरुभयोरपि संकेतो बोध्यः। तेन सूत्रकारस्य उभयोरप्यनयोरभेद एव इष्टः स चाभेदः तत्त्वमस्यादि वेदान्तवाक्येषु संलक्षितः। यथा चात्र सूत्रे मायारूपोपाधिना आत्मनः परमात्मपदवाच्यतां चित्ताद्यन्तःकरणरूपोपाधिना जीवपदवाच्यता संकेतिता मन्तव्या। शुद्धस्य स्रष्टृत्वादेः सेवनादेरसंभवात्।

चित्तवति नित्यमिति सूत्रे जीवे नित्यमित्यनुक्त्वा चित्तवति इति निर्देशोऽपि चित्ताद्यन्तः-करणस्य उपाधित्वं सूचितम्।

व्रीह्यादिभ्यश्चेति सूत्रीयव्रीह्यादिगणे मायाशब्दपाठेन मायाशब्दात् मत्वर्थे इनिप्रत्यये मायिन् शब्दो व्युत्पाद्यते। मायि ईश्वरः तत्र मायाया उपाधिता सुस्पष्टा। तथा चोक्तम्–

मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्। एवञ्च जीवात्मपरमात्मनोरुपाधिद्वयस्य प्रहाणे अभेदः स्फुटो भवति। इमौ जीवात्मानौ एकस्यैव ब्रह्मात्मनः सोपाधिकस्वरूपभूतौ मन्तव्यौ अद्वैतसिद्धान्तानुसारेण। अ अ इत्यनेन मोक्षस्य सूचनाच्च, अस्मदो द्वयोश्चेति भाष्यमपि अत्र मानतयादातुं शक्यम्, यत् शरीरस्य इन्द्रियाणाञ्चोपाधितत्वं स्वीकृतमस्ति। चक्षुरिन्द्रियोपाधितया उच्यते अहं पश्यामि, घ्राणोपाधित्वे अहं जिघ्रामि, त्वगिन्द्रियोपाधिकत्वे अहं स्पृशामि, इत्यादि व्यवहारः। वयं पश्यामः इति व्यवहारस्तु इन्द्रियादिगतबहुत्वस्य आत्मन्यारोपाद् बोध्यः, चित्ताद्यन्तःकरणावच्छिन्नस्यात्मनः कर्तृत्वविवक्षायां चक्षुरादेः करणत्वविवक्षया च अहं चक्षुषा पश्यामि, इत्यादिव्यवहारो बोध्यः। एवमेवात्मनो भेदकल्पनया आत्मानमात्मना जानातीति व्यवहारः तत्रान्तःकरणावच्छिन्नः आत्मा कर्ता, मनोवच्छिन्न आत्मा करणं, शरीरावच्छिन्न आत्मा कर्म इति बोध्यम्, अतएवोक्तं भूषणसारे–

आत्मानमात्मना विभ्रदस्ति इति व्यपदिश्यते।

तत्र आत्मपदेन क्वचिद् शरीरोपाधिकस्य क्वचिद् मनोवच्छिन्नस्य, क्वचिद् इन्द्रियोपाधिकस्य च ग्रहणम् इति यथायथं बोध्यम्।

एतावता प्रबन्धेनेदं सिद्धं भवति यत् जीवात्मा चित्ताद्युपाधिविशिष्टः, परमात्मामायोपाधि-विशिष्टः पाणिनिदर्शने स्वीक्रियते। तद्द्वयमपि निरूपाधिकस्य शब्दब्रह्मणः सोपाधिकस्वरूपमेव। अत एवाह–

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।।

तदेतत्,

चत्वारिश्रृंगा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्ता सो अस्य, त्रिधा बद्धो वृषभो रोरवीति, महोदेवो मर्त्यां आविवेश, अत्र मन्त्रे शब्दब्रह्मणो वृषभरूपेण प्रतिपादनम् शब्दोऽपि कामानां वर्षणाद् वृषभः। चत्वारि श्रृंगा पदजातानि नामाख्यातोपसर्गनिपाताश्च। येन परापश्यन्तीमध्यमावैखर्यश्चेति वा भूतभविष्यद्वर्तमानकालाः पादाः ध्वनिस्फोटौ तस्य द्वे शीर्षे, सप्तविभक्त्युपलक्षिताः शब्दा सप्तहस्ताः, त्रिधेति उपलक्षणम् सर्वस्थानग्रहणार्थम्–तेष्वेव तस्याभिव्यक्तेः लौकिकवृषभादस्य वैलक्षण्यं विलक्षणशक्तिमत्त्वात् अयं शब्दरूपो वृषभो रोरवीति, उपदिशति, इत्यर्थः। उपदेश्यमाह– महोदेव इति आत्मना सार्वरूप्यमाहः महान् देवः शब्दः शब्दब्रह्मरूपः मर्त्यान् आविवेश तथा चात्र मन्त्रे शब्दपरमात्मन एव जीवरूपेण स्थितिः

सूचिता भवति, इति गम्यते। तथा च यथा घटाकाशे महाकाशस्य अनुगतत्वेन घटाकाशं महाकाशान् न भिद्यते, तथैव जीवस्यापि शब्दब्रह्माभेद एव, अयमाशयः महतो देवस्य शब्दब्रह्मणो व्याकरणप्रतिपाद्यतया व्याकरणज्ञः तदाविष्ट इव भवतीति तात्पर्यम्। सोऽयं शब्दात्मा वृषभः यथामेघ उदकदानेन कृष्यादिवीर्योपस्थापनेन सर्वप्रियो भवति, तथा चतुश्शृंगत्वादिगुणवैशिष्ट्येन ज्ञानपूर्वकं प्रयोगेण कामानां दानात् प्रियो भवतीति यथा चोक्तम्–

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।। तस्य च शब्दब्रह्मणः यो वाग्योगविद् वैयाकरणो भवति, स शास्त्रजशब्दज्ञानपूर्वकप्रयोगेण क्षीणपापः विच्छिद्याहंकारग्रन्थीन् अत्यन्तं संसृज्यते। तदयमर्थः निम्नमन्त्रेणापि प्रतिपाद्यते–

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि, जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि।।

मन्त्रतात्पर्यम्–

ये शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचक-साधुभ्यः पृथक्कृतवन्तः ते तद्ज्ञानपूर्वकैः साधुशब्दप्रयोगैः लब्धान्तःकरणशुद्ध्या, अत्र य एष दुर्गो मार्गो शब्दब्रह्मरूपस्तत्रात्मना सह समानख्यातयः त्यक्तभेदभावनाः सायुज्यं प्राप्नुवति।

सूत्रकृतसम्मताद्वैतवादस्य महाभाष्येऽपि समर्थनम्–

महामुनिना पतञ्जलिना सूत्रकृतसम्मतमद्वैतत्वं समर्थितम् तथाहि– अथ शब्दानु-शासनमिति प्रथमवाक्येनैव जीवात्मपरमात्मनोः संकेतः कृतोऽस्ति। शब्दानुशासनस्य शब्दसाधुत्वज्ञानं फलम्, तदाश्रयत्वात् जीवात्मनः संकेतः। साधुत्वज्ञानजन्यपुण्यदातृत्वेन परमात्मनः संकेतो मन्तव्यः। एतयोर्द्वयोरभावशब्दानुशासनम् जलताडनादिवत् निष्फलमेव स्यात्, शब्दज्ञानपूर्वक-साधुशब्दप्रयोगेण धर्मोत्पत्तिरिति निर्णयो दत्तो भगवता पतञ्जलिना– शास्त्रज्ञानप्रयोगे अभ्युदयः तत्तुल्यं वेदशब्देन इति वदता। अत्रापि स्पष्टं प्रतीयते यदीदृशं प्रयोगकर्ता जीवात्मैव, तदीयाभ्युदयव्यवस्थाता परमात्मैव भवितुमर्हति। तेन प्रोक्तमिति सूत्रं व्याख्यातवता भगवता पतञ्जलिना वेदार्थस्य नित्यत्वयुक्तम्। तत्र उद्योतकारेण उच्चते अत्रार्थशब्देन ईश्वरः उच्यते, मुख्यतया तस्यैव सर्ववेदतात्पर्यविषयत्वात्, वेदैश्च सर्वैरहमेव वेद्या इति गीतोक्तेः। अनेन विवरणेन परमेश्वरसत्ता निश्चीयते, वेदादेशपरिपालकत्वेन जीवसत्तापि सुनिश्चिता।

आचार्यःश्रीभर्तृहरिरपि जीवात्मनोः सत्तां ब्रह्माभेदने प्रत्यपादयत्। तथाहि– तस्य शब्दार्थसम्बन्धरूपमेकस्य दृश्यते, तद्दृश्यं दर्शनं द्रष्टा दर्शने च प्रयोजनम्। अत्र दृश्यपदेन विषयाः द्रष्टृपदेन जीवा दर्शनपदेन साध्यस्वभावक्रियाश्च विवक्षिताः सन्ति। कारिकामिमां व्याचक्षाणो हेलाराजो वदति–द्रष्टा जीवात्मा। ब्रह्मकाण्डे जीवस्य स्वरूपं स्पष्टमुक्तं श्रीहरिणा–

प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान्।
सर्वेश्वरः सर्वमयः भोक्ता जीवः प्रवर्त्तते।।

अयमाशयः,

सर्वेश्वरः सर्वस्य स्वनिर्मितप्रातिभासिकस्वाप्नप्रपंचस्य ईश्वरः, न तु व्यावहारिकस्य जगत्प्रपंचस्य तस्य ईश्वररचितत्वात् सर्वमयः सर्वस्वाप्नप्रपञ्चरूपः तदुपादानकत्वात् भोक्ता जीवः आत्मना स्वयमेव आत्मानं शब्दतदर्थाकारेण प्रविभज्य पृथग्विधान् भावान् पदार्थान् सृष्ट्वा स्वप्ने प्रवर्त्तते। तदेतावता प्रघट्टकेण यल्लिखितं, तस्यायमाशयः– शब्दतत्त्वविषयकोऽयं लेखः तत्र शब्दस्य वास्तविकं स्वरूपं जिज्ञास्यं स शब्दः किंस्वरूप इत्यर्थः स च शब्दः परमार्थतो ब्रह्मरूप एव वाग्वै ब्रह्मेति श्रुत्या तथैव बोधनात्। तच्च ब्रह्मरूपं किमिति जिज्ञासया तत्स्वरूपं उपक्रमे प्रदर्शितम्। तथाहि– तद् ब्रह्म एकमेवाद्वितीयमिति आनन्दो ब्रह्मेति सत्यं ज्ञानमनन्तं ब्रह्म इत्यादिश्रुतिभिः सजातीयविजातीयस्वगतभेदशून्यं निरतिशयसच्चिदानन्दरूपमेव, एतच्च प्रतिपादितमधस्तात्। तदेव ब्रह्मशब्दतत्त्वात्मकमेवेति वैयाकरणमतम्। एतच्च पूर्वम् अनादिनिधनं ब्रह्म इत्यादिकारिकोपन्यासेन प्रतिपादितम्। तदेव शब्दब्रह्म जीवात्मपरमात्म-रूपमपीत्यपि न्यरूपि। तद्दर्शनोपायापायोऽपि संक्षिप्य निरूपितः। तत्रैवेदमपि संयोज्यम्:–

तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते।।

शब्दस्य ब्रह्मरूपत्वे कारिकामाह–

इत्थं निष्क्रिष्यमाणं यत् शब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुः तस्मै पूर्णात्मने नम इति।

तच्च शब्दब्रह्म यद्यपि पौर्वापर्यरहितं तथापि तत्र विरुद्धनामरूपकल्पनापि, तदुक्तं वाक्यपदीये–

अजन्मनि तथानित्ये पौर्वापर्यविवर्जिते।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते।।

एतदेव साधयन् आह वाक्यपदीये प्रथमकारिकायाम् उत्तरार्द्धेन–

विवर्त्तते अर्थभावेन प्रक्रिया जगतो यतः।

यच्च शब्दब्रह्म अर्थभावेन विवर्त्तते। स्वरूपादप्रच्युतं सदर्थरूपतया प्रतीयते इत्यर्थः। अतात्विकोऽन्यथाभावो विवर्तः। इदं रजतमित्यन्यथाजातम्। वस्तुतस्तु एकस्य तत्त्वात् स्वरूपात् अप्रच्युतस्य अधिष्ठानस्य आरोप्ये स्वभेदप्रतिभास-पुरस्सरं यो असत्यस्याधिष्ठानप्रविभागेण प्रतीयमानस्यारोप्यस्य धर्मोपग्रहः स विवर्तः। तथाहि–स्वप्नावस्थायामेक एव विज्ञानात्मा भिन्नजातीयानेकपदार्थावभासो जायते, न च विज्ञानस्य तदा स्वरूपहानं जायते तथा सति अनुभवाभावेन उत्थितस्य स्मरणानुपपत्तेः, तथा शब्दतत्त्वं ब्रह्मापि स्वरूपाप्रच्युतं सद् विद्यारूपया शक्त्या अर्थाकारेण प्रतिभासते इति भावः। यतश्च शब्दब्रह्मण जगतः सकलागमरूपस्य प्रथमं

समुत्पत्तिः अत्र कारिकायां जगत्पदं सकलागमे लाक्षणिकम्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै, इतिब्रह्मण उत्पत्तेः पूर्वमेव वेदानामुत्पत्तिश्रवणात्।

यस्य ब्रह्मणोभेदवंतीम् कालशक्तिमाश्रित्य जायमानाः जन्मादिषड्भावविकाराः, भावानां भेदस्य योनयः कारणानि भवन्ति।

अयमाशयः– यद्यपि सर्वे विकाराः कार्याणि स्वस्वकारणाधीनोत्पत्तयः, तथापि तेषा-मुत्पत्तौ कालशक्तिः सहकारिकारणम्।

कालशक्तिरेषा हि सकलकारणानुगता। तस्याश्च कालशक्तेः अवान्तरशक्तिद्वयम्, प्रतिबन्धशक्तिः, अभ्यनुज्ञाशक्तिश्च। सा चैषा क्रमवती कालशक्तिः काञ्चित् कारणशक्तिं प्रतिबध्नाति, काञ्चित् शक्तिं चाभ्यनुजानाति। ततश्च प्रतिभावं क्रमेण नानारूपत्वमनुभूयते। यथैकस्मिन् वृक्षे किशलयादिवैलक्षण्यं एकस्मिन् वा किशलयरक्तत्वमार्दवादिविशेषाः। यथा च एकस्मिन् वृक्षे प्रथमं किशलयस्याभ्यनुज्ञा, पल्लवस्य प्रतिबन्धः। ततः किशलयस्य प्रतिबन्धः, पल्लवस्याभ्यनुज्ञा, अत एव पदार्थानां नानात्वं। तथा चोक्तं वाक्यपदीये–

उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वतां।
निमित्तं कालमेवाहुः विभक्ते नात्मनास्थितम्।।

तमस्यलोकयन्तस्य सूत्रधारं प्रचक्षते।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते।।

तस्यात्मा बहुधा भिन्नो भेदैर्धर्मान्तराश्रितैः।
न हि भिन्नमभिन्नं वा वस्तु किंचन विद्यते इति।।

तच्च शब्दब्रह्म एव स्वाश्रितशक्तिसमाश्रयेण नानारूपतां भजते।

शब्दप्रामाण्यविमर्शः

■ प्रो० रामयत्नशुक्लः

भगवान् परमप्रामाणिको भाष्यकारः पतञ्जलिः, शब्दप्रमाणका वयं, यच्छब्द आह, तदस्माकं प्रमाणमिति वदन् शब्दस्य प्रशस्तं प्रामाण्यमाह-शब्दातिरिक्तानां प्रामाण्यं नानेन परास्तं भवतीति ध्येयम्। भगवद्भाष्यकारोक्तिस्तु उपजीव्यत्वाद् व्यापकत्वाच्च सङ्गमनीया। तत्रास्तिकदर्शनेषु[१] वैशेषिकदर्शनमेवैकं शब्दस्य स्वतन्त्रं प्रामाण्यं नाभ्युपगच्छति। अपित्वनुमानविधया स्वीकरोति। तथा हि दण्डेन गामानयेत्यादिलौकिकपदानि यजेतेत्यादिवैदिकपदानि वा तात्पर्यविषय-स्मारितपदार्थसंसर्गप्रमापूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बत्वात्गामानयेत्यादिपदकदम्बवत् इत्यनुमानेनैव पदार्थसंसर्गबोधमभ्युपगच्छन्ति। नास्तिकदर्शनेषु[२] चार्वाकबौद्धाभ्यामेवास्य प्रामाण्यं नाभ्युपेयते जैनाचार्यैस्तु[३] परोक्षप्रमाणानामन्तर्गततया स्वतन्त्रं प्रामाण्यं स्वीकृतम्, मीमांसाशास्त्रे शब्दस्य प्रामाण्यसमर्थने शब्दश्रवणानन्तरमर्थप्रतिपत्तिरेव लिङ्गत्वेनोक्ता।

ननु वक्तुरभिप्रायानुमित्यैव सा उपपद्यते, इति चेत्, अर्थाभिप्रायशून्यस्यापि स्वापाद्यवस्थायां परप्रयुक्तैः शब्दैरपि बोधदर्शनात्। अर्थानभिज्ञैरुच्चारितेनापौरुषेयवेदेन व्युत्पन्नानाञ्च बोधदर्शनाच्चेति शब्दः प्रत्यायकः। न्यायशास्त्रे[४] तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति सूत्रमुच्चारयन् सूत्रकारः शब्दस्य स्वतन्त्रं प्रामाण्यमभ्युपगच्छति। मुक्तावल्यां, न हि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्ति। किञ्च सर्वत्र यदि शब्दस्थले व्याप्तिज्ञानं कल्प्यते तर्हि सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न कल्प्यतामिति वदता श्रीविश्वनाथभट्टाचार्येण शब्दस्य प्रामाण्यं स्वीकृतमेव[५]। व्याकरणदर्शने तु शब्दस्य प्राधान्येन प्रमाणता स्वीकृता, तथा चोक्तं हरिणा -

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये।
आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनमिति[६]॥

---

१. न्या०सि०मु०का० १४०-१४१, पृ.सं. ४६०-६१,
२. स०द०सं० चार्वा०द०
३. प्र०मी० १/१/२, शास्त्रदी०, १/१, शाब्दप्रामाण्यनिरूपणे
४. न्या०द० १/१/३
५. न्या०सि०मु०कि०युता०का० १४१ पृ० ४६४,
६. वा०प०ब्र०का०का० ४०,

भगवता पाणिनिना, अर्थवदितिसूत्रेण[१] अर्थवत् एव प्रातिपदिकसंज्ञाविधानेनात्र स्वसम्मतिः प्रदर्शिता, तत्रार्थवत्वमर्थविषयबोधजनकत्वम्। तत्र बोधः, शाब्दबोधात्मक एव। तादृशबोधजनकता शब्दे एवेति शब्दस्य प्रमाजनकत्वरूपं प्रामाण्यं स्वीकृतमेव, किञ्च तदशिष्यं संज्ञा[२] प्रमाणत्वात्- इति सूत्रे संज्ञाशब्दानुशासनमुपस्थापयतः सूत्रकारस्याभ्युपगतमेव शब्दस्य प्रामाण्यम्। लोकतोऽर्थतः प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते इत्युक्त्या वार्तिककारोप्यत्र सम्मत एव[३]। किञ्चास्मिँल्लोके सर्वापीतिकर्तव्या शब्देष्वेवाश्रितास्ति, यथा घोरतमेऽन्धकारे महानिशायां झंझावाते प्रवहति जलनिमग्ने विषमस्थले यत्र तत्र परिभ्रमन् आपद्ग्रस्तः कश्चन पथिकः शब्देनैव सङ्केतयितव्यः इष्टस्थलं प्राप्तुं, न तु प्रत्यक्षेण दीपादेरभावात् नाप्यनुमानेन तत्सामग्र्यभावात्। श्रीहरिणापि एतदभिहितम्- इति कर्तव्यतालोके सर्वा शब्दव्यपाश्रयेति[४]। तदेवं शब्दप्रामाण्यविषये अनेकान्यभिमतानि दर्शनेषु विवेचितानि ग्रन्थाधिक्यभिया किञ्चिदेवोक्त्वा विवक्षितमुच्यते।

शब्दस्वरूपविषये नानामतानि-

सोऽयं शब्दः किं स्वरूपः, किं लक्षणञ्चेत्यत्र तत् सत्तायां बहुशोऽविवादेऽपि तत्स्वरूपविशेषावगमे विभिन्नानि मतानि वर्तन्ते। तत्र तावल्लौकिकाः, मुखान्निर्गता ध्वनय एव शब्दः, ततोऽतिरिक्तः शब्दो नास्ति, तच्छ्रवणे प्रवृत्तिनिवृत्तिदर्शनात्। वैशेषिकनैयायिकैरपि मुखान्निःसृतध्वनीनामेव श्रूयमाणानां शब्दत्वमभ्युपगतम्, श्रोत्रग्राह्यो गुणः शब्दः इत्याद्युक्तेः[५]। नैयायिकवैशेषिकौ शब्दस्यानित्यत्वमेव मन्येते। तथाहि- आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्चेति गौतमसूत्रम्[६]। अत्र भाष्यम्- आदिः योनिः कारणम्, आदीयतेऽस्मादिति कारणवदनित्यं दृष्टम्। संयोगविभागजश्च शब्दः कारणवत्त्वादनित्यः, किमुत्पत्तिकारणं, संयोगविभागौ शब्दस्य, आहोस्विदभिव्यक्तिकारणम्, इत्यत आह- ऐन्द्रियकत्वादिति। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः, शब्दोऽनित्यः इन्द्रियवत्वात् रूपादिवत्। अविद्यमानमेव अर्थबुबोधिषया स्थानप्रयत्नादिना वक्ता शब्दमुत्पादयतीति शब्दस्यानित्यता अनुभवसिद्धा। तन्मते शब्दोत्पत्तिप्रक्रिया चेत्थमस्ति- प्रथमक्षणे पूर्वो वर्ण उत्पद्यते, द्वितीयक्षणे तिष्ठति पूर्ववर्णस्थितिक्षण एव द्वितीयवर्ण उत्पद्यते तृतीयक्षणे पूर्ववर्णो नश्यति, द्वितीयश्च तिष्ठति, तत्रैव वर्णान्तरमुत्पद्यते द्वितीयश्च नश्यतीत्येवं क्रमेणानेके शब्दाः शब्दान्तरमुत्पादयन्तः श्रोतुः कर्णदेशं गत्वा श्रावणप्रत्यक्षविषयतां यान्ति। प्रयत्नजनितः शब्दः मात्रया वायुं प्रेरयति। स वायुः पूर्वशब्दाच्छब्दान्तरमुत्पादयति। सोऽयं शब्दसन्तानो यावद् वायुवेगमनुवर्तते। वेगोपरमे चोपरमति। वैशेषिकाः शब्दानित्यत्वमित्थं

---

१. पा०सू० १/२/४५
२. म०भा० १/२/५३
३. म०भा० नवा० १/१/१, छायास० पृ०सं० ६५,
४. वा०प० १/१२१
५. तर्कसंग्रह
६. न्या०द० २/२/१३, पृ० २३८,

प्रतिपादयन्ति- कर्माप्याशु विनश्यति शब्दोऽप्याशु विनश्यति। कोऽयं गुणस्य सतोऽपवर्गः, आशु विनाशः स खलु कर्मभिः साधर्म्यम्। अनित्यस्य कर्मणः साधर्म्याच्छब्दोऽप्यनित्य इति भावः। तथा च सूत्रम्- गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्। तद् व्याख्या चेत्थम्- सतः, नित्यस्य शब्दस्य लिङ्गाभावात्। शब्दनित्यत्वसाधकप्रमाणाभावादनित्यत्वम्। यदात्वसौ नोपलभ्यते तदैतस्य सत्वेन किञ्चित्प्रमाणमस्ति। नित्यत्वे प्रमाणाभावादनुपलब्धिकाले नास्तीति प्रतीयते। न च नित्यस्यापि शब्दस्यावरणेनावृत्तत्त्वान्नोपलब्धिः, वस्त्रावृतरूपादिवदिति वाच्यम्, रूपावरण-वस्त्राद्युपलब्धेरिव शब्दावरणानुपलब्धेः।

मीमांसका वेदान्तिनः सांख्ययोगिनश्च शब्दानां नित्यत्वं मन्यन्ते। तेषामयमभिप्रायः - गौरित्यत्र वर्णा एव शब्दः। तेषामेवार्थेन शक्तिरूपः सम्बन्धः। न च स्फोटात्मकः शब्दः, वर्णातिरिक्तस्य बुद्धावप्रतिभासमानत्वेन तदभावात्। ते च वर्णाः परमाणुर्वान्तरवयवाः वा। एतेचैकत्वविशिष्टा नित्या एव। अत एव सोऽयं गकार इति प्रत्यभिज्ञापि सङ्गच्छते। अनित्यत्वे तदनुपपत्तिरेव। ननु अकारादीनामैक्ये ह्रस्वदीर्घप्लुतोदात्तादिभेदो न जायेतेति चेन्न व्यञ्जकध्वनिधर्माणां ह्रस्वत्वादीनामेव वर्णेष्ववभासात्। एवमेव ककारादौ कत्वादीनामप्यवभासः। तथा च परमार्थतो ह्रस्वत्वादयो न वर्णधर्माः, किन्तु ध्वनिगता एव।

यथैव गत्वादिजातिवादिवैशेषिकमतेऽविद्यमानमेव शब्देऽल्पत्वं महत्त्वञ्च ध्वनिसंस्कारानु-सारिण्या बुद्ध्या गृह्यते तथा द्रुतादिकमपि श्रोत्रम्प्राप्य क्षिप्रमस्तं प्रयातेषु ध्वनिषु तत् संयोगरूपसंस्कारस्य श्रोत्रेऽल्पकालमवस्थानाच्छब्दोऽपि तत्क्षण एवाभिभूय तिरोभवन् द्रुत इति गृह्यते। एवमेव मध्यमो विलम्बित इति समारोपव्यवहारो युक्तः। यथा पित्तदोषदूषितं रसनेन्द्रियं मधुरगतं मधुरत्वमगृह्णदेव मधुरं तिक्तत्वेन गृह्णाति, यथा वा चक्षुरिन्द्रियं पित्तगतं पीतत्वमगृह्णदेव शङ्खगतं श्वेतत्वं पीतत्वेन ग्रह्णाति, तथा ध्वनिगतान् द्रुतादीनगृह्णदेव श्रोत्रं द्रुतादित्वेन शब्दं प्रतिपद्यते। एवं वर्णस्फोटवादिमीमांसकानाम्मते वर्णातिरिक्तं पदं वाक्यञ्च नास्त्येव। गकारादीनामयौगपद्यात् सर्वगतत्वाच्च। न च वर्णमात्रस्वीकारेऽर्थबोधानुपपत्तिः, प्रत्यक्षरं बोधादर्शनात्। न च वर्णसमुदायादर्थधीः, युगपदभिव्यक्तिरहितानां समुदायस्यासम्भवादिति वाच्यम्, क्रमवर्तिनां वर्णानां क्रमिकसंस्कारेण साहित्यकल्पनात्। यथा स्वर्गकामो यजेतेत्यत्र क्रियारूपयागस्य क्षणिकत्वेन समुदायासम्भवात् स्वर्गसाधनत्वानुपपत्त्या कालान्तरभाविस्वर्गं प्रति चिरस्थायियागजन्यमपूर्वं कल्प्यते। तथैवैकवर्णेनार्थबोधादर्शनाच्च सकलोच्चारणेऽर्थबोधदर्शनाच्च स्वरूपतो वर्णसमुदाया-सम्भवेऽपि संस्कारतः समुदायकल्पनम्। तत् एव चार्थप्रतीतिः।

वैयाकरणसामान्यमतम् -

अत्र स्फोटवादिनो वैयाकरणाः ये शब्दानित्यत्ववादिनो नैयायिकवैशेषिकादयस्तेषाम्मते शब्दानामनित्यत्वेन, प्रत्युच्चारणं शब्दानां भिन्नतया स्वीकारेऽनन्तवर्णतद्ध्वंसतत्प्रागभावकल्पनापत्तौ गौरवम्।

वर्णानामनित्यत्वेऽपि पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितचरमवर्णश्रावणेनोद्बोधकेन समूहालम्बनात्मकस्मरणजननेन शाब्दबोधोपपत्तिरिति तु न, स्मरणस्य वैपरीत्येनापि विषयग्रहण-स्वभावत्वेन नदी दीन जरा राजेत्यादौ विपरीतबोधापत्तेः। मीमांसकानां मते यद्यपि वर्णानामस्ति नित्यत्वम्। विभुत्वञ्च स्वीकृतमिति तन्मते अनन्तवर्णध्वंसतत्प्रागभावकल्पनाप्रयुक्तो दोषो नास्ति। तथापि नवस्वराणां त्रयस्त्रिंशद्व्यञ्जनानां विसर्गादीनाञ्च नित्यानां स्वीकारे तद्व्यञ्जकानां ध्वनीनां क्रमेणाभिव्यक्तिमता प्रत्येकवर्णेनार्थाबोधात् सकलोच्चारणानन्तरमेव बोधदर्शनात् सम्भूयकारित्वोपपत्तये तत्प्रयोजकभावनाख्यसंस्कारस्मृतिकल्पने च गौरवात्, सर्वानुभूतपदवाक्यादीनां मिथ्यात्वकल्पनस्यानुचितत्वाच्च तन्मतं चिन्त्यम्। अतोऽत्वकत्वादिधर्मवन्तो वर्णरूपा ध्वनय एवार्थप्रतीतिजनकं स्वरूपरुषितं कालत्रयाबाधितं शब्दब्रह्मापरपर्यायं स्फोटमभिव्यञ्जयन्ति। स्फुटत्यर्थोऽस्मादिति वा स्फुट्यतेऽसौ वेति विग्रहे स्फोटशब्दो निष्पद्यते। तथा च ध्वनिव्यङ्ग्यत्वे सति अर्थप्रतीतिजनकत्वं स्फोटलक्षणं सम्पद्यते। अत्वादिविशिष्टध्वनिनाभिव्यज्यमानतया, अर्थप्रतीतिजनकतया च शब्दस्य स्फोटत्वं सिद्ध्यति। न च श्रोत्रेण वर्णानामेव प्रत्यक्षत्वेन तदतिरिक्तस्य तदविषयत्वेन च स्फोटासिद्धिरिति वाच्यम्। गौरित्येकं पदं गामानयेत्येकं वाक्यमित्येकपदवाक्यानुभवस्य तदेवेदं पदम्, तदेवेदं वाक्यम्, सोऽयम्, गकार इति प्रत्यभिज्ञायाश्च प्रमाणत्वात्।

न च उक्तानुभवप्रत्यभिज्ञयोर्वर्णसमुदायविषयकत्वेनोपपत्तिः, उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वेन तादृशकल्पनानुपपत्तेः। न च प्रत्येकवर्णानुभवजनितानुभवाहितसंस्कारैः संहत्य सर्ववर्णविषयिणो एकैव स्मृतिरिति न वर्णसमुदायस्मरणानुपपत्तिरिति वाच्यम्, असति बाधके एकं वाक्यं एकं पदमिति प्रत्यये मिथ्यात्वस्य कल्पयितुमशक्यत्वात्। तस्माद-बाधितपदवाक्यैकत्वप्रत्ययो वर्णातिरिक्तवाचकमन्तरा न सम्भवतीति एकं पदं एकं वाक्यमित्येकत्वप्रत्ययविषयतया पदस्फोटवाक्यस्फोटौ च सिद्धौ। ननु स्फोटवादिनस्तवाप्ययं दोषः, तथाहि तव मतेऽपि नानभिव्यक्ताः स्फोटा अर्थसाधका अपि तु अभिव्यक्ता एव। तथा च प्रत्येकाभिव्यक्तस्फोटादर्थाबोधदर्शनेन वर्णसमुदायाभिव्यक्त एव स्फोटो वाचको मन्तव्यस्तथा च तस्यैवाभिव्यञ्जकसमुदायस्यैव वाचकत्वे सिद्धे स्फोटकल्पनानुपपत्तिरिति चेन्न, प्रत्येकवर्णाभिव्यक्तस्य स्फोटस्य वाचकत्वोपपत्तौ वर्णसमुदायकल्पनस्यानावश्यकत्वात्। अन्तिमवर्णातिरिक्तपूर्वपूर्ववर्णाभिव्यक्तस्फोटादर्थबोधापत्तिस्तु न, रत्नपरीक्षणन्यायात्। यथा वज्रादीनां रत्नानां परिचयायानेकवारं प्रत्यक्षान्तरमेव परीक्षणं जायते, एवमेव पूर्ववर्णाभिव्यक्तस्फोटविषयक-प्रत्ययेनाहितसंस्कारे चित्तदेशेऽन्तिमवर्णाभिव्यक्तस्फोटेनैवार्थप्रत्ययो, न पूर्ववर्णाभिव्यक्तस्फोटेन, शब्दशक्तिस्वभावात्, तथैवानुभवात्। यथा वा दूरेऽवस्थितः सहकारवृक्षः हस्तिपलालराशितया प्रतीयते, ततोऽपि सामीप्ये वृक्षत्वेन अत्यन्तसामीप्ये आम्रत्वेन प्रतीयते, तथैवान्तिमवर्णाभिव्यक्तः सम्यक् प्रतीतः स्फोटोऽर्थबोधं जनयति। तदुक्तं ऋलृक्सूत्रे[1] भाष्यकृता- रश्रुतेर्लश्रुतिर्भवतीति।

१. प्रत्याहारसूत्रम् - २

तपरसूत्र[1] भाष्येऽपि एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दगुणः (शब्दव्यञ्जकत्वेनोपकारकः) कथं भेर्याघातवत्, तद्यथा भेर्याघातः भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित्त्रिंशत्पदानि कश्चिच्चत्वारिंशत्, स्फोटस्तावानेव भवति ध्वनिकृता वृद्धिः।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥

ननु भेर्याघातस्थले स्फोटाभावात्, स्फोटस्तावानेवेति भाष्यासङ्गतिरत आह भाष्ये ध्वनिरिति। भेर्याघातस्थले ध्वनिः स्फोटश्च भवतः। व्यञ्जको ध्वनिः स्फोटो व्यङ्ग्यश्चेत्यर्थः, किन्तु व्यङ्ग्यानां स्फोटरूपाणां शब्दानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एवाल्पो महांश्च भवति। व्यङ्ग्यः स्फोटस्तु अभिन्नकाल एवेत्यर्थः। तस्मात् सर्वविधदोषपरिहारात् आवश्यकत्वाच्च वर्णध्वनिव्यतिरिक्तः स्फोटो वैयाकरणैः स्वीक्रियते।

स्फोटवादे भाष्यकृत्सम्मतिः -

अत एव अथ शब्दानुशासनमित्यत्र गौरित्यत्र कः शब्द इति शब्दस्वरूपजिज्ञासायां भगवान् भाष्यकारः, येनोच्चारितेन सास्नालाङ्गूलककुद्खुरविषाणानां सम्प्रत्ययो भवति स शब्द[2] इत्याह। स्फोटस्योच्चारणासम्भवात् उच्चारितेन प्रकाशितेन। उद्योतकारस्तु शारीरमास्ताभिहतकण्ठादिस्थानैरवयवद्वाराभिव्यक्तेनेत्याह। अत्रत्यभाष्याशयं स्पष्टयन् प्रदीपकार आह-वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे-द्वितीयादिवर्णोच्चारणान्नार्थक्यप्रसङ्गात्, आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्, अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां च वाचकत्वे सरो रस इत्यादावर्थप्रतीत्यविशेषप्रसङ्गात्, तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः। उच्चारितेन प्रकाशितेन। भाष्याशयं विस्फोटयन् प्रदीपकारः विरोधिमतखण्डनपुरस्सरं स्फोटवादं व्यवस्थापितवान्। उद्योतकारोपि अमुमेवार्थं व्यवस्थापयति-तथा चोद्योतग्रन्थः - ननु येन क्रमेणानुभूता वर्णाः तेनैव क्रमेणैकस्मृत्युपारूढानां वाचकत्वेन नार्थप्रतीत्यविशेषप्रसङ्गः, अन्यथा त्वयापि वर्णानां स्फोटव्यञ्जकत्वाभ्युपगमात् कथं पूर्वोक्तदोषनिस्तारस्तवापीत्यत आह - विस्तरेणेति, किञ्च इदमेकं पदमित्येकं वाक्यमिति प्रत्ययः स्फोटसत्वे तदैक्ये च प्रमाणम्, अनुभवक्रमेणैव स्मरणमित्यर्थे दृढतरप्रमाणाभावाच्च। क्रमेणानुभूतानां व्युत्क्रमेणापि स्मरणदर्शनात्। मम तु यथा पटे नानारञ्जकद्रव्याहितो नानावर्णोपरागः, स च स्थिरः, तस्य च मनसा ग्रहणमिति न दोषः। अथ येनेत्येकवचनेन विषाणिनामिति बहुवचनेन चानेकोच्चारणविषयगौरित्यस्यैकत्वं सूचितम्, भेदप्रत्ययस्त्वौपाधिकः। अत्र स्फोटवादस्य समस्तोऽपि सिद्धान्तः सूक्ष्मरूपेणोक्तो बोध्यः। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन स्फोटे

---

१. पा० १/१/७०, नवा० महा० पृ०सं० ५६२

२. नवा०म०भा० १, पृ०१७, छाया० निर्णयसागर सं० ५

प्रमाणन्तु दत्तमेव लक्षणन्तु स्फोटपदनिर्वचनद्वारा प्रमीयते तथाहि – स्फुट्यते ध्वनिना अभिव्यज्यते इति कर्मव्युत्पत्त्या, स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च घञन्तः स्फोटशब्दो निष्पद्यते। तथा च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधनकत्वं स्फोटस्य लक्षणं पर्यवस्यति।

भाष्ये येनोच्चारितेनेत्यादिना इदमेवोक्तम्। अत्र विशेषणदलाभावे प्रत्यक्षादावतिव्याप्तिः स्यात्, तेषामपि अर्थबोधकत्वात्, विशेष्यदलाभावे तु केनचित् क्रियमाणेन चुटुचुटुध्वनिनाभिव्यक्ते इतोऽपसर्तव्यमित्यादौ अतिव्याप्तेः, यदि च ध्वनिपदेन व्यक्त एव ध्वनिर्गृह्यते, तदापि ध्वनिप्रकाश्ये ध्वनिजन्यश्रावणप्रत्यक्षे ध्वनावतिव्याप्तिः, लौकिकप्रत्यक्षम्प्रति विषयस्य तादात्म्येन हेतुत्वात्, ध्वनिप्रत्यक्षे ध्वनेरपि जनकत्वात्। विशेष्यदलप्रविष्टबोधजनकत्वम्, बोधस्वरूपयोग्यत्वमेव, तेन घटपदे श्रुते कस्यचिदर्थबोधाभावेऽपि नाव्याप्तिः। शब्दादर्थं प्रतिपद्यामहे- इत्याद्यनुभवबलप्रतीतस्यार्थबोधजनकत्वस्य वृत्याश्रयत्वस्य स्फोटो वान्यथानुपपत्त्या एको नित्यो घटादिरूपः स्फोटः कल्प्यते। अन्यथा क्षणप्रध्वंसिनां वर्णानां मेलनासम्भवात् बोधजनकत्वाश्रयत्वानुपपत्तिरेव स्यात्। नष्टस्याप्याश्रयत्वस्वीकारे नष्टो घटो जलवानिति प्रतीत्यापत्तिरेव स्यात्। प्रत्यक्षतोऽपि स्फोटस्यैकत्वं नित्यत्वञ्च सिध्यतः। तथा हि घट इत्येकपदविषयकं यत्प्रत्यक्षं जायते बाधकं विना तदपलापस्य कर्तुमशक्यतया तदप्येकनित्यस्फोटसाधकमेव। न च सा प्रत्यक्षप्रतीतिर्वर्णानेवावगाहत इति वाच्यम्, पुष्पेषु सूत्रं विना मालाप्रतीत्यभाववत् परस्परविलक्षणवर्णमालायामभिन्ननिमित्तमन्तरा पदप्रतीत्यभावस्यैवापत्तेः।

ननु वर्णानां वाचकत्वे यः समापन्नो दोषः स स्फोटव्यञ्जकत्वपक्षेऽपि समान एवेति चेन्न, प्रथतो वर्णः स्फोटमस्फुटमभिव्यञ्जयति द्वितीयः स्फुटम्, तृतीयः स्फुटतरम्, चतुर्थः स्फुटतममित्येवं रीत्या प्रत्येकव्यञ्जकत्वस्वीकारेण प्राप्तसमस्तदोषनिरासात्। तदुक्तं हरिणा –

प्रत्येकं व्यञ्जका वर्णा भिन्ना वाक्यपदेषु ये।
तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः[1]॥

स्फोटस्वीकारे सूत्रकारहृदयम् –

महामुनिः पाणिनिरपि स्फोटं सम्मन्यते – तथाहि – प्रातिपदिकसंज्ञाविधायकमर्थवद-धातुरप्रत्ययः प्रातिपदिकमिति[2] सूत्रमारचयन् अर्थविषयकबोधजनकस्य प्रातिपदिकसंज्ञामिच्छति। यस्मिन् शब्दे अर्थबोधकत्वरूपा शक्तिस्तस्य प्रातिपदिकसंज्ञेति सूत्रार्थः। स्फोटवादमन्तरा अर्थबोधकत्वरूपा शक्तिः कुत्र तिष्ठेत्, शब्दानित्यत्वे आश्रयाभावात् तत्स्थित्यनुपपत्तेरिति सूत्रवैयर्थ्यापत्त्या नित्यः स्फोटः सिद्ध्यतीत्यभिप्रायस्तस्येति निश्चीयते।

एवमेव युष्मदस्मद्भ्यां[3] ङसोऽश् इति अशिति शिद्विधानेन–

---

१. क०प०ब्र०वा०

२. पा०सू० १/२/४५

३. पा०सू० ६/१/१२३

सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥

इत्यस्याः परिभाषायाः ज्ञापनमपि। तेनापि नित्यस्फोटस्य सङ्केतो मिलति।

वार्तिककारमतेऽपि स्फोटसिद्धान्तः -

महाभाष्ये सिद्धे शब्दार्थसम्बन्धे - इति सूत्रे वार्तिककृता शब्दस्य नित्यत्वं कण्ठरवेणोक्तम्। नन्वत्र वार्तिके शब्दमात्रमुक्तम् - न स्फोट इति चेन्न, तत्र वार्तिके शब्दस्य नित्यत्वकथनेन स्फोटस्यैवोक्तत्वात्। नित्यशब्दस्यैव स्फोटत्वात्। एवमेव स्वं रूपमिति[1] सूत्रेऽपि शब्देनार्थगतेरर्थस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम्, न वा शब्दपूर्वके ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिरिति वार्तिकद्वयं कुर्वता वार्तिककारेण स्फोटवादस्य सम्यक् समर्थनं कृतम्। स्फोटास्वीकारे तत्रार्थबोधकत्वस्यासम्भवेनोक्तवार्तिकद्वयस्योत्थानमेव न स्यात्।

अन्यमते स्फोटचर्चाः -

महर्षिर्यास्कोऽपि व्याप्तिमत्वात्तु[2] शब्दस्येति सूत्रं प्रणयन् स्फोटं स्वीकरोत्येव। न हि स्फोटसिद्धान्तमन्तरा शब्दस्य व्यापकत्वं सम्भवति। एवमेव महर्षिरौदुम्बरायणो वार्ताक्षश्चोभावपि स्फोटं सम्मानयतः। हरिणा यथोक्तम् -

वाक्यस्य बुद्धौ नित्यत्वमर्थयोगञ्च लौकिकम्।
दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ॥[3]

चतुष्ट्वं नामाख्यातोपसर्गनिपाताश्चेति। नास्ति, वाक्यस्याखण्डत्वात्। वृत्ताक्षस्यापत्यमिति, उदुम्बरस्यापत्यमिति च विग्रहौ। यद्यपि अस्यां कारिकायां वाक्यस्याखण्डत्वं स्फोटत्वञ्चोक्तम् तथापि, विशेषस्य सामान्यगर्भतया, स्फोटसामान्यमपि परिगृहीतमेवेति बोध्यम्।

ब्रह्मसूत्रे देवताधिकरणेऽपि श्रीशङ्कराचार्यभगवत्पादैरपि स्फोटविषये बहुचिन्तितम्। तत्र विशेषतो देवशरीराद्युत्पत्तिमाक्षिप्य सर्वजगत उत्पत्तिं शब्दतः प्रक्षिप्य शब्दसृष्टौ शङ्कायाम्, तथा प्रजापतेरपि स्रष्टुः सृष्टेः पूर्वं वैदिकाः शब्दाः मनसि प्रादुर्बभूवुः पश्चात्तदनुगतानर्थान् संसर्जेति गम्यते। तथा च श्रुतिः - स[4] भूरिति व्याहरत् सभूमिमसृजदित्यादिशब्दैः जगदुत्पत्तेः शब्दमूलकत्वं साधितम्। तत्र किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यत इत्याक्षेपे, स्फोटमित्याह - इत्युक्तम्। मध्ये च वर्णानामपि वाचकत्वमाक्षिप्य प्रदूष्य च तस्मात् स्फोट एव

१. पा०सू० १/१/६८
२. निरु० १/१/४
३. वा०प० २/३४२
४. तै०ब्रा० २/२/४/२

शब्दः। भेदप्रत्ययस्य वर्णविषयत्वात्, तस्मान्नित्याच्छब्दात् स्फोटरूपादभिधायकात् क्रियाकारकफललक्षणं जगदभिधेयभूतं प्रभवतीति - इत्यादिवचोभिः श्रीशङ्कराचार्यो भगवान् स्फोटवादम्प्रति महनीयां स्वाभिरुचिमदर्शयत्[१]।

योगसूत्रभाष्यविवरणेऽपि - स्फोटविषये बहुविचारितम् - तद्यथा शिबिकोद् वाहनादि अनेकसाध्यमेकस्यापि वैकल्ये न सम्पद्यते - तथैवार्थस्य प्रतिपादनमप्यनेकसाध्यत्वादन्यतमेन वर्णानामशक्यमिति पदस्यैव व्यञ्जितारो वर्णा इत्यभिहितम् अत्र व्यञ्जितार इत्युक्त्या पदस्फोटस्यैव सङ्केतः। व्यङ्ग्यव्यञ्जकभावो नित्यस्य, नित्यस्यैव च स्फोटत्वम्। पदस्फोट इत्युपलक्षणम्। सांख्यशास्त्रे क्वचिद् वर्णस्फोटस्यैव चर्चेति - तूपलक्षणतया बोध्यम्, स्फोटमात्रसाधनत्वेन वा तद्योजनीयम्।

पूर्वमीमांसादर्शनेपि यद्यपि वर्णस्फोटस्य साधनमुक्तम्।

तथापि अंशतः स्फोटवादः स्वीकृत एव तत्र - स्फोटसाधनानि त्त्रित्थं बोध्यानि सत्वान्तरे च यौगपद्यात् इति सूत्रं व्याचक्षाणेन श्लोकवार्तिककृता, नानादेशावगम्यत्वाद् युगपत्तुल्यबुद्धिभिरित्युक्तम्। तत्रैवाग्रिमे श्लोके उत्तरार्द्धरूपेण, ''अविभुत्वे हि युगपन्नैको नानावगम्यते'' इत्युक्तम्। तेनैकस्य युगपदेव नानाधिकरणेषूपलम्भेन वर्णात्मकस्य शब्दस्य विभुत्वं सिद्धयत्येव। पुनरग्रे -

''प्रागुक्तेन विभुत्वेन व्योमवच्चास्य नित्यता'' इति कथनेनापि तस्य नित्यत्वविभुत्वे प्रतीयेते। तथा चानया रीत्या वर्णस्फोटवादः स्थिरीभवत्येतन्मते।

भर्तृहरिमतसम्मतः स्फोटः -

भर्तृहरिस्तु वाक्यपदीयारम्भे एव स्फोटं शब्दब्रह्मरूपतया नित्यतया सर्वजगदुपादानतया च निर्दिदेश - तथा चोक्तम् -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[२]

यद् अनादिनिधनमक्षरं शब्दतत्त्वं ब्रह्म।

यतो जगतः, क्रिया, यच्चार्थभावेन विवर्तते। तद् व्याकरणमागम्य परब्रह्माधिगम्यते, इत्यग्रिमेऽन्वयः।

अथवा यतः जगतः प्रक्रिया, अर्थभावेन विवर्तते, इत्यन्वयः। अनादिनिधनमित्यस्य प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगीत्यर्थः। नित्यमिति यावत्, नित्यस्योक्तत्वात् अक्षरमित्यस्य व्यापकत्वमर्थः। तत्त्वशब्दः स्वरूपपरः शब्दतत्त्वं शब्दात्मकम् - व्यापकत्वस्योक्तत्वात् ब्रह्मशब्द

---

१. ब्र०सू० १/३/२८
२. वा०प० १/१

आनन्दपर इति केचित्। शब्दात्मकं ब्रह्मेत्यर्थः, यद्वा शब्दतत्त्वमेव विशेष्यीभूतम्, तस्यैव लक्ष्यमाणत्वात्। तथा च नित्यत्वे सति व्यापकत्वे सति आनन्दरूपत्वं शब्दब्रह्मणो लक्षणं सिद्धम्। इदञ्च स्वरूपलक्षणम् - नित्यत्वादीनां स्वरूपत्वात्, उत्तरार्द्धेन तटस्थलक्षणमाह - विवर्तत इति। यतो ब्रह्मणः शब्दतत्त्वात् जगतः सकलस्यागमस्य त्रयीरूपस्य प्रक्रिया प्रथममुत्पत्तिः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै, इति ब्रह्मण उत्पत्तेः पूर्वमेव वेदानामुत्पत्तिश्रवणात्, नहि वेदमात्रस्य तत उत्पत्तिरपि तु सर्वस्यापि प्रपञ्चस्येत्यत आह - विवर्ततेऽर्थभावेनेति। अर्थभावेन आकाशाद्यर्थभावेन विवर्तते शब्दतत्त्वमिति शेषः, शुक्तौ रजतमिव अतात्त्विकरूपेण प्रतीयते। अनेन शब्दब्रह्मणः सर्वस्यापि जगतोऽभिन्ननिमित्तोपादानत्वं सूचितं भवति।

केचित् तत्त्वविद इत्थमाहुः -

परारूपस्यानादिनिधनस्य शब्दब्रह्मणस्तरङ्गद्वयम् (१) संवित्तरङ्गः (२) आनन्दतरङ्गश्च। तत्र संवित्तरङ्गात् चिन्मयात् - पश्यन्तीरूपेण चिन्मयेन त्रय्यादिरूपेण शब्दसृष्टिः, तथा आनन्दमयतरङ्गतः ईश्वरादिक्रमेण अर्थसृष्टिः, युक्तञ्चैतत् सृष्टेरुभयरूपतया आरोपे सति निमित्तानुसरणमिति न्यायेन आरोपान्यथानुपपत्त्या शब्दब्रह्मणि विशेषं परिकल्प्य सृष्ट्युपपादनस्यौचित्यात्। इदमत्र बोध्यम् - ब्रह्मणो हि अवस्थाद्वयी शास्त्रे प्रसिद्धा। एका स्वरूपभूता विद्ययाऽप्रविभागरूपा। अपरा चाविद्याप्रयुक्ता विभागरूपा। व्याकृतावस्थेति यावत्। तत्र यद्यपि प्रविभागदशायां ब्रह्म विविधनामरूपादिविकल्पगोचरं यथा घटोऽभूत् भवति भविष्यतीत्यादि कालभेदेन, गोत्वादिविभिन्नजातिपुरस्कारेण गोघटादिप्रत्ययः। अविद्याप्रयुक्त एव क्वचिद् भेदप्रत्ययः, क्वचिच्चाभेदप्रत्ययः, क्वचिद् भावप्रत्ययः, क्वचिदभावप्रत्ययः। तथापि कार्यरूपेण प्रविभागाभावदशायां सर्वविकल्पातीतं ब्रह्म। नन्वेकस्य ब्रह्मणः नानाविकल्पतया प्रतीत्यनुपपत्तिरिति चेन्न, ब्रह्मण एकत्वेऽपि अविद्यामूलकनानाविधशक्तिसमाश्रयेण प्रविभागवत्त्वात्। ताश्च शक्तयः कार्यानुमेयाः प्रविभागसम्पादिकाः। विद्या चाप्रविभागसम्पादिका। ततश्च शब्दब्रह्मणश्चिद्रूपं सर्वविकल्पातीतं वास्तविकं तदेवानादिनिधनं विकल्पाश्रितञ्च अविद्यापरवशम्। न चानेन तत्र विकल्पसम्बन्धः, विवर्तावस्थायामपि तस्य ब्रह्मरूपत्वात्। यथा शुक्तौ - इदं रजतमिति रजतप्रतिभासकालेऽपि शुक्तेः शक्तित्वेन सत्त्वम् रजतस्य मिथ्यात्वात्। एवमेव सर्वविकल्पानामाविद्यकत्वेन कल्पिततया न तत्प्रतीतिदशायामपि ब्रह्मणो भेदः। विषयाणाम-वास्तविकत्वेऽपि कालशक्तिवशात्तेषां प्रतीतिर्न विरुद्ध्यते। तथाहि - शब्दब्रह्मणो यः स्वकार्य-भूतविषयाकारेणोत्पत्तिनिधनादिभिर्विविधविकल्पैः परिच्छेदः सोऽविद्याशक्तिवशात् सत्य इव भासते। न तु सत्य एव। ब्रह्मणः श्रुतेन कूटस्थनित्यत्वेनोत्पत्तिनिधनादिरूपसत्यविकल्पासम्भवात्। शब्दतत्वमित्युक्त्या सर्वेषामपि विकाराणां शब्दात्मकत्वं सूच्यते। यथा घटकुण्डलादयो विकारा मृत्सुवर्णादिप्रकृत्यन्विता हि दृश्यन्ते, तथैवैते विषयाः शब्दरूपानुगता एव दृश्यन्ते तदाह -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[१]

अत एषां प्रकृतिः शब्दतत्त्वमेव।

ननु भिन्नस्वरूपाणां भिन्नेन्द्रियग्राह्याणां रूपादीनां कथमभिन्नेन्द्रियग्राह्यं शब्दतत्त्वं प्रकृतिः? उपादानोपादेययोः सारूप्यस्यैवौचित्यादिति चेन्न, रूपादीनां भिन्नेन्द्रियग्राह्यत्वस्याविधायकत्वात्। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुत्या प्रकृतेरेव सत्यत्वलाभात्। किञ्च शब्देनैव वस्तु परिच्छिद्यते, अतः प्रकृतिविकृतिभावेन शब्दात्मकं वस्तु। तथा हि यद्यर्थः शब्दात्मको न भवेत् तदा शाब्दे ज्ञाने घटादिविषयके अर्थः न प्रतीयेत। किन्तु शब्देन शब्द एवं प्रतीयेत, अन्येनान्यप्रतीत्ययोगात्। प्रतीयते च शब्देन अर्थः इति शब्दप्रकृतिकतया शब्दात्मकोऽर्थः। किञ्च सर्वेऽपि प्रवृत्तिनिवृत्तिरूपा व्यवहाराः शब्देनैव क्रियन्त इत्यतोऽपि तेषां व्यवहाराणां तद्विषयाणाञ्च मूलभूतं शब्दात्मकं ब्रह्मैव। तच्च शब्दब्रह्म - अक्षरं व्यापकम् अथवा अक्षराणां वर्णानां, निमित्तत्वादक्षरमित्युच्यते, कार्यकारणयोरभेदोपचारात्। अक्षरनिमित्तत्वं ब्रह्मणो यथा- प्रत्येकचैतन्ये ज्ञानरूपेऽन्तरविधया सन्निवेशिताः पदवाक्यरूपावर्णाः परप्रत्यायनार्थं प्रयत्नेनाभिव्यज्यन्ते। सोऽयं वर्णसङ्घातरूपः शब्दः शब्दब्रह्मणोऽभिष्यन्द इत्युच्यते -

श्रुतिरप्यत्र -

सूक्ष्मार्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि संविनिष्टाम्।।

उक्तकारिकायामिदमेवाह - विवर्ततेऽर्थभावेनेति - विवर्तत इति स्वरूपादप्रच्युतं सदर्थरूपतया प्रतीयते, इत्यर्थः। तथाहि - यथा - स्वप्नावस्थायामेक एव विज्ञानात्मा भिन्नजातीयानेकपदार्थावभासो जायते। न च विज्ञानस्य तदा स्वरूपहानं भवति, तथा सत्यनुभवाभावेन उत्थितस्य स्मरणानुपपत्तेः। तथा शब्दतत्त्वं ब्रह्मापि स्वरूपादप्रच्युतं सत् स्वाविद्यारूपया शक्त्या अर्थाकारेण प्रतिभासत इति भावः। तदिदं शब्दतत्त्वमेव स्फोटात्मकं सर्वजगदुपादानमिति हरिर्मन्यते। यद्यप्यत्र स्फोटशब्दो नाभिहितः। किन्तु स्फोटरूपाविभागेनेत्यादिकारिकासु स्फोटपदाभिधानेन स्फोटोऽभिमतोऽस्येति ज्ञायेत। स च स्फोटो घटादिध्वनिरूपरूषिततया प्रविभागावस्थां प्राप्तोऽपि स्वतः अखण्डो निर्विभाग एवेति। हरिराह-

अव्यक्तः क्रमवाँशब्दः उपांश्वयमधीयते।
अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते।।[२]

असावक्रम एव स्फोटात्मा प्रतिभासमानः अभिव्यञ्जकध्वनिरूपोपाधिवशात् क्रमवान् इवावभासते।

---

१. का० १ वा० १२३
२. वा०का० २ का० १९

वस्तुतस्तत्र पूर्वापरीभावो नास्तीत्युच्यते – हरिणा –

नित्येषु तु कृतः पूर्वं परं वा परमार्थतः।
एकस्यैव तु सा शक्तिर्यदेवमवभासते॥[१]

नित्ये निरवयवे च वाक्येऽवयवभेदप्रयुक्तक्रमभेदस्य वस्तुतोऽभावेऽपि स्वशक्तियोगाद्धि क्रमप्रत्यवभासमात्रस्य भेदस्य च प्रतिभासमात्रशरीरत्वम्, न तु वास्तविकत्वमिति भावः।

इत्येवं क्रमेण प्रथमकाण्डे द्वितीयकाण्डे च वाक्यस्फोटस्य वाक्यपदीयग्रन्थे विवेचनं कृतम्।

महावैयाकरणो दीक्षितोऽपि स्फोटतत्त्वं द्रव्यत्वादिरहितमनादिनिधनं मन्यते – तथाहि स च सर्वकारणानामपि कारणभूतोऽनादिनिधनो विभुः प्रपञ्चात्मकविवर्तोपादानस्वरूपः स्फोटपदाभिधेयः पदार्थो, न द्रव्यादिरूपः, गुणक्रियादिशून्यत्वात् – अपि तु भावात्मैव केवलं वक्तुं कथञ्चिच्छक्यते इति शब्दकौस्तुभे[२] स्पष्टमुक्तं तेन।

शब्दब्रह्मणश्चिद्रूपता –

तदिदं स्फोटतत्त्वं सर्वजगदुपादानमित्युक्तम्। तथाहि – 'वागेव विश्वाभूतानि जज्ञे' – इत्येषा श्रुतिः वाक्तत्त्वस्य जगत्कर्तृत्वं बोधयति। एवमेव 'वागेव बुभुजे' इत्येषा श्रुतिर्वाचो भुवनपालकत्वं संहारकत्वञ्च प्रतिपादयति। भुज् पालनाभ्यसंहारयोरिति कथनात्। तथा च यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्ति अभिविशन्ति च, इत्यादिश्रुत्या ब्रह्मणो जगत्कर्तृत्वं पालयितृत्वं संहर्तृत्वं च प्रतिपादयन्त्या सहैकवाक्यत्वाय वाक्तत्त्वस्य ब्रह्मरूपता स्वीकार्या – अन्यथा श्रुत्योर्विरोधापत्तेः। तस्याञ्च चिद्रूपता सुतरां निश्चेतुं शक्या ''सच्चिदानन्दं ब्रह्म'' ''नित्यं विज्ञानमानन्दं ब्रह्म'' इत्यादिश्रुतिजाते ब्रह्मणश्चिद्रूपत्वेन संकीर्तनात्। एवं स्थितौ न हि चिद्रूपत्वमेव अपि तु सद्रूपत्वमानन्दरूपत्वमपि सूपपन्नम्।

तथा च यथा घटः सन्, पटः सन्, इत्येवंरूपेण प्रपञ्चमात्रे सद्रूपस्यानुवेधः, घटो भाति, पटो भातीत्यादिरूपेण चिद्रूपानुवेधः घटः प्रिय, इत्यादिरूपेण आनन्दरूपानुवेधः तथैव घटाद्यर्थे प्रपञ्चमात्रे घटोऽयमित्यादिवाचकशब्दानुवेधदर्शनात् सच्चिदानन्दरूपापेक्षया शब्दात्मकमपि स्वरूपं प्रकाशयन्तीं वाग्वै ब्रह्मेति श्रुतिं स्थापयन्तः वैयाकरणाः शब्दब्रह्म प्रमाणयन्ति। भगवता महाभाष्यकृतापि चत्वारि शृङ्गा त्रयोऽस्य पादा इति मन्त्रव्याख्यानावसरे महान् देवः, तेन न साम्यं यथा स्यादित्यध्येयम्, व्याकरणमित्युक्तम्। श्रीनागेशेन – महान् परब्रह्मस्वरूपो देवोऽन्तर्यामिरूपः, साम्यं सायुज्यमिति व्याख्या कृता। अत्र शब्दस्य परब्रह्मरूपत्वकथनेन आनन्दरूपता चिद्रूपता प्रमाणिता। अन्यथा चिदानन्दभिन्नतया तत्सायुज्याभिलाषानुपपत्तिरेव स्यात्।

---

१. वा०का० २ का० २२
२. श०कौ०म०भा०पस्प०

श्रीनागेशस्यात्राकूतम् -

तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचिद् एव बोधकतया तैर्ग्रहादित्युद्योतकृदुक्त्या पटादिध्वन्युपहितस्य चैतन्यस्यैव स्फोटपदेन व्यपदेशो दृश्यते।

लघुमञ्जूषाग्रन्थे शक्त्याश्रयः[१] क इति जिज्ञासुना मञ्जूषाकारेणोक्तम् - मध्यमायां यो नादांशस्तस्यैव वाचकत्वेनाक्षतिरिति। तत्र चिदचिन्मिश्रोंशो नादः, इत्युक्तत्वान्न कोऽपि विरोधः। अचिदंशस्योपाधिरूपतया, चिदंशस्यैव वास्तविकत्वात्। अनुपहितचित्तत्त्वस्यैव स्फोटरूपपराशब्देन व्यवहारः श्रीहरिणा कृतः -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन, प्रक्रिया जगतो यतः॥

कारिकायामस्यां पूर्वार्द्धेन स्वरूपभूतायाः पराया एव वर्णनमुपक्रान्तम्। उत्तरार्द्धेन तु सोपाधिकस्य वर्णनम्। कालशक्त्युपहितस्यैव जगत्कारणत्वोपपत्तेः। सोऽयं स्फोटात्मा शब्दः, नित्यो विभुरेको वैयाकरणनये स्वीकृतः। अत्र च युक्तयः, प्रमाणानि प्रदर्शितानि। पुनरपि दार्ढ्याय किञ्चिदुच्यते-

स्फोटस्य विभुत्वमेकत्वं नित्यत्वञ्च-

पूर्वमीमांसायां वर्णस्फोटस्य साधनमुपलभ्यते। तथाहि - शब्दो नित्यः, सत्त्वे सत्यकारणत्वात्, व्योमवदित्यनुमानविधया शब्दस्य नित्यत्वमुक्तम्, ननु शब्दोपलब्धये, ताल्वादिव्यापाराणां हेतुत्वानुभवेनोक्तानुमानं बाधितमिति चेन्न, ताल्वादिव्यापाराणां नित्यस्यापि शब्दस्याभिव्यञ्जकत्वस्वीकारात्।

यदि च - ताल्वादिव्यापारः, शब्दकारणम्- तदनन्तरभावित्वात् - यद् यदनन्तरभावि तत्तज्जन्यमिति व्याप्तेः, कुलालव्यापारानन्तरभाविघटवदित्यनुमानमापाततः, शब्दस्य ताल्वादिव्यापारकारणकत्वं साधयितुं प्रवृत्तम्, तथापि, खननरूपव्यापारानन्तरभाविकूपोदकादौ व्याप्तेर्व्यभिचारात् नानुमानमिदं तत्साधयितुं क्षमते। तत्र खननं कूपोदकाभिव्यञ्जकमेव न तत्तज्जनकम्। एकत्वमपि सोऽयं गकारः, तदेवेदं पदम्, तदेवेदं वाक्यम्, इत्यादि प्रत्यभिज्ञावशात्सिद्धमेव। महाभाष्यकृतापि[२] अकारादीनामेकत्वनित्यत्वसाधनाय आदित्यवत्स्युरिति वार्तिकं पठितम्। अत्र प्रदीपः, एकस्यैवाकारस्यानेकदेशेषूपलब्धिरादित्यस्यैव सम्भवतीति न तावद् व्यक्तिभेदः सिद्ध्यति। अन्यथा आदित्यस्याप्यनेकत्वापत्तिरनित्यत्वापत्तिश्चेति। अत्रानुमानाकारः - अनेकदेशेषूपलभ्यमानोऽकारादिः, एकः, प्रत्यभिज्ञायमानत्वहेतुकत्वात् - आदित्यवत्। आदित्यो हि अनेकदेशोपलभ्यमानः प्रत्यभिज्ञायते च अत एवैकः, तथाऽकारोपि।

---

१. स्फोटनिरूपणे

२. नवा०म० छाया०पृ० ९७

अविभुत्वे हि युगपन्नैको नानावगम्यते, इत्यादिश्लोकवार्तिकादिभिः यैर्यैर्हेतुभिः वर्णानां विभुत्वं साधितम्, तैर्हेतुभिः शब्दसामान्यस्य विभुत्वं साध्यमानमुपपद्यते एव।

ब्रह्मसिद्धिकारेण श्रीमण्डनमिश्रेणापि शब्दस्य ब्रह्मरूपत्वमुक्तम्–

ब्रह्मसिद्धौ हि अक्षरमिति प्रतीकमुपादायाह श्रीमण्डनः, अक्षरमिति शब्दात्मतामाह, विशेषेण सामान्यस्य लक्षणादिति ब्रह्मणो लक्षणप्रस्तावे अक्षरमिति यल्लक्षणं कृतं तस्यार्थः शब्दात्मकमिति विशेषलक्षणम्, अनेन विशेषलक्षणेन सामान्यस्य ब्रह्मणो लक्षणमिति मन्यते सः। ब्रह्म तु एकरूपमेव तथापि सत्यं ज्ञानमित्यादीनि विशेषलक्षणानि तदधिगमद्वारभूतानि तथैव इदमपि तस्य विशेषलक्षणमेवेति तदभिप्रायः। यथा सत्यत्वादिलक्षणेनासत्त्वादिसमारोपित-धर्माणां व्यावृत्तयस्तथैव शब्दात्मकमिति लक्षणेन च अशब्दस्य शब्दाविषयस्यासत्त्वादेर्व्यावृत्तिरिति लक्षणोपपत्तिः।

पुनश्च तत्रैव कथं तावच्छब्दात्मतेत्याशङ्का, परं चापरञ्च ब्रह्म यदोंकार इत्यादि श्रुतिभ्यः इत्यादिना समाहितम्। ततश्च ओङ्कार एवेदं सर्वमिति। अत्र सर्ववागनुगमने तदत्यागादोंकारो वाचस्तत्त्वमिति दर्शयित्वा वागरूपात्यागाच्च रूपप्रपञ्चस्येत्युक्त्या प्रपञ्चस्य वाग्रूपत्वप्रतिपादनेन विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत इति हरिकारिकोक्तार्थमेवायमनुगच्छति। पुनरपि च अथवा – वागेव विश्वाभुवनानि जज्ञे वागेवेदं बुभुजे वागुवाच – इत्यादौ वाचः सार्वात्म्यं श्रूयते। तथा वाक्सूत्रे वाचः सर्वात्मत्वं सर्वेशित्वं च प्रदर्शितम्, अहं रुद्रेभिश्चरामि – इति वाचैव, यथात्मनि प्रतिबुद्धेन वामदेवेन अहं मनुरभवं सूर्यश्चेति। अपि च प्रकृतिरूपान्विता विकाराः। वाग्रूपान्वितञ्च जगत्। अतो वाचो विवर्तः परिणामो वावसीयते इत्यादि प्रतिपादयता श्रीमण्डनेन। वाचः एव सर्वाधिष्ठानत्वं कारणत्वं पालकत्वञ्च कथयता बहुप्रपञ्चितम्। तदेतत्सर्वं वाचोऽनित्यत्वेऽनेकत्वेऽविभुत्वे च न सिद्ध्यति, ध्वनिरूपायास्तस्यास्तथात्वासम्भवात्। तस्मात् उपवर्णितं वाक्यत्वम्, शब्दब्रह्मैव स्फोटात्मकं तेन स्वीकृतमिति दिक्।

स्फोटशब्दस्य प्रयोगः –

अयं स्फोटशब्दः प्रथमतो भाष्यकृता पतञ्जलिना व्यवहृतः। हरदत्तः, अवङ्स्फोटायनस्येति सूत्रे स्फोटायनशब्दस्य व्याख्यां कुर्वाणः, स्फोटोऽयनं यस्येति विग्रहा स्फोटप्रतिपादनपरो वैयाकरण आचार्य इति कथयन् स्फोटचर्चां कृतवान्।

श्रीनागेशोऽपि स्वस्फोटवादग्रन्थे अलिखत् –

वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।
परिष्कृत्योक्तवान् तेन प्रीयतां जगदीश्वरः॥[1]

---

१. स्फोटवादान्ते

श्रीनागेशस्यात्राकूतम् –

तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचिद् एव बोधकतया तैर्ग्रहादित्युद्योतकृदुक्त्या पटादिध्वन्युपहितस्य चैतन्यस्यैव स्फोटपदेन व्यपदेशो दृश्यते।

लघुमञ्जूषाग्रन्थे शक्त्याश्रयः[१] क इति जिज्ञासुना मञ्जूषाकारेणोक्तम् – मध्यमायां यो नादांशस्तस्यैव वाचकत्वेनाक्षतिरिति। तत्र चिदचिन्मिश्रोंशो नादः, इत्युक्तत्वान्न कोऽपि विरोधः। अचिदंशस्योपाधिरूपतया, चिदंशस्यैव वास्तविकत्वात्। अनुपहितचित्तत्त्वस्यैव स्फोटरूपपराशब्देन व्यवहारः श्रीहरिणा कृतः –

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन, प्रक्रिया जगतो यतः॥

कारिकायामस्यां पूर्वार्द्धेन स्वरूपभूतायाः पराया एव वर्णनमुपक्रान्तम्। उत्तरार्द्धेन तु सोपाधिकस्य वर्णनम्। कालशक्त्युपहितस्यैव जगत्कारणत्वोपपत्तेः। सोऽयं स्फोटात्मा शब्दः, नित्यो विभुरेको वैयाकरणनये स्वीकृतः। अत्र च युक्तयः, प्रमाणानि प्रदर्शितानि। पुनरपि दार्ढ्याय किञ्चिदुच्यते–

स्फोटस्य विभुत्वमेकत्वं नित्यत्वञ्च–

पूर्वमीमांसायां वर्णस्फोटस्य साधनमुपलभ्यते। तथाहि – शब्दो नित्यः, सत्त्वे सत्यकारणत्वात्, व्योमवदित्यनुमानविधया शब्दस्य नित्यत्वमुक्तम्, ननु शब्दोपलब्धये, ताल्वादिव्यापाराणां हेतुत्वानुभवेनोक्तानुमानं बाधितमिति चेन्न, ताल्वादिव्यापाराणां नित्यस्यापि शब्दस्याभिव्यञ्जकत्वस्वीकारात्।

यदि च – ताल्वादिव्यापारः, शब्दकारणम्– तदनन्तरभावित्वात् – यद् यदनन्तरभावि तत्तज्जन्यमिति व्याप्तेः, कुलालव्यापारानन्तरभाविघटवदित्यनुमानमापाततः, शब्दस्य ताल्वादिव्यापारकारणकत्वं साधयितुं प्रवृत्तम्, तथापि, खननरूपव्यापारानन्तरभाविकूपोदकादौ व्याप्तेर्व्यभिचारात् नानुमानमिदं तत्साधयितुं क्षमते। तत्र खननं कूपोदकाभिव्यञ्जकमेव न तत्तज्जनकम्। एकत्वमपि सोऽयं गकारः, तदेवेदं पदम्, तदेवेदं वाक्यम्, इत्यादि प्रत्यभिज्ञावशात्सिद्धमेव। महाभाष्यकृतापि[२] अकारादीनामेकत्वनित्यत्वसाधनाय आदित्यवत्स्युरिति वार्तिकं पठितम्। अत्र प्रदीपः, एकस्यैवाकारस्यानेकदेशेषूपलब्धिरादित्यस्यैव सम्भवतीति न तावद् व्यक्तिभेदः सिद्ध्यति। अन्यथा आदित्यस्याप्यनेकत्वापत्तिरनित्यत्वापत्तिश्चेति। अत्रानुमानाकारः – अनेकदेशेषूपलभ्यमानोऽकारादिः, एकः, प्रत्यभिज्ञायमानत्वहेतुकत्वात् – आदित्यवत्। आदित्यो हि अनेकदेशोपलभ्यमानः प्रत्यभिज्ञायते च अत एवैकः, तथाऽकारोपि।

---

१. स्फोटनिरूपणे
२. नवा०म० छाया०पृ० ९७

अविभुत्वे हि युगपन्नैको नानावगम्यते, इत्यादिश्लोकवार्तिकादिभिः यैर्यैर्हेतुभिः वर्णानां विभुत्वं साधितम्, तैर्हेतुभिः शब्दसामान्यस्य विभुत्वं साध्यमानमुपपद्यते एव।

ब्रह्मसिद्धिकारेण श्रीमण्डनमिश्रेणापि शब्दस्य ब्रह्मरूपत्वमुक्तम्–

ब्रह्मसिद्धौ हि अक्षरमिति प्रतीकमुपादायाह श्रीमण्डनः, अक्षरमिति शब्दात्मतामाह, विशेषेण सामान्यस्य लक्षणादिति ब्रह्मणो लक्षणप्रस्तावे अक्षरमिति यल्लक्षणं कृतं तस्यार्थः शब्दात्मकमिति विशेषलक्षणम्, अनेन विशेषलक्षणेन सामान्यस्य ब्रह्मणो लक्षणमिति मन्यते सः। ब्रह्म तु एकरूपमेव तथापि सत्यं ज्ञानमित्यादीनि विशेषलक्षणानि तदधिगमद्वारभूतानि तथैव इदमपि तस्य विशेषलक्षणमेवेति तदभिप्रायः। यथा सत्यत्वादिलक्षणेनासत्त्वादिसमारोपित-धर्माणां व्यावृत्तयस्तथैव शब्दात्मकमिति लक्षणेन च अशब्दस्य शब्दाविषयस्यासत्त्वादेर्व्यावृत्तिरिति लक्षणोपपत्तिः।

पुनश्च तत्रैव कथं तावच्छब्दात्मतेत्याशङ्का, परं चापरञ्च ब्रह्म यदोंकार इत्यादि श्रुतिभ्यः इत्यादिना समाहितम्। ततश्च ओङ्कार एवेदं सर्वमिति। अत्र सर्ववागनुगमने तदत्यागादोंकारो वाचस्तत्त्वमिति दर्शयित्वा वागरूपात्यागाच्च रूपप्रपञ्चस्येत्युक्त्या प्रपञ्चस्य वाग्रूपत्वप्रतिपादनेन विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत इति हरिकारिकोक्तार्थमेवायमनुगच्छति। पुनरपि च अथवा - वागेव विश्वाभुवनानि जज्ञे वागेवेदं बुभुजे वागुवाच - इत्यादौ वाचः सार्वात्म्यं श्रूयते। तथा वाक्सूत्रे वाचः सर्वात्मत्वं सर्वेशित्वं च प्रदर्शितम्, अहं रुद्रेभिश्चरामि - इति वाचैव, यथात्मनि प्रतिबुद्धेन वामदेवेन अहं मनुरभवं सूर्यश्चेति। अपि च प्रकृतिरूपान्विता विकाराः। वाग्रूपान्वितञ्च जगत्। अतो वाचो विवर्तः परिणामो वावसीयते इत्यादि प्रतिपादयता श्रीमण्डनेन। वाचः एव सर्वाधिष्ठानत्वं कारणत्वं पालकत्वञ्च कथयता बहुप्रपञ्चितम्। तदेतत्सर्वं वाचोऽनित्यत्वेऽनेकत्वेऽविभुत्वे च न सिद्ध्यति, ध्वनिरूपायास्तस्यास्तथात्वासम्भवात्। तस्मात् उपवर्णितं वाक्यत्वम्, शब्दब्रह्मैव स्फोटात्मकं तेन स्वीकृतमिति दिक्।

स्फोटशब्दस्य प्रयोगः -

अयं स्फोटशब्दः प्रथमतो भाष्यकृता पतञ्जलिना व्यवहृतः। हरदत्तः, अवङ्स्फोटायनस्येति सूत्रे स्फोटायनशब्दस्य व्याख्यां कुर्वाणः, स्फोटोऽयनं यस्येति विग्रहा स्फोटप्रतिपादनपरो वैयाकरण आचार्य इति कथयन् स्फोटचर्चां कृतवान्।

श्रीनागेशोऽपि स्वस्फोटवादग्रन्थे अलिखत् -

वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।
परिष्कृत्योक्तवान् तेन प्रीयतां जगदीश्वरः॥[1]

१. स्फोटवादान्ते

अनेनेदं सिद्धं भवति यदयं स्फोटसिद्धान्तोऽतिप्राचीनः। तपरस्तकालस्येति[१] सूत्रे भाष्यकृता स्फोटशब्दो व्यवहृतः तत्र हि द्रुतादिवृत्तीनां शब्देऽसम्भवमुक्त्वा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते। वक्तैव कश्चिदाश्वभिधायी भवति आशुवर्णानभिधत्ते कश्चिच्चिरेण, कश्चिदचिरेण इत्यादिना तत्सम्भवमुपपादितवान्। तत्र सिद्धान्तरूपेणाह - एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः। एवञ्च द्रुतादिवृत्तीनां ध्वनौ सत्त्वमाश्रितम्। ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु परिलक्ष्यते। अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः इति श्लोकवार्तिकश्लोकं व्याचक्षाणः कैयट आह - ध्वनिः व्यञ्जकः स्फोटो व्यङ्ग्यश्च स्तः, तत्र शब्दानां व्यङ्ग्यानां स्फोटाख्यानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एव महान् अल्पश्च लक्ष्यते। व्यङ्ग्यस्तु अभिन्न एव। केषाञ्चित् अर्थात् व्यक्तानामुभयं गृह्यते, व्यक्ते शब्दे संस्कृतभाषाद्यात्मके व्यङ्ग्यो व्यञ्जकश्चोभयं गृह्यते अव्यक्तानां भेरीघातादिजन्यानां तु ध्वनिरेव गृह्यते इति। अत्र स्फोटः उभाभ्यामपि सम्मत इति प्रतीयते।

स्फोटशब्दमुल्लिखिता महाभाष्यकारेणोक्तम् ऐऔच् इति सूत्रे उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवतीति। अत्र व्याचक्षाणो नागेशो ब्रूते - वस्तुतः स्फोट एव श्रोत्रग्राह्यः श्रोत्रग्राह्यध्वनिव्यङ्ग्यत्वात्, वायुनिष्ठरत्वादिना तस्याभिव्यक्तिः। एवञ्च साक्षाद् रत्ववतोऽभावेन कल्पते, इत्यत्राप्यप्रवृत्याऽस्य वैयर्थ्यापत्तिः। एवञ्च रेफावभासिनः स्फोटस्य प्रसङ्गे लकारावभासः स्फोट इति।

तैत्तिरीयब्राह्मणेऽपि स्फोटस्य वाक्तत्त्वरूपेण चर्चा कृतास्ति-**वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वाः पशवो मनुष्याः, वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी॥**

शतपथब्राह्मणेऽपि यद् वै प्रजापतेः परमस्ति वागेव तत्, इत्यादिमन्त्रेण स्फोटतत्त्वस्य वाग्रूपेणोपवर्णनमस्ति।

चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवतीति महो देवो मर्त्यां आविवेश॥

इति मन्त्रेऽपि स्फोटस्यैव वृषभरूपेण प्रतिपादनमस्ति अस्य मन्त्रस्य व्याख्या महाभाष्ये पतञ्जलिना कृता। निरवयवस्यापि शब्दब्रह्मणः, औपाधिकं सावयवत्वं बोध्यम्, चत्वारि इत्यस्य परा पश्यन्ती मध्यमा वैखरीत्यर्थोऽपि श्रीनागेशेन कृतो वर्तते।

शक्त्याश्रयत्वविचारः-

शब्दश्रवणानन्तरं बोधो जायतेऽतः, बोधजनकत्वाश्रयतया कोऽसौ शब्द? इति जिज्ञासा स्वभावत उदेति। न च वर्णाः ध्वनिरूपाः प्रत्येकम्, तथा सति एकेनैव बोधोपपत्तौ द्वितीयादिवर्णो-

---

१. पा०सू० १/१/७०

च्चारणवैयर्थ्यापत्तेः। नापि संहताः समुदिताः वर्णाः, उच्चरितप्रध्वंसित्वेन यौगपद्यासम्भवेन समुदायसंघटनासम्भवात्।

अतो भाष्यकार आह – यावद् गकारे वाग् वर्तते न तावदौकारे यावदौकारे वाग् वर्तते न तावद् विसर्गे इति। एवं सति गौरिति समुदायाभावे कस्य शक्त्याश्रयता स्यादिति भावः। उच्चारितप्रध्वंसितत्वञ्च उच्चारणाधिकरणोत्तरकालवृत्तिध्वंसप्रतियोगित्वम्। एवञ्चायं पूर्वोऽयं पर इति प्रत्यक्षविषयेदं शब्दघटिताभिलापाभिलाप्यमानपौर्वापर्यज्ञानस्य इकोयणचीत्याद्युपयोगिनोऽसम्भवः। नष्टस्य प्रत्यक्षविषये दमा परामर्शायोगात्। न च पूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिः – यावद् गकारे वाक् वर्तते न तावदौकारे, इति येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्ने तस्मिन् वर्णे उपसंहृत्य तं यत्नमन्यं यत्नमुपादाय द्वितीयः प्रवर्तते इति परः सन्निकर्षः संहिता[1] इति भाष्ये उक्तत्वेन तथात्वस्यानौचित्यात्। न चोत्तरवर्णप्रत्यक्षकाले संस्कारवशादव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णवत्त्वं तदुत्तरवर्णे गृह्यते। एवं तदुत्तरवर्णप्रत्यक्षकाले संस्कारोपस्थितविशिष्टतत्तद् वर्णवत्वं तदुत्तरवर्णे गृह्यते इति समुदायज्ञानं सुलभमिति वाच्यम्, यद्वा पूर्वपूर्ववर्णजाः शब्दा जायमाना एव भवन्तीति न पदप्रत्यक्षानुपपत्तिरिति वाच्यम्, अद्येऽयं पूर्वोऽयं पर इत्यभिलापासम्भवात् नष्टविद्यमानयोः सम्बन्धिनोरव्यवहितोत्तरत्वस्य सम्बन्धताया वक्तुमशक्यत्वात्। एवं पदप्रत्यक्षोपपादनेऽपि पदस्याविद्यमानत्वेन तत्र वृत्त्याश्रयत्वानुपपत्तेश्च। अविद्यमानेऽपि आश्रयत्वस्वीकारे नष्टयोरपि जलघटयोः आश्रयतानिरूपकत्वस्याश्रयत्वस्य च त्वद्रीत्या बाधाभावात् तज्ज्ञानस्य प्रमात्वापत्तेः। किञ्च पदवाक्ययोरभावेन शब्दार्थसम्बन्धस्यैव हानिः। तदुक्तम्–

अशाब्दो यदि वाक्यार्थः, पदार्थोऽपि तथा भवेत्। इति।

किञ्चैकं पदमिति बुद्धेस्तदेवेदं कृष्णपदमिति बुद्धेश्चानुपपत्तिः। न च समानजातीयबुद्धिविषयत्वौपाधिकीति वाच्यम्, तज्जातीयमिदमिति व्यवहारस्यप्यापत्तेः। किञ्चैवमुच्चारणभेदादिभिन्नेषु शक्तिग्रहासम्भवः। व्यक्तिवाद इवानन्त्यव्यभिचारात्। आनुपूर्वी तु तत्तत्कालघटितत्वेनाव्यवहितोत्तरत्वाननुगमात् प्रत्युच्चारणं भिन्नेति तस्या अपि शक्ततावच्छेदकत्वे सैव दुरवस्था।

न च चरमवर्णज्ञानव्यङ्ग्यास्तत्तत्पदवृत्तयोऽनन्ता जातयः शक्ततावच्छेदकत्वेन कारणतावच्छेदकत्वेन च कल्प्यन्ते, इति न दोष इति वाच्यम्। अनन्तजातिकल्पने गौरवात्। उक्तरीत्या वृत्याश्रयत्वासम्भवाच्च। पदानामसत्त्वेन तत्र जातेरप्यसम्भवाच्च।

अत्र श्रीनागेशः[2]–

प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्रलयाल्लीनसर्वजगत्कामायाचेतने लीयते। लयश्चायमपुनर्भावफलको नात्यन्तिको नाशः। उत्तरसर्गानुपपत्तेः, नापि सर्वथाऽभानम्।

१. पा० सू० १/४/१०९
२. वै० लघुमञ्जूषा

प्रतिभासमात्रशरीरस्य मिथ्यावस्तुनोऽनवभासे तदभावस्यैवापत्तेः, किन्तु सुप्तैव तिष्ठति, कार्यप्रवृत्त्यभावात्। स्वप्रतिष्ठेश्वरप्रकाशस्यात्यन्तनिर्विकल्पकतया तद्बलाद् भासमानाप्यमात्रप्रायैव। ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ आविर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते। ततो विन्दुरूपमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्त्वम्। तस्य बिन्दोरचिदंशो बीजम् चिदचिन्मिश्रांशो नादः चिदंशो बिन्दुः। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्या उच्यते।

अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्था-विशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव रवपरादिशब्दैर्व्यवह्रियते-

बिन्दोस्तस्माद् भिद्यमानाद् रवोऽव्यक्तात्मकोऽभवत्।
स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते॥ इत्युक्तेः ।

एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनसंस्कारः तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठिततया निष्पन्दं परा वागित्युच्यते। तदुक्तं हरिणा - अनादि निधनमित्यादि।

तदेव नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्तं मनोविषयः पश्यन्तीत्युच्यते। एतद्द्वयं सूक्ष्मतरमीश्वराधिदैवं योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते।

ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्ततत्तदर्थविशेषतत्तच्छब्द-विशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्यापरश्रोत्रग्रहणायोग्यत्वेन मध्यमा वागुच्यते। स्वयं कर्णपिधाने सूक्ष्मवाय्वभिघातेन उपांशुप्रयोगे च श्रूयमाणा सा। सैव चास्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्तापरश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवत्या वैखरी वागुच्यते। तत्र मध्यमायां यो नादांशस्तस्यैव वाचकत्वेनाक्षतिः। स एव च शक्त्याश्रयः स्फोटः। स च यद्यप्येकोऽखण्डश्च। एकैकवर्णेनाप्यभिव्यज्यते तथाप्यन्तवर्णा-भिव्यक्तो बोधहेतुः। अतो नैकवर्णजाभिव्यक्त्युत्तरमर्थप्रत्ययः। तत्र च व्यञ्जकरूपप्रतिबिम्बनात् तद्रूपरुपितैवाभिव्यक्तिरित्येकोऽपि नानात्वमिवापन्नः यथा जलचाञ्चल्येन प्रतिबिम्बस्य चञ्चलत्वेन ग्रहणम्। तस्योपाधिभिन्नव्यञ्जकाभावान्न कदाचिद् वर्णराहित्येन प्रत्यक्षम्। स्फोटग्रहणप्रकारश्चेत्थं बोध्यं परः संनिकर्षः संहितासूत्रे भाष्ये उच्चारितप्रध्वंसिनां सन्निकर्षः पौर्वापर्यञ्चानुपपन्न-मित्याशङ्क्य-बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यमित्युक्तम्-अयमभिप्रायः-बुद्धिविषयमेवं पौर्वापर्यं शब्दानाम्। स एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः। अस्मिंश्च शब्दोऽयं तावद् वर्णस्ततोऽयं ततोऽयमिति तन्वन्नीतिः सकलविषयव्यापिबुद्धिः धीरः पण्डितः कर्ता बुद्धौ अन्तःकरणे चेष्टाः कण्ठताल्वाद्यभिघातव्यापारजन्यशब्दान् प्रतिबिम्बितान् कृत्वा शब्देन संहितान् तद्वाच्यानर्थान् बुद्धिरूपे देशे तत्रैव पौर्वापर्यव्यवहारं कुर्यादित्यर्थः। अत्र चाभिव्यक्तिः स्थिरैवेति अयं पूर्व इत्यादिव्यवहाराद्युपपत्तिः।

अत्रायं निष्कर्षः -

चतस्रो वाचः व्याकरणशास्त्रे स्वीक्रियन्ते, परा पश्यन्ती, मध्यमा वैखरीभेदात्। सर्वप्राणिनां मूलाधारस्था तत्रत्यसंस्कृतपवनेनाभिव्यज्यमाना स्पन्दशून्या शब्दब्रह्मरूपा अनादिनिधना या वाक् सैव परा। परत्वादुत्कृष्टत्वात्परापश्यन्त्यादिभ्यो वा परत्वेन परेत्यभिधीयते। इयञ्चानुपहितचित्स्वरूपा। स्वरूपज्योतिरेवान्तः परावागनपायिनीति स्मृतेः।

दृश्यते सविकल्पकसमाधिना योगिभिः, पश्यति वा स्वात्मनि सर्वं जगद् या सा पश्यन्ती। तस्याः पराया एव पश्यन्तीरूपेणावतारणं पश्यन्ती। तदुक्तम्-ततो नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यज्यमाना मनोगोचरीभूता वाक् पश्यन्तीत्युच्यते।

मध्ये मा यस्याः सा, पश्यन्ती वैखरीमध्यगतत्वाद्वा-मध्यमा। हृदयदेशपर्यन्तमागच्छता प्रयत्नप्रेरितेन वायुना अभिव्यज्यमाना तत्तदर्थवाचकस्फोटाभिव्यञ्जिका स्वमात्रश्रव्या परश्रोत्रेण अग्राह्या जपादौ बुद्धिनिर्ग्राह्या या वाक् सा मध्यमेति कथ्यते। ततश्च मुखपर्यन्तमारोहता तेन वायुना मूर्धानमाहत्य परावृत्त्य च तत्तत्स्थानेष्वभिव्यज्यमाना परश्रोत्रेणापि ग्रहणयोग्या या वाग् सा वैखरी-इत्यभिधीयते विशिष्टः स्वरः, श्रवणकटुः तस्येयं वैखरी, वैखरीमादायैव महाभाष्ये-अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युक्तम्। अयं शब्दः स्फोटस्य व्यञ्जक इत्यवधेयम् लोकशास्त्रमर्यादाभिरक्षको महाभाष्यकारो लोके प्रसिद्धं शब्दमादायेमं पक्षमुपस्थापयन् व्याकरणस्य प्रक्रियापक्षं पुपोष।

शब्दविषये विशिष्टो विचारः-

उक्तरीत्या परादिभेदेन शब्दतत्त्वस्य चातुर्विध्यमुक्तम्। प्रकारान्तरेणापि तद्भेदो निरूप्यते। शब्दः त्रिप्रकारकः, इत्यपि कथयितुं शक्यते। अनुपहितः शब्दः परापदाभिधेयः एकः। ध्वन्युपहितः स्फोटपदाभिधेयो द्वितीयः। अस्य ततो भेदमाह - श्रीनागेशः येनोच्चारितेनेत्यादि व्याख्यां कुर्वन् ध्वनिपदेनात्र वैखरी, स्फोटपदेनाभिव्यक्तकत्वादिको मध्यमावस्थाः आन्तरः शब्द उच्यते - इति। ध्वनिरूपस्तृतीयः तत्र प्रथमः, अनादिनिधनलक्षणः शब्दब्रह्म, नित्यो निरवधिः। द्वितीयस्तु सावधिर्नित्य इति हेतोः नित्य एव। परादिवाणीनां स्थानानि यथा -

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठदेशगा।। इति।

तृतीयस्तु नितरामनित्यः। तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपः। तत्र मूलभूतपराख्यवाणी-दृष्ट्या तद्विवर्तभूतत्वात्, स्फोटस्य चिद्रूपविशेष्यांशदृष्ट्या वा नित्यत्वव्यवहारः।

श्रीमता नागेशेन परावाचोऽपि यावत्सृष्टिस्थायित्वरूपं नित्यत्वं व्यावहारिकनित्यत्वं वा अङ्गीकृतम् न तु त्रिकालाबाध्यत्वरूपम्। तत्तु पश्यन्त्यादिविषयकमेव मन्तव्यम्। पराया वाचस्तु अनादिनिधनतयैव परामर्शः कृतो भर्तृहरिप्रभृतिभिः[१]। यद्यपि भर्तृहरिणा वाक्यपदीये

१. वा०प०ब्र०का० का० १

पराशब्देनास्याः परायाः वाचः सङ्केतो न कुत्रापि कृतः, तथापि – अत्रातीतविपर्यासः केवलामनुपश्यतीत्यत्र केवलाशब्देन[१] सङ्केतकृत एवेति ध्येयम्। केचित्तु –

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदमिति।।[२]

कारिकायाः व्याख्यान्तरं कृत्वा परायाः श्रीहरिसम्मतत्वं प्रतिपादयन्ति तथाहि वैखर्य्या मध्यमायाः पश्यन्त्याश्चानेकतीर्थभेदायास्त्रय्याः वैखर्यादित्रितयस्वरूपायाः परम्-भिन्नम् एतद् यत् पदं सर्वाधिष्ठानं पराख्यं तदद्भुतम् विकल्पातीतं वर्तते इति व्याख्यानेन परायाः प्रतिपादनं क्रियते। शब्दस्य विषये मतत्रयम् –

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः।।[३]

इति वदन् श्रीहरिः शब्दविषये मतत्रयं बोधितवान्।

कैश्चिद् वायोः, कैश्चिदणूनां, कैश्चिद् ज्ञानस्य शब्दत्वापत्तिः शब्दाकारः, परिणाम इष्यते। हि यतः प्रवादेषु सिद्धान्तेषु दर्शनभेदः दृष्टिभेदः अनवस्थितः। शब्दोपादानकारणमिदमेवेति निर्धारयितुं न शक्यते। वायोः शब्दत्वापत्तिमाह –

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते।।
तस्य कारणसामर्थ्याद् वेगप्रचयधर्मिणः।
सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः।।

अयमर्थः – वक्तुरिच्छानुवर्तिना विवक्षाजन्येन प्रयत्नेन लब्धक्रियः प्रेरितो वायुरेकघनमूर्ध्वमाक्रमन् स्थानेषु उरःकण्ठताल्वादिष्वभिहितोऽभिघाताख्यसंयोगस्वभावात् शब्दत्वं प्रतिपद्यते। शब्दाकारतया वायुरेव परिणमति। यथा मेघस्थमुदकं प्रतिकूलवातसहकृतेन तादृशेनोदकान्तरेणाभिहतं विद्युद्रूपतया विपरिणमते।

अद्भ्योऽग्निर्ब्रह्मणः क्षत्रं भस्मनो लोहमुत्थितम्।
तेषां सर्वत्रगं तेजः स्वाप्सु योनिषु शाम्यति।।

अग्निपुराणेऽपि –

यदान्तरिक्षे बलवान् मारुतो मरुता हतः।
जायते तत्र निर्घोषो बलवान् वायुसंभवः।। इति।

१. वा०प०का० १/९७
२. क०प०का० १/१४२
३. वा०का० १/१०७

प्रक्रियामाह – तस्य कारणसामर्थ्यात् प्रयत्नविशेषात् वेगेन घनीभावेन च ताल्वादिस्थानेषु सन्निपातात् सम्यगभिधानात् कठिना मूर्तयो विभज्यन्ते। पाषाणसन्निपातेन लोष्टवद् विशीर्यन्ते इति वायोः शब्दत्वेन परिणामोपपत्तिः।

अयं परिणामात्मकः शब्दो वैखरीरूप एव। परिणामस्य नित्यस्फोटत्वासंभवात्।

महर्षिकात्यायनः, वायुः खादिति वदन् यजुः प्रातिशाख्यमतमुपस्थापयंश्च वैखरीशब्दं वायुपरिणामं मन्यते। वायुः शब्दस्य कारणम् – स च आकाशान्निमित्ताद्भवतीति तदर्थः। नन्वनेन वायोः शब्दं प्रति निमित्तकारणत्वमेवास्तु न तूपादानमित्यतः द्वितीयसूत्रमाह – शब्दस्तदिति। शब्दः तत् तदात्मको वाय्वात्मकः इत्यर्थः। ननु वायोः परिणामत्वे शब्दस्य सदोपलब्धिः स्यादतस्तृतीयं सूत्रमाह – संकरोपेति इति – हृदि सम्यक्करणैरुपचितो वायुः शङ्खादिभिः शब्दीभवतीति तस्यार्थः। अत्र वायुः शब्दीभवतीत्युक्त्या शब्दस्य वायुपरिणामता सिद्धा। ततोऽग्रे शब्दरूपेण यथा परिणामस्तथोपपादितम्[१]।

जैनमतसम्मतः परमाणुपरिणामः शब्दः। अणूनां शब्दत्वापत्तिमाह–

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमश्शब्दभावेन परिणामिनः॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः॥

जैनमते पुद्गलपदेन परमाणूनां सङ्केतो लभ्यते। ते हि परमाणवः चतुर्विधाः। पार्थिवाः आप्याः तैजसाः वायवीयाश्च। एत एव शब्दतन्मात्रादिशब्दैः दर्शनेषूपलभ्यन्ते। एते च परस्परं व्यावृत्तस्वभावाः। एते च सम्मिल्यकारिणः नानाशक्तयश्च। परमाणवः परस्परं विभागसंयोगद्वारा छायातपतमः शब्दरूपतया विपरिणमन्ते। यदा अदृष्टादिविशेषान्निमित्तात्संयुज्यन्ते तदा परिणमन्ते तदा तु विभज्यन्ते तदा परमाणुतया अवतिष्ठन्ते। तत्र नीलपरमाणवः छायातमोभावेन शुक्लरूपपरमाणवः आतपतया शब्दपरमाणवस्तु शब्दरूपतया परिणमन्ति। अयमर्थः – शब्दाख्याः परमाणवः शब्दत्वापत्तियुक्ताः अदृष्टसहकृतप्रयत्नप्रेरितवायुना संह्रियमाणा एव शब्दरूपतां प्रतिपद्यन्त इति संक्षेपेणाणूनां शब्दत्वापत्तिः सूचिता।

ज्ञानस्य परिणामः शब्दः –

ज्ञानस्य परिणामविशेष इति तृतीयः पक्षो वाक्यपदीयेऽभिहितः तस्योपपत्तेय – अथायमान्तरो ज्ञाता सूक्ष्मवागात्मनि स्थितः, इत्यादि चतस्रः कारिका वाक्यपदीये उक्ताः, अयमर्थः – स सूक्ष्मवागात्मना स्थित आन्तरो ज्ञाता[२] तेजसा शारीरान्तः स्थितेनोष्मणा पाकमागतः,

---

१. शु०यजु०प्रति० १/६–९
२. ज्ञानमिति क्वचित् पाठः

अत्र पाको नाम मनोरूपतामापन्नस्य ज्ञातुर्विषयग्रहणसामर्थ्यव्यापकः, कश्चनातिशयः। तं प्राप्तः मनोभावमापाद्य मनो हि विषयपरिच्छेदयोग्येन स्थूलेन स्वरूपेण व्यवतिष्ठते प्रकाशरूपत्वात्। स एष सूक्ष्मवागात्मना स्थितस्य आन्तरस्य ज्ञातुस्तेजसा पाकेन मनोभावस्तं मनोभावमागतः विवक्षाजनितेन स्वनिष्ठप्रयत्नेन समीरितः प्राणवायुमाविशति, प्राणाख्यो वायुः समीदीर्यते। विवक्षाजनितेन प्रयत्नेन स्वान्तः प्रविष्टमनोनिष्ठेन सम्यग् ऊर्ध्वं प्रेर्यते। मनोविषयपरिच्छेद-योग्यस्याश्रयतां गतो वायुः तद्धर्मेण समाविष्टस्तेजसा साधनेन शब्दरूपतया परिणमति।

एतेषु मतेषु ज्ञानपरिणामवादो महाभाष्यकृत्सम्मतः। स हि वैखरीध्वनिरूपं ज्ञानस्य परिणामं स्वीकृतवान्। तथाहि - आख्यातोपयोगे - इति सूत्रप्रत्याख्यानाय अयमपि योगः शक्योवक्तुम् कथमुपाध्यायादधीत इति - अपक्रामति तस्मात्तदध्ययनम्। यदप्रक्रामति किं नात्यन्तायापक्रामति सन्ततत्वात् अथवा ज्योतिर्वज्ज्ञानानि भवन्ति। भाष्यम् -

तद्व्याख्यां कुर्वन् प्रदीपकारः ज्ञानस्य शब्दरूपतापत्तिरिति दर्शनमत्र भाष्यकारस्येति शब्दो ज्ञानपरिणाम इति प्रतिपादितवान्।

स्फोटभेदाः-

यद्यपि स स्फोटोऽखण्ड एको वाक्यात्मकः मुख्यः तथा चोक्तम् - तत्र वाक्यस्फोटो मुख्यः। लोके तस्यैवार्थबोधकत्वात्, तेनैवार्थसमाप्तेश्चेति[१]। व्यवहाराय ज्ञानाय च शब्दप्रयोगस्य च निमित्ततेति प्रयुक्तवाक्यार्थज्ञानस्यानिवार्यता। तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययविभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कल्पयन्ति स्माचार्याः। विभाषा सुपः इति सूत्रे भाष्ये कैयटः, अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्तापरिकल्पना-दित्याह।

तत्तदर्थबोधनेन समुदायस्य समुदायार्थस्य च बोधने तात्पर्यमृषीणाम्। तत्तदर्थकल्पने अन्वयव्यतिरेकौ चेत्थं बोध्यौ।

पचतीत्यत्र तिबुच्चारणे कर्त्रर्थबोधस्तदनुच्चारणे तद्बोधाभावः, इति तिपः कर्तृरूपोऽर्थः, निश्चीयते। नन्वत्र व्यतिरेकव्यभिचारोऽपि, तथाहि पाचक इत्यादौ तिबुच्चारणाभावेऽपि अकेन कर्तृबोधत्वात् कारणाभावेऽपि कार्योदयेन व्यतिरेकव्यभिचारसत्त्वेन कथं तिपः कर्त्रर्थकत्वमिति, चेदत्रेत्थं बोध्यम् - यत्र कार्यमेकविधम् - कारणमनेकविधं तत्र परस्परबोधे व्यभिचारवारणाय कार्यतावच्छेदककुक्षौ अव्यवहितोत्तरत्वं निवेश्यते। तथा च तिबुच्चारणाव्यवहितोत्तरजायमानं कर्तृबोधं प्रति तिबुच्चारणं कारणमिति विशिष्य कार्यकारणभावे नास्त्येव व्यभिचार इति चिन्तनीयम्।

---

१. वै०ल० प्रारम्भे

तथा चैकस्यैवाखण्डस्य सखण्डत्वपरिकल्पनया स स्फोटो विभिद्यते शास्त्रप्रामाण्याच्चैक्येन प्रमीयतेऽपि। अर्थवत्सूत्रे स्वरूपमिति सूत्रे तपरस्तत्कालस्येति सूत्रे च भाष्ये प्रदीपादौ च सभेदः स्फोटवादः समीक्षणीयः। एतेषां सभेदत्वपक्षे एव सार्थक्यात्।

स च स्फोटः अष्टविधः - (१) वर्णस्फोटः, (२) पदस्फोटः, (३) वाक्यस्फोटः, (४) वर्णजातिस्फोटः, (५) पदजातिस्फोटः, (६) वाक्यजातिस्फोटः, (७) अखण्डपदस्फोटः, (८) अखण्डवाक्यस्फोटश्च। वर्णस्फोटस्य सखण्डाखण्डभेदेन द्वैविध्यन्तु न, वर्णस्य निरवयवत्वात्। ननु वर्णस्फोटपदेनात्र शास्त्रे प्रकृतिप्रत्ययस्फोटौ अभिधीयेते, तथा चोक्तं प्रारम्भे मञ्जूषायां - प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थ इति। तथा सति कथं निरवयवत्वमिति चेन्न अवयवप्रतीतेर्भ्रमत्वात्।

(१) तथा च वर्णपदबोध्यप्रकृति-प्रत्ययचरमवर्णाभिव्यक्तस्फोटेन यत्र बोधस्तत्रैव वर्णस्फोटपदव्यवहार्यत्वम्। (२) एवं सुबन्ततिङन्ततदादिघटकान्त्यवर्णाभिव्यक्तस्फोटे-नार्थप्रतीतिर्यत्र तत्र पदस्फोटः। (३) सुबन्ततिङन्तपदजन्यबोधपूर्वकवाक्यचरमवर्णाभिव्यक्त-स्फोटस्य बोधकत्वे वाक्यस्फोट इति व्यवहारः। (४) प्रकृतिप्रत्ययजन्यबोधाभावे पदात्मकसमुदायेन बोधेऽखण्डपदस्फोट इति यथा मणिनूपुरादि वः नः इति। (५) पदजन्यबोधाभावे सति वाक्येन बोधे अखण्डवाक्यस्फोटः। यथा व्याकरणप्रक्रियाज्ञानशून्यानां वाक्यतो बोधे वाक्यम्। वर्णपदवाक्यजातिव्यङ्ग्यस्फोटैर्बोधे क्रमशः। (६) वर्णजातिस्फोटः। (७) पदजातिस्फोटः। (८) वाक्यजातिस्फोटः इत्युच्यते।

प्रकारान्तरेणापि संख्याभेदः -

तथाहि - किञ्चिद्वर्णव्यत्यासादिना शक्ततावच्छेदकानुपूर्वीभङ्गस्य प्रतिपदमौत्सर्गिकतया तत्र च केनचित्क्वचित्प्रथमं शक्तिग्रहात्मकेन कस्य स्मरणमित्यत्र प्रमाणाभावात् - ऋषभो वृषभो वृष इत्यादिवत् कर् कार् कुर् इत्यादीनां प्रयोगसमवायिनां सर्वेषामेवं वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां वाचकतेति वर्णस्फोटपक्षः। यदा रामम् रामेण हरिम् इत्यादौ सिद्धे रूपे कि यानंशो द्रव्यवाचकः क्रियानंशः कर्मत्वादेरित्यस्य निश्चेतुमशक्यतया राममित्यादि पदमेव वाचकं द्रव्यनिष्ठकर्मत्वादेस्तदा पदस्फोटपक्षः। एवमेव हरेऽव विष्णोऽव दधीदमित्यादौ विशिष्टार्थे शक्तं वाक्यं तदा वाक्यस्फोटपक्ष आयाति, एकं पदं वाक्यं वेति प्रतीत्या अखण्डः पदस्फोटः, अखण्डवाक्यस्फोटश्च स्वीकार्य एव।

स्फोटजातिवादिमतन्त्वित्थमस्ति - घोत्तरटत्वादिकमाद्यपक्षत्रयेऽपि शक्ततावच्छेदकतया वाच्यम्, तच्चोपाधिरूपम्। स च जातिरूप एव। सा च जातिः ब्रह्मरूपा तथा च शक्यांश इव शक्तांशेपि - न्यायसाम्येनाकृत्यधिकरणन्यायेन वा जातिरूपं सर्वाधिष्ठानब्रह्मरूपमेवेति तत्तदुपहितं वाच्यं वाचकञ्च। अविद्या आविद्यकधर्मो वा जातिरिति पक्षे तु सैव वाचिका तथोक्तं -

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्।।

उक्तेषु अष्टविधेषु प्रमाणानि–

प्रथमतस्तु वर्णस्फोटः समीक्ष्यते–शास्त्रीयप्रक्रियानिर्वाहाय कल्पितोऽयं स्फोटः। पदेषु कल्पितानां प्रकृतिंप्रत्ययानामर्था अपि कल्पिता एव। तथा च कल्पितप्रकृतिप्रत्ययार्थवाचकाः, प्रकृतयः प्रत्ययश्च वर्णस्फोटपदेनोच्यन्ते। अत एव भूवादयो धातव इति सूत्रं धातुमात्रस्य क्रियावाचकत्वेन धातुसंज्ञां विदधच्चरितार्थम्। अत्रैव सूत्रे भाष्ये भाववचनो धातुरिति वदन् भाष्यकारोपि वर्णस्फोटमभिप्रैति। एतदेवाह–बृहद्वैयाकरणभूषणे–

साधुशब्दान्तर्गता हि बोधका न तु तत्स्मृता। इति।

व्यवहारात् आदेशानामेव बोधकत्वं व्यवस्थापयन् वर्णस्फोटं प्रस्तुतवान्, बृहद्वैयाकरणभूषणकारः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या बोधकस्य स्फोटत्वाच्च। स्फोटः वाचक इत्यनयोः पर्यायत्वात्। पदस्फोटवाक्यस्फोटौ च सर्वे सर्वपदादेशा इति भाष्योक्त्या[१] येनोच्चारितेनेत्यादि भाष्यप्रतीकमादाय वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति इति प्रदीपकारोक्त्या च स्पष्टतया उक्तौ, वैयाकरणभूषणेऽपि –

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्फुटा।
वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते[२]।।

यथा वः, नः इत्यादौ पदेनैव बोधः, तद्वत् घटेनेति समुदायात्मकशब्देन प्रकृतिप्रत्ययभेदग्रहं विनैव लोकानां बोधाच्च पदस्फोटः सिद्धः। वाक्यस्फोटं साधयन्नाह –

हरेऽवेत्यादिदृष्ट्या च वाक्यस्फोटं विनिश्चिनु॥ इति।

अत्र पदयोः स्पष्टमज्ञानेऽपि समुदायव्युत्पत्या बोधादावश्यकी शक्तिरिति वाक्यस्फोटः सिद्धः।

अत्रान्विताभिधानवादिनः – वाचकत्वस्यैव स्फोटलक्षणेन वाक्यवाचकत्वास्वीकारेण न वाक्यस्फोटो न्याय्यः। तथाहि – सर्वेषां पदानां व्यवहारादिना शक्तिग्रहो जायते। शक्तिग्रहश्च अन्वयविशिष्टे एव जायमानः, तद्वशात् सामान्यान्वयग्रहेऽपि पदसमभिव्याहाररूपाकाङ्क्षावशात् विशिष्टसंसर्गान्वयोपपत्तौ वाक्यशक्तिकल्पनमयुक्तमित्यसिद्धो वाक्यस्फोट इति।

तन्न मनोरमम् – समभिव्याहारस्य बोधविशेषम्प्रति हेतुत्वस्वीकारे तद्धेतुन्यायेन समभिव्याहारात्मकवाक्यस्यैव वाचकत्वस्वीकारपक्षस्यौचित्यात्। अर्थबोधनाय वाक्यस्यैवोपादानात्, वाक्यशक्तिस्वीकाराभावे समासग्रहणकृतनियमस्वीकारानुपपत्तेश्च। तस्माद् वाक्यस्य वाचकत्वेन वाक्यस्फोटः स्वीकार्य एवेति ध्येयम्।

१. म०भा० ७/१/२७
२. वृ०वै०भू०स्फो०का० ६३-६४

अभिहितान्वयवादिनो हि पदैः पदार्थानामभिहितानाम् आकाङ्क्षादिसहकारेण वाक्यार्थे लक्षणां स्वीकुर्वन्ति। एषामपि वाक्यस्फोटो नाभिमतः। तथा चोक्तम् -

कर्तृकर्मक्रियाणां तु पूर्तौ कोऽन्योऽन्वयो भवेत्।
अपूर्तिश्चेत् पदैरुक्तैः किं नृशृङ्गेण पूर्यते।। इति।

कर्तृकर्मक्रियाणां पूर्तिस्तु तत्तत्पदैरेव क्रियते - ततश्च विशिष्टबोधे नृश्रृङ्गतुल्येन स्फोटेन निरर्थकेन किं भवेत् प्रयोजनाभावादिति स्फोटखण्डनपरं व्याख्यानमित्यादि- रूपेण वाक्यस्फोटास्वीकारे बहुचर्चितं तत्र।

अत्रोच्यते - वाक्यं वाचकमिति व्यवहारात् घटादिपदादाकाशादिबोधवारणाय शाब्दबोधं प्रति वृत्तिज्ञानजन्योपस्थितेः कारणत्वस्वीकारस्यावश्यकत्वेन वाक्यार्थसंसर्गविषयकबोधं प्रति वाक्यनिष्ठशक्तिज्ञानोपस्थितेः कारणत्वाय वाक्यवृत्तिकल्पनस्यावश्यकत्वात्स्फोटसिद्धेः। न च लक्षणया वाक्यार्थबोधोपपत्तिः शक्तिं विहाय लक्षणाश्रयणे गौरवात् - तथा चोक्तम् -

अशाब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्।
एवं सति च सम्बन्धः शब्दस्यार्थेन हीयते।। इति।

वाक्ये शक्त्यनभ्युपगमे समासग्रहणकृतनियमभङ्गापत्तेश्च। तथा च पदशक्तिवत् वाक्यशक्तिः स्वीकार्या एवेति सिद्धो वाक्यस्फोटः।

यदा हि प्रकृतिप्रत्ययपदादिविभागं न्यक्कृत्य पदात्मकस्य समुदायस्य, वाक्यात्मक- समुदायस्याखण्डस्य च बोधकत्वमभ्युपेयते - तदा अखण्डस्फोटपक्षः। तदाह -

पदे वर्णा न विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।। इति।

पदे पचतीत्यादौ न वर्णाः, दृष्टान्तेनोपपादयति - वर्णेष्ववयवा नेति। तथा पदेषु, प्रकृत्यादिभेदो नास्तीत्यभिप्रायः। वाक्येऽपि तथा त्वमाह वाक्यादिति। अत्यन्तं विवेको भेदो नास्ति। अखण्डमेवं वाक्यम्। अनन्तवर्णकल्पनायां गौरवात्। न च तत्र ककारादिप्रतीत्यनुपपत्तिः, तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगविशेषाभिव्यक्ताखण्डस्फोटपदार्थस्यैव व्यञ्जकनिष्ठकत्वादिना प्रतीत्युपपत्तेः।

तथा च वैयाकरणमते - अखण्ड एकः स्फोटः स्वीक्रियते तद्व्यञ्जकाश्च वर्णाः। प्रतीतिवैलक्षण्यमपि ध्वनिकृतमेव। तदुक्तं वाक्यपदीये -

यथा मणिकृपाणादौ रूपमेकमनेकधा।
तथैव ध्वनिषु स्फोट एक एव विभिद्यते।। इति।

वस्तुतस्तु भेदानां परामर्शे क्रियमाणे द्वात्रिंशत्संख्याकाः स्फोटाः प्रतीयन्ते - तथाहि प्रकृतिप्रत्ययस्फोटौ एकवर्णरूपौ द्वौ, अनेकवर्णघटितरूपौ पचनीयमित्यादौ प्रतीयमानौ द्विविधौ.

एतौ च सखण्डाखण्डरूपौ द्विविधाविति चतुर्विधौ। एवं व्यक्तिपक्षे मिलिताः षड्विधाः। जातिपक्षे पुनश्चत्वार एव। पदवाक्यस्फोटौ व्यक्तिपक्षे चतुर्विधौ, जातिपक्षे च द्विविधावेव। एवं च व्यक्तिपक्षे सङ्कलनया दशसंख्याका इमे जाताः। जातिपक्षे च षट् सङ्कलनया षोडश आन्तरबाह्यभेदाभ्यां द्वात्रिंशत्संख्याकाः स्फोटाः भवन्तीति समीक्षितव्यम्। लघुमञ्जूषायाम्[१] यद्यप्यान्तरस्यैव सत्ता सूचिता तथापि घटादिपदार्थाः यथा बाह्यत्वेन प्रसिद्धास्तथैव बाह्यस्फोटस्वीकारोऽपि कार्यः। बाह्यसत्ता औपचारिकीति तु अन्यद्। एवञ्च भूषणे अष्टौ स्फोटा इति कथनम्[२]। व्याकरणदर्शनभूमिकायां षोडश स्फोटा इत्यादिकथनन्तु न संख्यावधारणम्, अपि तूपलक्षणपरमिति बोध्यम्।

एतेषु स्फोटेषु वाक्यस्फोटस्य मुख्यत्वम्। स्वं रूपमिति सूत्रयता पाणिनिना वाक्यस्फोटस्य सङ्केतः कृतः। शब्दः अर्थविशिष्टशब्दस्य बोधक इति सूत्रार्थः। तेन च शब्दस्य अर्थबोधकत्व-रूपस्फोटत्वसिद्धौ वाक्यस्फोटः सम्मतोऽस्य मन्तव्यः। नन्वेतावता वर्णोऽपि शब्दः, पदमपि शब्द एवेति वर्णपदयोरेव स्वीकारः स्यात्, न वाक्यस्फोटस्येति कथं समीहितसिद्धिरिति चेन्न वचोऽशब्दसंज्ञायामित्यनेन शब्दरूपेऽर्थे वाक्यशब्दं कृत्वघटितं व्युत्पादयति सूत्रकारः। तेन वाक्यस्यैव मुख्यं शब्दत्वं पदस्य वर्णस्य चारोपितम्, तदिति स्पष्टं संसूच्यते।

वाक्यलक्षणम् -

लघुमञ्जूषायां वाक्यलक्षणमाह - पदसमूहो वाक्यम् अर्थसमाप्तौ। समर्थामिति शेष इति, तेन निराकाङ्क्षप्रतिपत्तिजनकत्वे सति पदसमूहत्वं वाक्यत्वमिति। निराकाङ्क्षत्वे सतीत्युक्त्या निरर्थके नातिव्याप्तिः।

सुप्तिङन्तचयो वाक्यमित्यपि वाक्यलक्षणम्। अन्तशब्दस्योभयत्राप्यन्वयः। चयशब्दस्तथैव। तथा च सुबन्ततिङन्तचयः, रामो भवति। सुबन्तचयो वाक्यम् - रामेण शयितव्यमिति तिङन्तचयो वाक्यम्, पचति भवतीति वा वेदर्थे क्रिया चेत्कारकान्विता। तथा सति निरर्थकव्याकृतिः। आख्यातं[३] सविशेषणं वाक्यमित्यपि वाक्यलक्षणम्। आख्यातपदेन क्रियाप्रधानमुच्यते। तेन त्वया शयितव्यमित्यस्य आख्यातरहितत्वेपि वाक्यत्वम्। सविशेषणमित्यस्य साक्षात्परम्परया वा यद् विशेषणम्-तत्सहितमित्यर्थः। तेन नद्यास्तीरे यत्तत्र तिष्ठतीत्यर्थस्य नाद्यस्तिष्ठतीत्यस्यापि वाक्यत्वम्। तथा चैकोद्देश्यकैकविधेयकत्वरूपैकार्थत्वगर्भमेक-वाक्यत्वलक्षणं ज्ञेयम्। वार्तिककृता तु एकतिङ्वाक्यमित्युक्तम्, तच्च पचति भवतीत्यादावव्याप्तम्, तिङन्तद्वयसत्त्वात्। अतः एकतिङर्थनिष्ठमुख्यविशेष्यकबोधजनकत्वमेकवाक्यमिति तदर्थो वाच्यः तथा च तिङ्द्वय- सत्वेऽप्येकवाक्यत्वम्। यत्र तिङ् नास्ति तत्र क्रियाध्याहारेण वाक्यत्वं बोध्यम्।

---

१. ल०म० स्फोटनिरू०

२. भू०सा० स्फोटनिरू०

३. म०भा० २/१/१

स्फोटतत्त्वस्य द्रव्यत्वादिचिन्तनम् -

स स्फोटः, द्रव्यरूपः, गुणरूपो वेति सन्देहे, मतभेदेनोच्यते। शास्त्रेषु द्रव्यत्वं गुणत्वं च स्वीकृतम्। तथाहि - अतत्स्थैश्च गुणैः समासो वाच्य इति[१] वार्तिके नदीघोषः, पटहशब्दः। इत्युदाहरणं दत्तवता भाष्यकारेण शब्दस्य गुणत्वं स्वीकृतमेव। आकाशदेशः शब्द इत्युक्त्या आकाशगुणतया प्रतिपादनेनापि गुणत्वमेव।

मञ्जूषाकारेण तु तारत्वादिगुणाश्रयत्वेन शब्दस्य द्रव्यत्वमुक्तम्। आकाशरूपद्रव्याश्रिततया गुणत्वमपि च प्रतिपादितम्[२]। अपि च -

सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥इति॥

लक्षणलक्षितं गुणत्वं शब्दे समन्वितमेव, ध्वनिरूपस्य तदुपहितस्फोटरूपस्य वा आकाशरूपे द्रव्ये निविशमानत्वात्। ततोऽपगमाच्च।

पूर्वमीमांसायां शब्दस्य द्रव्यत्वम् -

तत्र हि ध्वन्यात्मकस्य वर्णस्फोटात्मकस्य च शब्दस्य द्रव्यत्वमेवोक्तम्। तथा चोक्तम्- शब्दो द्रव्यम्, सत्त्वे सत्यनाश्रितत्वात्-कालवत्-इत्यनुमानेन शब्दस्य द्रव्यत्वं साधयितुं शक्यते[३]।

उत्तरमीमांसायामपि द्रव्यत्वमेव -

वस्तुतः स्फोटो न द्रव्यं नापि गुणः अपि तु भावात्मा एव। द्रव्यत्वादि तु ध्वनिरूपस्य तद्रूपरूपितस्यैव कथयितुं शक्यम्। यो हि कारणकारणीभूतोऽनादिनिधनो विभुः प्रपञ्च-विवर्तोपादानीभूतः स्फोटपदाभिधेयः पदार्थः, स न द्रव्यादिरूपो गुणक्रियाशून्यत्वात् अपि तु भावात्मैव केवलम्, कथञ्चिद् वक्तुं शक्यमिति शब्दकौस्तुभे श्रीदीक्षितमहोदयाः[४]।

स्फोटाभिव्यञ्जकविमर्शः -

व्याडिप्रणीते संग्रहग्रन्थे[५] शब्दग्रहणक्रममाह-

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥ इति।

शब्दाभिव्यक्तेः प्राक् जायमानः प्राकृतो ध्वनिर्वैखरीरूपः शब्दस्य ग्रहणेऽभिव्यक्तौ हेतुरिष्यते। शब्दाभिव्यक्तेरूर्ध्वं जायमानस्तु घण्टानादाभिस्वनवद् वैकृतो ध्वनिः शब्दस्य

---

१. म०भा० १२/२/२८
२. ल०म०र०प्र०पृ० १८६
३. मा०मे०प्रमेयप० द्रव्यनि०
४. श०कौ०म०भ०पस्प० १४
५. उद्धृत - वा०प० वृष०टी० १/७६

चिराचिरस्थितिरूपद्रुतादिभेदे निमित्तत्वं प्रतिपद्यते। स चायं स्फोटः न कदाचिदपि प्राकृतध्वनिव्यतिरेकेणोपलब्ध इति प्राकृतध्वनिकालं ह्रस्वत्वादिभेदप्रयोजकं स्फोटेऽध्यारोप्य स्फोटस्यायं काल इति व्यवह्रियते शास्त्रे। ह्रस्वत्वादीनामारोपितानां शब्दभेदप्रयोजकत्वात् अतो भिस ऐस् इति दीर्घप्लुतयोर्न प्रवर्तते। तदुक्तम् -

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।।[1]

वैकृतो ध्वनिस्तु शब्दाभिव्यक्त्युत्तरभावी शब्दाद् व्यतिरेकेणोपलब्धः इति न तद्धर्माः द्रुतादयः शब्दे उपचर्यन्ते। एते वैकृता ध्वनयस्तु शब्दाभिव्यक्तेरनन्तरं जायमानाः द्रुतादिवृत्तिभेदं जनयन्ति स्फोटात्मा तैर्द्रुतादिभिर्वृत्तिभिर्न भिद्यते। महाभाष्यकारेण शब्दग्रहणविषये इत्थमुक्तम्। श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द इति[2]। तत्र प्रयोगेणेति, प्रतीकमुपादाय प्रयुज्यते इति प्रयोगो ध्वनिस्तेनाभिव्यक्त इत्यर्थः प्रदीपकारेणाश्रितः। तादृशव्युत्पत्त्या वैखर्यात्मकः प्राकृतध्वनिरेव गृहीत इति मन्यते। मध्यमायास्तत्र प्रयुज्यमानत्वाभावात्। भाष्ये बुद्धिग्राह्य इत्यनेन मध्यमायाश्चापि ग्राहकत्वं प्रतीयते - तेन महाभाष्यकृतां तदनुमोदिनाञ्च मते वैखर्याः मध्यमायाश्चोभयोर्व्यञ्जकता समायाति। अयमेव पन्थाः-श्रीभर्तृहरिकैयटभट्टो-जिदीक्षितप्रभृतीनामस्ति। श्रीकौण्डभट्टेन तु भूषणे वायुसंयोगस्य व्यञ्जकत्वमुक्तम्। तत्तु अन्यथासिद्धत्वदोषग्रस्तम्। भाष्यविरोधोप्येतन्मते। भाष्ये ध्वनेरेव व्यञ्जकत्वस्योक्तत्वाद् वायुसंयोगस्य ध्वन्युत्पादकत्वेनैवोपक्षीणत्वात्[3]। श्रीनागेशस्तु परमलघुमञ्जूषायां मध्यमाध्वनेरेव व्यञ्जकत्वमुक्तवान्। वैखरीनादस्य भेर्यादिनादवन्निरर्थत्वञ्च प्रत्यपादयत्।

विनिगमकरूपेण चेमां कारिकामुद्धृतवान् -

वैखर्य्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।। इति।

वैखर्य्या इत्यभेदे तृतीया, एवमेव मध्यमयेत्यत्रापि। वैखर्यभिन्ननादः परश्रवणगोचरोपि न व्यञ्जकः। मध्यमारूपो नादस्तु स्फोटव्यञ्जक उच्यते इति व्याख्यां मन्यमानः श्रीनागेशः, मध्यमा एव व्यञ्जिका, वैखरीनादस्तु भेर्यादिनादवन्निरर्थक एवेति मन्यते।

तदेतन्न मनोरमम्, उक्तभाष्यादिविरोधात्। वैखर्यास्तु निरर्थकत्वमिष्टं चेद् वक्तुः कृते चेत्तदा, इष्टापत्तिरेव। श्रोतॄणां कृते तु वैखरी ध्वनिरेव व्यञ्जकः। श्रीनागेशेनैव प्रयोगेणाभिज्वलित इति भाष्यं तस्य हि प्रयोगेण वैखरीरूपेणाभिज्वलितः स्वरूपरूषितः कृतः इत्यर्थ इति रूपेण विवृण्वता वैखर्या व्यञ्जकत्वमुक्तम्।

---

१. वा०प०का० १/७६
२. म०भा०पस्प० १/१०
३. वै०भू०सा०स्फो०प्रक०

उक्तकारिकायां परश्रवणगोचर इत्यस्य परेषां श्रोतृणां श्रवणविषयतां गतः सन् स्फोटव्यञ्जकः। स्फोटव्यञ्जकः इत्यस्य वक्तुर्हृदयं इति शेषः, कृतो वक्त्रोच्चारितः इत्यर्थः।

पाणिनीयशिक्षामतेन विचारः -

आत्माबुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया[१]
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्
सोदीर्णो मूधर्न्यभिहतो वक्त्रमापद्य मारुतः,
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः॥
स्वरतः कालतः स्थानात्प्रयत्नादनुप्रदानतः॥

आत्मा बुध्या अर्थान् विवक्षितान् समेत्य गृहीत्वा, तदर्थबोधकशब्दानां विवक्षया मनो युङ्क्ते, स्वस्मिनुत्पन्नेन यत्नेन प्रेरयति। तत्प्रेरितं मनः कायाग्निं जाठराग्निमाहन्ति, सोऽभिहतः कायाग्निर्मारुतं स्वसमीपे नाभौ स्थितं प्राणं प्रेरयति स उदीर्णो वक्त्रव्यमापद्म मूर्ध्न्यभिहतः वर्णान् जनयतीत्यर्थः। उत्पन्नानां वर्णध्वनीनां पञ्चधा विभागो भेदः परलिक्षितो भवति-तदाह-स्वरतः, उदात्तादितः, कालतः, ह्रस्वादितः इत्यादि।

सः स्फोटः सदा वर्तमानोऽपि सूक्ष्मतया नोपलभ्यते, व्यजनादिव्यञ्जकवशाद् वायुरिव स्वनिमित्तात् उक्तात् प्रतीयते।

तथा चोक्तं हरिणा-

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते।
व्यजनाद् वायुरिव स्वनिमित्तात्प्रतीयते॥

अनेन शिक्षावचनेन वर्णध्वनिं प्रति वायोर्निमित्तत्वं प्रतीयते। तत्र च मारुतो हि पराख्यमन्तः स्थितं शब्दं वर्णत्वेनाभिव्यञ्जयति इत्ययमर्थः सम्यक् प्रतीयते। केचन प्राणवायोरेव परिणामं वर्णं मन्यन्ते। न तु वायोर्निमिलकारणतेति। वायोर्ज्ञानस्य वा शब्दः परिणाम-इत्यत्र ज्ञानस्य परिणामः, इत्ययमेव पक्षो वैयाकरणानाम्। यथोत्तरं मुनीनां प्रामाण्यमिति सिद्धान्तात्। आख्यातोपयोग इति सूत्रं प्रत्याचक्षाणेन भाष्यकृता शब्दस्य ज्ञानपरिणामत्वोक्तेः। मारुतो वर्णान् जनयते, इति शिक्षायां यद्यपि वायुपरिणामत्वमुक्तं प्रतीयते, तथापि तस्य निमित्तकारणतापरत्वेन व्याख्याने विरोधाभावाच्च। आत्मा बुद्ध्या इत्यत्र यद्यपि पराख्यमेव तत्त्वं वर्णरूपेणाभिव्यज्यमानं प्रतीयते, तस्य च शब्दरूपत्वमेव न तु ज्ञानरूपत्वमेवेति ज्ञानपरिणामत्वमनुपपन्नम्, तथापि शब्दज्ञानयोरैक्येन समाधेयम्, तदुक्तं श्रीहरिणा-

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम्।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥

---

१. पाणिनीयशिक्षा

अत्रान्तःकरणवृत्तिरूपं ज्ञानं सूक्ष्मशब्दानुविद्धतया सूक्ष्मशब्दपरमेव। तस्यैव वागात्मकज्ञानस्यैव स्थूलशब्दतया परिणामः। अत्र पक्षे सूक्ष्मशब्देन पश्यन्त्यादि गृह्यते। कारिकायां विवर्तते इत्यस्य विपरिणमत इत्यर्थः। तथा सति -

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत॥

अनेनैकवाक्यतापि भवति। पराख्यशब्दब्रह्मणस्तु विवर्तभूतमिदं सर्वं जगत्।

उक्तमपि श्रीहरिणा -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति।

अतात्त्विकोऽन्यथाभावो विवर्तः, तात्त्विकोऽन्यथाभावः परिणामः। विवर्तो यथा रज्जौ अयं सर्पः, इति शुक्तौ इदं रजतमिति। परिणामस्तु-यथा दुग्धस्य दधि-मृत्तिकायाः घटादिः। अत्रेत्थं बोध्यम्-यथा कौशेयकार्पासोभयात्मकैर्विजातीयतन्तुभिरेकः पटो निर्मीयते, तथैवात्रापि वायुः शब्दात्मकं ज्ञानञ्चोभयं विजातीयकारणम्-स्थूलशब्दं प्रतीति बोध्यम्। अत एव स भूरिति व्याहरत् भुवमसृजत इत्यादि शब्दोपादानकसृष्टिप्रतिपादकश्रुतिभिः तस्माद्वा एतस्मादात्मनः आकाशः सम्भूत इत्याद्यर्थोपादानकश्रुतीनां विरोधलेशोऽपि न।

ध्वनिकृतः संस्कारः -

उक्तरीत्या समुत्पन्नः प्राकृतो ध्वनिः शब्दोपलब्धिनिमित्तं भवति, तन्नोपपन्नम्। ध्वनिना विषयेन्द्रियासम्बन्धात्। अतः ध्वनिविषयेन्द्रियाणां मिथः सम्बन्धो वाच्यः। स च सम्बन्धः संस्कार्यसंस्कारकभावः। उत्पन्नो ध्वनिः विषयमिन्द्रियञ्च संस्करोति। अत्र च मतत्रयमाह श्रीहरिः–

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य च।
क्रियते ध्वनिभिर्वादाः, त्रयोभिव्यक्तिवादिनाम्॥[१]

ध्वनिरुत्पद्यमानः श्रोत्रं संस्करोति। तत्र श्रोत्रस्य संस्कारो नाम ग्रहणासमर्थस्य श्रोत्रस्यापूर्वशक्त्याधानम्, विद्यमानाया वा शक्तेरनभिव्यक्तायाः प्रबोधोऽभिव्यञ्जनम्, शब्दग्रहणरूपार्थक्रियानुकूलं श्रोत्रे ध्वनिसान्निध्यमेव श्रोत्रस्य संस्कारो ध्वनिकृतः, इति त्रय इन्द्रियस्य संस्कारभेदाः। एवं संस्क्रियमाणं श्रोत्रं शब्दोपलब्धौ द्वारतां प्रतिपद्यते। अन्ये तु - शब्द एव स्वाभिव्यञ्जकध्वनिसंसर्गात् प्राप्तसंस्कारः श्रोत्रविषयत्वमुपगच्छति। अत्र ध्वनिकृतः संस्कारः शब्दाभिव्यक्तिरेवेति मन्यते।

केचित्तु - ध्वनिः शब्देन्द्रिययोरुभयोरपि संस्कारं विदधाति। तयोश्च संस्कारः क्रियमाण उक्त एव। तदुपपादितं श्रीहरिणा -

---

१. वा०का० १/७८

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये॥
चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः॥

अत्रानुमानानि-श्रोत्रं संस्कृतं सत्, स्वविषयग्राहकम्-इन्द्रियत्वात् समाधानाञ्जनादि संस्कृतमनश्चक्षुरादिवत्। शब्दः[१] संस्कृतः सन्, इन्द्रियग्राह्यः विषयत्वात्, आतपोदकसेकादि संस्कृततैलपृथिव्यादिगन्धवत्। शब्दश्रोत्रे युगपत्संस्कृते, ग्राह्यग्राहकभावभाजी, कादाचित्कतद्भावाश्रयत्वात्-चक्षुषः प्राप्यकारित्वपक्षे विषयत्ववत्।

ध्वनिसंस्कृतमिन्द्रियं ध्वनिं गृह्णाति, स्फोटाविभक्तध्वनिं गृह्णाति-ध्वनिं न गृह्णातीति मतत्रयं श्रीहरिणा उक्तम् -

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोन्त्यः प्रकाशकः॥ इति।

जपाकुसुमलौहित्याविभागेन स्फटिकादीनामिव स्फोटरूपाविभागेन ध्वनेर्ग्रहणमित्येकं मतम्। ध्वनिश्चक्षुरादिवदसंवेद्योऽगृह्यमाणस्वरूप एव स्वविषयस्य शब्दस्योपलब्धौ निमित्तमिति द्वितीयः पक्षः। अन्यैस्तु स्फोटेन सहोपलभ्यमानोपि ध्वनिरूपलभ्यभेदात् स्वतन्त्रः प्रकल्पितः। अतएव भग्नदन्ताद्युच्चारणे स्फोटानुपलब्धावपि ध्वनेरुपलम्भः।

सोऽयं स्फोटो ध्वन्यनुगृहीतोऽभिन्नकालोऽपि अभिव्यञ्जकध्वनिगतकालद्रुतादिवृत्तिभेदेन स्वयमपि तद्वानिव भवति। तदुक्तम्-

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते॥ इति।

श्रीहरिसम्मतं वाक्यलक्षणम्-

आख्यातशब्दः, सङ्घातो जातिः सङ्घातवर्तिनी।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहतिः॥
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि।
वाक्यम्प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्॥

(१) आख्यातशब्दो वाक्यमिति प्रथमं लक्षणम् - इदमेव लक्षणमिति न, देवदत्त गामभ्याज इत्यत्राव्याप्तेः किन्तु क्वचिदेवेति संयोज्यम्।

(२) पदसङ्घातो वाक्यम्, सखण्डवाक्यत्वपक्षेऽयम्।

---

१. वा०का०१/७९-८०

(३) सङ्घातवर्तिनी जातिः, सुप्तिङन्तसमुदायवर्तिनी जातिः वाक्यमिति तदर्थः। जातिस्फोटाभिधानपक्षीयमिदं लक्षणम्।

(४) एकोऽनवयवः शब्दो वाक्यम्, एतन्मते वाक्यस्फोटोऽखण्डः।

(५) पदानां क्रमः पौर्वापर्यम्, पूर्वापरीभूतानि पदान्येव वाक्यम् – एतन्मते वाक्यस्फोटस्य सखण्डत्वम्।

(६) बुद्ध्यनुसंहृतिर्वाक्यम्। अस्मिन् मतेऽप्यखण्डमेव वाक्यम्। पदानि न सन्तीति बुद्ध्यैव तेषां कल्पनम्।

(७) आद्यं पदं वाक्यम् – अयमपि पक्षः सखण्डवाक्यस्फोटपक्षीय एवैतेषामभिप्रायः यद्यप्यर्थबोधो भवति समुदायात्, तथापि प्रथमोपस्थितत्वात् आद्यपदे एव शक्तिः कल्प्या तथा सति शक्ततावच्छेदकत्वे लाघवमन्यपदानि सहकारीणि।

(८) पृथक्पदं साकाङ्क्षं सर्वमिति वाक्यलक्षणम्। साकाङ्क्षं सर्वं पदम् आद्यमन्त्यं मध्यञ्च वाक्यम्। अत्रायं निष्कर्षः –

वाक्यस्फोटस्याखण्डत्वपक्षे जातिः सङ्घातवर्तिनी, एकोनवयवः शब्दः, बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि। सखण्डत्वपक्षेऽवशिष्टानि पञ्च। अत्र महान् विचारो विस्तरभयान्नेह वितन्यते दिग्दर्शनमात्रमिदं प्रदर्शितम्, प्राकरणिकत्वात्।

वाक्यार्थस्य प्रतिभाविषयत्वमुक्तं श्रीहरिणा –

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्।।[१]

इत्यनेन देवदत्तादिपदानां पृथगर्थे गृह्यमाणे, अन्यैव प्रतिभा जायते, वाक्येन तु पृथग्विधैवेति, तादृशप्रतिभाविषय एव वाक्यार्थः। प्रतिभामात्रविषयत्वादयं वाक्यार्थः प्रतिभावाक्यार्थ इत्युच्यते। चक्षुरादिजन्यज्ञानव्यावृत्तिर्मात्रपदेन ग्राह्या। प्रत्यक्षस्थले तु अर्थाः चक्षुरादिविषयाः। शाब्दस्थले तु बौद्धार्थस्यैव शक्यतया भानम्। अत एव अतीतसत्ताक-नलादिवाचकशब्दघटितवाक्येनार्थबोधः। प्रतिभा चैषा जन्मान्तरसंस्कारतोपि बोध्या। यथा वसन्ततौं कोकिलस्य पञ्चमस्वरविरावः जन्मान्तरसंस्कारजन्य एव। स चायं वाक्यार्थः कीदृशः, इत्यत्रोच्यते – पदार्थानां परस्परं विशेष्यविशेषणभावरूपोऽन्वयविशेष एव सः।

ननु उक्तवाक्यार्थस्य पदादेवोपस्थितत्वात् तत्र वाक्यस्य शक्तिग्रहो न सम्भवति, तदुपस्थिते शक्तिग्रहे तस्यापूर्वत्वं हीयते। अनन्यलभ्यो हि शब्दार्थः इति न्यायादिति चेन्न वृद्धव्यवहारसहकृतमनसा उपस्थिते तत्र वाक्यस्य शक्तिग्रहोपपत्तेः। क्वचिदुपदेशेन

१. वा०प० २/१४३

क्वचिदाकाङ्क्षाबलेन वा तदैव तद्ग्रहसम्भवाच्च। न च पदैः पदार्थानामिव वाक्येन वाक्यार्थस्यापि स्मृतिरेवेति वाच्यम्, पदार्थानां पदैः शाब्दबोधस्यैव वाक्येन वाक्यार्थशब्दस्यैव स्वीकारात्- शाब्दयामि-इत्यनुव्यवसायानुपपत्तेश्च। वस्तुतस्तु वाक्यजन्यप्रत्ययो नानुभवरूपः स्वर्गनरकादिकं शाब्दबोधविषयीकुर्वतो यज्ञदत्तादेः स्वर्गं नरकं वानुभवामीति प्रत्यस्यानुदयात्। ततश्च शाब्दत्वं ज्ञानत्वव्याप्यजातिरूपं न त्वनुभवत्वजातिव्याप्यम्। इयमेव स्थितिरनुमितावर्थापत्तौ परोक्षप्रमास्थले बोध्या। अनुभवत्वन्तु प्रत्यक्षत्वसमनियतमेवेति श्रीनागेशमहोदया व्यवस्थापयन्ति।

शक्तिमद्वाक्यमर्थं बोधयति-तत्र वाक्येन कीदृशो बोधो जायत इत्युच्यते-देवदत्तः तण्डुलं पचतीति वाक्यं धृत्वा विचार्यते। अत्र पच् धातोः विक्लित्तिरूपे फले फूत्कारादिव्यापारे च शक्तिः अम्प्रत्यस्य कर्मत्वमेकत्वं चार्थः। तण्डुलशब्दस्यापि तण्डुलत्वविशिष्टे शक्तिः। लडर्थः कर्ता संख्या कालश्च। व्यापारमुख्यविशेष्यकबोधवादिनां वैयाकरणानां नये तिङर्थस्य कर्तृरूपाश्रयस्य वृत्तित्वसम्बन्धेन कालस्यावच्छेद्यत्वसम्बन्धेन विक्लित्तेश्चानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः। तिबर्थसंख्याः आश्रयेऽन्वयः समवायेन, तत्रैव चैत्रपदार्थस्याभेदेनान्वयः। अमर्थपदार्थे कर्मणि अमर्थैकत्वस्य समवायेन तण्डुलस्याभेदेनान्वयः। कर्मणश्च विक्लित्तौ वृत्तित्वसम्बन्धेनान्वयः। तथा च चैत्राभिन्नैकाश्रयनिष्ठः वर्तमानकालावच्छिन्नः तण्डुलाभिन्नैकाश्रय-निष्ठविक्लित्त्यनुकूलो व्यापार इति बोधः।

वाक्यस्फोटस्य मुख्यत्वम् -

उक्तेषु स्फोटेषु वाक्यस्फोटस्य मुख्यत्वम्। तत्रापि वाक्यजातिस्फोट एव ज्यायान्, लाघवात्। तथा च - प्रथमशक्तिग्रहस्य व्यवहाराधीनतया - सम्पूर्णस्य वाक्यस्य विशिष्टेऽर्थे प्राथमिकः शक्तिग्रहः। स्थान्यादेशादिवैविध्येन कस्य वाचकत्वं कस्यावाचकत्वमिति कलहे अवयवशक्तेर्दुरूपपादत्वेन वाक्यात्मकसमुदायशक्तेरेव मुख्यत्वात्। तदुक्तं श्रीहरिणा -

तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्ययः।
ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले॥
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः।[१] इति च।

एवं सति निपातादीनां द्योतकत्वं विकरणानामनर्थकत्वमिति विचारोऽपि न पारमार्थिकः, अपि तु प्रक्रियापक्षाश्रितः। उक्तं च -

किं गर्भजन्ये किं गर्भः कीदृग्भातीति नो मते।
विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रयः॥

आरोपितस्याप्युपायत्वं नानुपपन्नम्, लिपिस्थूलारुन्धतीशाखाचन्द्रादीनां पञ्चक्रोशाव-तरणादीनां शास्त्रान्तरसिद्धानां तादृशोपायानां सिद्धत्वात् - तदुक्तम् -

---

१. वा०प० २/९४

पञ्चकोशादिवत् तस्मात् कल्पनैषा समाश्रिता।
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः[१]।।

एतेन पदवाक्ययोरखण्डत्वात्, प्रकृतिप्रत्ययद्वारा शब्दव्युत्पादपरस्य शास्त्रस्याप्रामाण्य-प्रसङ्ग इति निरस्तम्। आत्मनि पञ्चकोशविवेकस्येव प्रकृतिप्रत्ययविवेकपरस्य शास्त्रस्य वाक्यस्फोटे एव तात्पर्यात्। तदुक्तम् -

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भात्तु भावानामनादि ब्रह्म शाश्वतम्[२]।।

श्रीमान् जयन्तभट्टोऽपि वाक्यस्फोटं व्यवस्थापयत्। तथाहि यदि निरवयवः स्फोटात्मा शब्दो भवति। वाक्यमपि शब्द एव तस्य पदात्मका अवयवा मा भूवन्। अवयवकल्पनायां हि यथा वाक्यस्यावयवाः पदानि, पदानामवयवा वर्णाः, एवं वर्णानामप्यवयवैर्भाव्यम्। तदवयवानामप्यवयवैरिति व्यवस्था स्यात्। वर्णेषु यद्यवयवकल्पनाविरामः हन्त। तर्हि वाक्ये एव विरामः क्रियताम्। तथा चाहुः। वाक्ये पदानामतत्वादसत्त्वम्।

निरवयवो वाक्यार्थ इति - एवमेवादियुक्तिभिर्वाक्यस्फोटो बहुचर्चितस्तेन तत्त्वचिन्तकेन[३] यद्यपि स्फोटसाधकयुक्तीनां तत्रत्यानां मञ्जरीकृता पूर्वपक्षतया उपन्यासो मन्यते, तथापि ताः स्फोटसाधकत्वेनेहोपन्यस्ताः।

यद्यपि प्रत्यक्षादितो स्फोटग्रहणेन बोधः सम्भवति-परन्तु व्याकरणद्वारा प्रकृतिप्रत्यया-दिभिर्व्युत्पादनपूर्वकं तज्ज्ञानं तत्पूर्वकप्रयोगद्वारा शरीरशुद्धिहेतुर्यज्ञादिरिवान्तः करणस्य तथा चोक्तम्-

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।
अपि प्रयोक्तुरात्मानं शब्दमन्तरवास्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।
स्वरूपज्योतिरेवान्तः परावागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते।।
इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः।।

स्फोट[४]दर्शने जीवात्मनो वाङ्मयस्वरूपमेव स्फोट इति प्रतिपादितम्।

---

१. वृ०वै०भू०स्फो०नि० ६७
२. वा०प० ३/१४/७८
३. न्या०म०प्र०भ०पृ० ३४१
४. रङ्गनाथपाठककृतस्फोट द०पृ० २१

तत्र हि अयमात्मा वाङ्मयः मनोमयः प्राणमयश्च इति श्रुतिवाक्येनात्मनः स्वरूपत्रयमुक्तं, प्राणमयः स्थूलः, मनोमयः सूक्ष्मः, वाङ्मयः, सूक्ष्मतर आत्मा। तथा च स्थूलशरीराभिमानी प्राणमय आत्मा सूक्ष्मशरीराभिमानी मनोमयः, करणशरीराभिमानी वाङ्मयः आत्मा। तथायं निष्कर्षः – मनोमयो जीवः, तस्यैव सूक्ष्मं स्वरूपं वाङ्मयं स एव स्फोटः। स स्फोटात्मा वाङ्मयः एव लौकिकशब्दरूपेण विवर्तते। एवमेव परमात्मनः यद् वाङ्मयस्वरूपं तदेव वेदरूपेण विवर्तते। अतो वेदस्यापौरुषेयत्वम्, अपरिवर्तनीयस्वरूपत्वञ्च भवति, जीवकृतेस्तत्रासामर्थ्यमेव। स एव च वाङ्मयो जीवरूपः स्फोटः मूलाधारादिस्थानेषु तत्तत्स्थानप्रयत्नादिभिरव्यक्तः परापश्यन्तीमध्यमा वैखर्यभिधानेनाभिधीयते, वस्तुतः स्फोटात्मा तु एक एव। उपाधिभेदाद् भिन्नः, परमानन्दरूपः, परमार्थतोऽभिन्न एव सर्वजगदुपादानभूतः। स च प्रयत्नप्रेरितवायुना संस्कृतो मूलाधारेऽभिव्यक्तः संस्कारोपेतवायुना नाभिदेशेभिव्यक्तस्तदा प्रकाशात्मकसामान्यस्पन्दतया मनोविषयः पश्यन्तीत्यभिधीयते। हृदयदेशगतहृद्देशेऽभिव्यक्तः स एव शब्दात्मा मध्यमेति गीयते। मुखादिस्थानेषु संस्कृतपवनेऽभिव्यज्यमानो वैखरीति। तन्त्रशास्त्रेषु यथोक्तम् –

मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः।
पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमास्थः॥
वक्त्रे वैखर्यथ रुरुदिबोरस्य जन्तोः सुषुम्णा।
बद्धस्तस्माद् भवति पवनप्रेरितो वर्णसंज्ञः॥

इत्येवं विभिन्नशैल्या स्फोटस्य निरूपणम् स्फोटदर्शने कृतं संक्षिप्यात्रावतारितम्।

शब्दार्थसम्बन्धविचारः –

वाक्येन वाक्यार्थो गम्यते। अतो वाक्यवाक्यार्थयोः कश्चन सम्बन्धोऽवश्यं वाच्यः। स च सम्बन्धः क इत्यत्र नैयायिकाः अस्मात्पदादयमर्थो बोद्धव्यः, इदं पदमिममर्थं बोधयतु इत्याकारिका ईश्वरेच्छैव शक्तिरिति ब्रुवते। तन्न मनोरमम् इच्छायाः शब्दार्थयोरुभयोरवृत्तितया द्विष्ठत्वाभावेन सम्बन्धत्वानुपपत्तेः। नापि प्राचीनमतसम्मतम्, बोधजनकत्वमेव शक्तिः, तथा चोक्तं हरिणा –

इन्द्रियाणां स्वविषयेष्वनादियोग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धी योग्यता तथा॥

अनया कारिकया बोधजनकत्वरूपां शक्तिं मन्यन्ते प्राचीनाः। अनुमोदन्ते च श्रीभट्टोजिदीक्षितश्रीकौण्डभट्टप्रभृतयो वैयाकरणमूर्धन्याः[१] शाब्दिकशिरोमणिः श्रीनागेशस्तु बोधजनकत्वस्य द्विष्ठत्वाभावादिकमुपपाद्य समीचीनयुक्तिभिः पदार्थोभयनिष्ठम्,

---

१. भूषणसारे शक्तिनिरूपणे १

वाच्यबाधकभावसम्बन्धं शक्तित्वेन स्वीकृतवान्। तद्वाहकत्वेन च तादात्म्यं स्वीकृतं तेन[१]।

शब्दार्थयोः सम्बन्धोऽवश्यं मन्तव्यः। तथा चोक्तं श्रीहरिणा -

सतिप्रत्ययहेतुत्वं सम्बन्धं उपपद्यते।
शब्दस्यार्थे यतस्तस्मात् सम्बन्धोऽस्तीति गम्यते।।[२]

स च सम्बन्धः तादात्म्यरूप एवेति सिद्धान्तयन्ति परे वैयाकरणाः। शब्दार्थयोस्तादात्म्यसत्वे च प्रमाणानि -

वृद्धिरादैच्, अदेङ्गुणः ओमित्येकाक्षरं ब्रह्म, रामेति द्वयक्षरं नामेत्यादि संज्ञासंज्ञिनोरेक-विभक्तिकत्वेन निर्देशा एव। यथा नीलो घट इत्यादौ तादात्म्यसम्बन्धेन नीलविशिष्टो घट इति वोधस्तथैव अत्रापि तादात्म्यसम्बन्धेन वृद्धिपदादिविशिष्टाः आदैजादिशब्दाः इति बोधः। तथा च तादात्म्यसम्बन्ध एव शक्तिः। वृद्धिरादैच्-इति सूत्रे भाष्यकारोऽपि ब्रूते -

द्वयोरेव सामानाधिकरण्यं विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा इति। अत्रैवोद्योतकारः - तादात्म्यमेव शब्दार्थयोः शक्तिः।

तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। तत्राभेदस्याध्यस्तत्वेन नाग्निशब्दोच्चारणेन दाहापत्तिः, नापि असिशब्दोच्चारणेन जिह्वोच्छेदापत्तिश्च। यद्वा -

वस्तुतस्तु बौद्धपदं शक्तं बौद्ध एवार्थः शक्य इति न तयोर्दाहजनकता। भेदस्योद्भूतत्वे तस्य वाचकः प्रणव इति। अभेदस्योद्भूतत्त्वे च वृद्धिरादैजिति। भेदाभेदमादाय सर्वक्लेशहानस्य निवृत्तिरिति संक्षिप्य शब्दार्थसम्बन्धविचारः प्रस्तुतः। अत्रत्यो महान् विचारस्तत्तद् ग्रन्थेपु विस्तृतः तदेवं क्रमेण स्फोटविमर्शविषये यावन्तो विषयाः विशिष्टरूपेणोपयुक्तास्तेषां यथाभानं यथासम्भवं संक्षेपेण विवेचनाय प्रयतितम्।

---

१. ल०म०र०प्र०युता १६-१७
२. वा०प० ३/३/३७

वैयाकरणमते शब्दार्थविचारः

■ स्व० पं० पेरिसूर्यनारायणशास्त्री

"सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विते"तिलक्षणलक्षितं वाक्यरूपं शब्दं व्यवहाराय लोकाः प्रयुञ्जते। तस्यैव संपूर्णार्थबोधकत्वात्। तेनैवार्थसमाप्तेश्च। तदुक्तं न्यायभाष्यकृता-"पदसमूहो वाक्यमर्थसमाप्ता" विति। अतो व्याकरणेनापि तादृशशब्दस्यैव संस्कारकेण भवितव्यम्। परन्तु वाक्यानामानन्त्यात् प्रतिवाक्ये शक्तिग्रहासंभवात् तदन्वाख्यानस्य लघूपायेनाऽशक्यत्वाच्च कल्पनया पदानि प्रविभज्य, पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माऽऽचार्याः।

तस्यामवस्थायां घटादिपदैः प्रतिपाद्योऽर्थः कः? स च कीदृशः? इति जिज्ञासया प्राचीनैर्महात्मभिः स्वानुभवमनुसृत्य बहवः पक्षाः प्रदर्शिताः ते च प्रायो द्वादश। ते च श्रीमता भर्तृहरिणा वाक्यपदीये वाक्यकाण्डे ११९ कारिकामारभ्य १४१ कारिकापर्यन्तग्रन्थेन न्यरूपिषत—

१. अस्त्यर्थपक्षः

सर्वेषां शब्दानामस्त्यर्थः (सत्ता) वाच्यो भवति। गौः घट इत्यादिशब्देभ्यः कश्चिदर्थोऽस्तीत्येतावन्मात्रं प्रतीयते, न तु व्यक्तिः, नापि तद्गतविशेषाः। यथा-स्वर्गा-पूर्व-देवतादिशब्देभ्यः। गवादिभ्यो विशेषप्रतीतिस्तु तत्तच्छास्त्रार्थपरिज्ञानबलादेव, न तु शब्दात्।

२. अस्त्यर्थो व्यक्तिविशेषश्चेत्युभयं शब्दार्थः

सत्तामात्रं नार्थः, किन्तु तदाश्रयव्यक्तिविशेषा अपि। न हि व्यक्तिं विना सत्तायाः स्थितिः संभवति।

३. साध्यसाधनयोर्गुणप्रधानभावः शब्दार्थः

यद्यप्येकस्माच्छब्दादेक एवार्थः प्रतीयत इत्यनुभवः तथापि तावन्मात्रे न विश्रान्तिः। यजेतेत्यादिक्रियापदश्रवणे साधनं, तण्डुलादिपदप्रयोगे क्रिया च नियमेनाकाङ्क्ष्यते। अत उभयमपि शब्दार्थो विशेष्यविशेषणभावेन। तिङन्ते क्रिया सुबन्ते साधनं विशेष्यम्।

४. साध्यसाधनसमुदायः समकक्षतया शब्दार्थः

यद्यपि निरुक्तदिशा सर्वे पदार्था अवभासन्ते, परन्तु सर्वेऽपि समकक्षतयोच्यन्ते, गुणप्रधानभावस्तु न शब्दः।

५. व्यक्तावसत्यजात्यादिसंसर्ग एव शब्दार्थः

घटादिव्यक्तौ जातिगुणकियाः समवयन्तीति वक्तुं न पार्यते, व्यक्तिव्यतिरेकेण तेषां पृथगनुलम्भात्। अतोऽसत्य एव तत्संसर्गः शब्देन बोध्यते।

६. असत्योपाधिविशिष्टं यत्सत्यं, तदेव शब्दार्थः

घटादिशब्दैः प्रतीयमाना व्यक्तिरेव शब्दार्थः, जात्यादयस्तूपाधिभूता असत्या एव।

७. अभिजल्पत्वं प्राप्तः शब्द एव पदार्थः

अभिजल्पो नाम शब्दार्थयोरितरेतराध्यासः। तथाभूतः शब्द एव पदार्थः।

८. शब्दसामर्थ्यमेव पदार्थः

घटादावर्थे ज्ञानानुकूला शक्तिर्नास्ति। शब्दनिष्ठैव सा शक्तिः। शब्दाश्च क्रियारूपतया साधनरूपतया चार्थमुपस्थापयन्ति।

९. अर्थनिष्ठा शक्तिरेव पदार्थः

घटादावर्थे विचित्रा बहवः शक्तयः सन्ति घटनानुकूला कर्तृत्वकर्मत्वाद्यनुकूला जात्याद्याश्रयत्वानुकूलेत्यादयः। सर्वशक्तेः पदार्थस्य प्रकरणादिवशात्तत्तद्रूपं प्रसज्जति। तच्च शब्दप्रयोगाधीनम्।

१०. बुद्धिपरिकल्पितोऽर्थ एव शब्दार्थः

बुद्ध्या परिकल्पित एवार्थः शब्दवाच्यः। अत एव शशशृङ्गादिशब्दानामर्थवत्त्वनिबन्धनप्रातिपदिकत्वसिद्धिः।

११. पदानां ज्ञानमात्रमर्थः

घटादिपदैर्ज्ञानमेव बोध्यते, अत एव स्वर्गापूर्वादिशब्दानामर्थबोधकत्वमुपपद्यते।

१२. वक्त्रिच्छामात्रकृत एव शब्दार्थः

घटादिष्वर्थेषु नियमेन शब्दप्रयोगानुकूलं रूपं नास्ति। किन्तु वक्त्रा बुद्धिसंनिवेशितमेव रूपं शब्दवाच्यम्।

एषां पक्षाणां मध्ये दशम-द्वादशपक्षयोरेव भर्तृहरेस्तात्पर्यम्। दशमः पक्षः—

यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः।
स बाह्यं वस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते॥ ३२

अनया कारिकया बुद्धिपरिकल्पितोऽर्थ एव शब्दार्थ इति सिद्धान्तः प्रतिपाद्यते। अयमर्थः—शब्दो हि ज्ञानरूपतया बुद्ध्युपारूढतयाऽभ्यन्तरः। अविकल्पोपि स वर्णपदाद्यानुपूर्वीमत्त्वेन पदत्वेन वाक्यत्वेन च विकल्प्यमानतया वैकल्पिकः। अतस्तस्यार्थोप्येवं भूत एव वाच्यः। तथा च शब्दस्यार्थोपि संस्काररूपेण-बुद्ध्युपारूढ एवाभ्यन्तरः, न तु बाह्यः, आभ्यन्तरः स्फोटरूपः शब्द एव वाचकः, न तु बाह्यो वैखरी रूप इति वैयाकरणा आशेरते।

किन्त्वान्तरत्वेपि (कारिकायाम्) बाह्यवस्तुनिबन्धनः—बाह्यं वस्तु घटादिकं संस्काररूपेण अत एवाऽविकल्पे आभ्यन्तरे घटे घटाद्याकारविकल्पजननद्वारेण निबन्धनं घटाद्याकारवत्ताज्ञापकं निमित्तं यस्य तथाभूतः। स चार्थो भ्रमवशाद् घटादि दृश्यबाह्यविकल्पैकाकारेणाऽबहीरूपोपि बहीरूपतयाऽध्यस्तः, "अध्यस्तमेव वस्तु शब्दादवगच्छामी"त्यनुभवबलादिति शब्दनिमित्तकः शब्दज्ञाप्य इति कारिकार्थः, बुद्धौ पदार्थस्य संस्काररूपेण सत्त्वे पदार्थबोध एव मानम्। पूर्वपूर्वबोधैर्वासनाजननाच्च, अनादित्वाच्च व्यवहारस्य न दोषः। भ्रमे च बीजमन्तःकरणस्य रागादिदोष एव। अत एव बाह्यपदार्थानयनमुपपन्नम् एवं च यो यो बाह्यवस्तुनिबन्धनः बाह्यं वस्त्विति ज्ञातः, स शब्दार्थ इति कैश्चिदाचार्यैरङ्गीक्रियत इति योजना कार्या। वा शब्दः पक्षान्तरसूचकः—

अत्रेदमवगन्तव्यम्-यत् श्रीमता शान्तरक्षितमहोदयेन स्वीयतत्त्वसंग्रहे शब्दार्थपरीक्षाप्रकरणे "योवार्थ" इत्यादि हरिकारिका तयैवानुपूर्व्यान्यबन्धि। श्रीकमलशीलविदुषा तद्व्याख्याने पञ्चिकायां बाह्यार्थ एव शब्दार्थो, न तु बुद्धिस्थ, इत्यर्थकतया हरिकारिका व्याख्यायि-"बुद्धिविषय इति। बुद्धौ विपरिवर्तमानः बुद्धिस्थ इति यावत्। बाह्यवस्तुनिबन्धन इति सदसद्वा बाह्यं वस्तुनिबन्धन-मक्षरचिह्नस्थानीयं स्वरूपमुपदर्शयितुं प्रक्रम्यते यस्य स बाह्य वस्तुनिबन्धनः। बाह्यं वस्त्विति ज्ञात इति बुद्धिस्थत्वेनाऽविर्भावितो बाह्यतया ऽध्य एव इत्यर्थः। तथाहि-यावद् बुद्धिरूपमर्थेष्वप्रत्यस्तं, बुद्धिरूपमेवेति सत्त्वभावनया गृह्यते, तावत्तस्य शब्दार्थत्वं नावसीयते। तत्र क्रियाविशेषसंबन्धाभावात्। गामानय दधि खादेत्यादिका क्रिया तादृशि बुद्धिरूपे संभवति। क्रियायोगसंबन्धी चार्थः शब्दैरभिधीयते। अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति, तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थ-इति

एवं च वाक्यपदीयरीत्या योवार्थ इति ग्रन्थो बुद्धिस्थ एवार्थः शब्दार्थः, न तु बाह्य इत्याशयकः, कमलशीलरीत्यातु बाह्यार्थ एव शब्दार्थः न तु बुद्धिस्थ इत्याशयक इति पर्यवस्यति।

क्रियासंबद्ध एवार्थः शब्दार्थः, बुद्धिस्थस्तु भक्षणानयनादिक्रियया न संबध्नातीत्याशयः कमलशीलानाम्

वस्तुत स्तदुक्तार्थस्वीकारेपि बौद्धपदार्थसिद्धौ न किञ्चित्प्रतिबन्धकम्। यथा सुबन्तार्थोबौद्धस्तथा तिङन्तार्थोपि बौद्धः। तयोश्च संबन्धो घटते। किञ्चानयनादिका क्रिया नाम न कश्चिद्दण्डायमानः पदार्थः, पादचलनाद्यनेकावयवसमूहरूपैव सा। अतस्तत्र "शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति योगदर्शने पतञ्जल्युक्तविकल्पात्मकमेव क्रियापदाज्जायते। अत एव तिष्ठतीत्यादेर्विकल्पोदाहरणत्वं पातञ्जलैरुक्तम्। अतः क्रियासंबन्धायोगाद् गामानयेत्यादौ बौद्धपदार्थासिद्धिरिति कमलशीलोक्तिर्नादर्त्तव्या।

किंच बाह्यार्थस्यैव शब्दार्थत्वमिति निर्णयायच्छलेन हरिकारिकाव्याख्यानपर्यन्तं नानुधावितव्यम्। नैयायिकान् पृच्छन्तु ते स्पष्टं कथयिष्यन्ति।

भर्तृहरेराशयमप्यलक्ष्य तदीयग्रन्थस्यायोग्यार्थपरतया व्याख्याने का वा औचिती कमलशीलानाम्। तथाव्याख्याने 'बुद्धिविषयः, बाह्यं वस्त्विति ज्ञातः, बाह्यवस्तुनिबन्धना इति पदानां सार्थक्यमिति, प्रश्ने, किं वा ब्रवीति कमलशीलः। 'बाह्यं वस्तु' इति प्रयोगः कमलशीलमहोदयं भ्रमयाञ्चकार, अतः कमलशीलानां टीका हरिग्रन्थस्यानुगुण्यं न भजते, किंतु मदुपदर्शितरीतिरेव युक्ता, सा च पुण्यराज-नागेशादिभिरुपदर्शिता।

शान्तरक्षितेन हरिकारिकायां विशिष्य स्वाशयो न प्रादर्शितेन कमलशीलाविष्कृत एवाशयो मूलग्रन्थस्येति विनिश्चेतुं पार्यते, अतः शान्तरक्षितमहानुभावा अपि न युक्ताभिधायिन इति वक्तव्यं स्यात्।

अत्रेदमपरमाश्चर्यम्-यत् श्रीमद्भिःश्रीरघुनाथशर्मभिः यो-वार्थो बुद्धिविषयः इति हरिकारिकां पुण्यराजटीकामवलम्ब्य व्याख्यायानन्तरं कमलशीलटीका प्रदर्शिता तत्र ते लेखिनीं न व्यापारयामासुः। कुतो वा तत्र शर्मभिरुदासितमिति न जानीमः— ।

किंच बौद्धपदार्थानङ्गीकारे महाकवीनां केचन प्रबन्धा अर्थरहिता एव स्युः। यथा—

अस्य क्षोणिपतेः परार्थपरया लक्षीकृतः संख्यया,
प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्रव्याः किन्नार्तयः।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरात्,
मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोदसि॥

अस्मात्पद्यात्सर्वोपि विज्ञलोकः सम्यगेवार्थमवच्छति।

किंच हेतुमति चे, ३-१-२ ति पाणिनिसूत्रे भगवान् पतञ्जलिः कंसं घातयतीत्येतदुपपादनावसरे "तेपि हि (कथकाः) तेषामुत्पत्तिप्रभृत्याविनाशाबुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ती" ति ग्रन्थेन बौद्धः शब्दार्थइति पक्षं स्वाभिमतं व्यञ्जयति। तच्च भाष्यं हरिणा एवं व्याख्यातम्—

शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते॥

अत एव "उपदेशेऽजनुनासिक इत्" इति १-३-२ पाणिनेः सूत्रे भगवता पतञ्जलिना को देवदत्त इति प्रश्ने अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुरीदृशो देवदत्त इत्युक्तं संगच्छते-बौद्धपदार्थानङ्गीकारे एकव्यक्तौ भेदाभावादीदृशः इत्यस्या-संगतिः स्पष्टैवा मम तु एतैः शब्दैर्यादृशोऽर्थो बुद्धौ प्रतिभासते, तादृशो बाह्यार्थ इति तद्भाष्यं साधु संगच्छते।

किं च भर्तृहरिणा द्वादश पक्षा न्यरूपिषत। तत्त्वसंग्रहे शान्तरक्षितेन तेषां मध्यात्सप्त अथवा अष्टौ पक्षा अनूदिताः। विशिष्यैतेषु दोषोप्युद्भावितः। अन्ततो गत्वा सर्वेष्वपि पक्षेषु लग्नमेकं दूषणं (९५० कारिका) प्रादर्शयच्छान्तरक्षितः—सर्वस्यापि पदार्थजातस्य क्षणिकत्वेन संकेतकाले दृष्टस्य व्यवहारकालेऽन्वयासंभवान्न तत्र समयः संभवतीति,

तदत्यन्तमसंगतम् यतः क्षणिकवादो वाचोयुक्तिमात्रफलकः, न युक्तिसहः तथाहि—वैनाशिकः सर्वस्य पदार्थस्य क्षणिकतामभ्युपगच्छति। सोपि जगदन्तःपातितयोपलब्धुरपि क्षणिकतामभ्युपेयात् न च सा संभवति, अनुस्मृतेः, अनुभवमुपलब्धिमनूत्पद्यमानं स्मरणमेवानुस्मृतिरित्युच्यते। सा चोपलब्धैककर्तृका सती संभवति, पुरुषान्तरोपलब्धिविषये पुरुषान्तरस्य स्मृत्यदर्शनात्। कथं हि 'अहमदोऽद्राक्षमिदं पश्यामी' ति च पूर्वोत्तरदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात्। अपि च दर्शनस्मरणयोः कर्तर्येकस्मिन् प्रत्यक्षः प्रत्यभिज्ञात्मकः सर्वस्य लोकस्य प्रसिद्धः। अहमदोऽद्राक्षमिदं पश्यामी, ति, यदि तयोर्भिन्नः कर्तास्यात्ततोऽहं स्मरामि अद्राक्षीदन्य इति प्रतीयात्, नत्वेवंप्रत्येति कश्चित्, यत्रैवं प्रत्ययस्तत्र दर्शनस्मरणयोर्भिन्नमेव कर्तारं सर्वलोकोऽवगच्छति स्मराम्यहम्,

असावदोऽद्राक्षीदिति। इह त्वहमदोऽद्राक्षमिति दर्शनस्मरणयोर्वैनाशिकोप्यात्मानमेवैकं कर्तारमवगच्छति न नाहमित्यात्मनो दर्शनं निर्वृत्तं निह्नुते, यथा-अग्निरनुष्णः, अप्रकाश इति। तत्रैवं सत्येकस्य दर्शनस्मरणलक्षणक्षणद्वयसंबन्धे वैनाशिकस्य क्षणिकत्वपक्षो भज्येत। तथाऽनन्तरामनन्तरामात्मन एव प्रतिपत्तिं, प्रत्यभिजानन्नेककर्तृका, मोत्तमोच्छ्वासादतीताश्च प्रतिपत्तीराजन्मन आत्मैककर्तृकाः प्रतिसन्दधानः कथं क्षणभङ्गवादी वैनाशिको नापत्रपेता।

तथा "वर्तमाने लट्" ३-२-१२३ इति पाणिनिसूत्रे 'नास्ति वर्तमानः काल' इति पूर्व पक्षप्रतिपादनावसरे भगवता पतञ्जलिना क्षणभङ्गवादो नितरां खण्डितः।

अतोऽनुपपन्नमनुभवविरुद्धं च क्षणभङ्गवादमास्थाय प्रमाणभूयिष्टं सर्वानुभववेद्यं महाभाष्यकारदिशा शाब्दिकसंमतं शब्दार्थं खण्डयितुं शान्तरक्षित-कमलशीलप्रभृतयः प्रावर्तन्त तदयुक्तम्। किंच "परः संन्निकर्षः संहिते" १-४-१०९ ति पाणिनेः सूत्रे "बुद्धौ कुर्यात्पौर्वापर्यम्, बुद्धिविषयमेव शब्दानां पौर्वापर्यम्। अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्य इत्यादिना बौद्धशब्दार्थसिद्धान्तो भगवता पतञ्जलिना विस्तरेण निरूपितः। औपचारिका सत्तैव शास्त्र- प्रवृत्तौ निमित्तमिति 'तदस्यास्त्यस्मिन्निति मतुबिति' पाणिनेः सूत्रे पतञ्जलिना सिद्धान्तितम् तच्च भाव्यं भर्तृहरिणा वाक्यपदीये तृतीयकाण्डे संबन्धसमुद्देशे ३९, ४०, ४१ कारिकाभिर्व्याख्यातम् एवमस्माभिः कल्पनादशायां वैयाकरणनयेन शब्दार्थों विचारितः।

शब्दश्चार्थश्च

■ देवर्षि कलानाथशास्त्री

शब्दोऽर्थश्च वाग् ब्रह्मणः स्वरूपमविनाभावेन व्यञ्जत्किञ्च तत्त्वमिति सर्वैः शास्त्रैः सर्वैश्च सुधीभिरभ्युपगतमस्तीति को न वेद? अत एव हि कालिदासादयः

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

इत्यादि ब्रुवाणाः वाक्पदेन शब्दमेवाभिधित्सवः शब्दार्थयोर्नित्यं साहचर्यं स्फोरयन्ति। तदेव हि वैयाकरणाग्रणीभिः–

शब्दजातमशेषं तु धत्ते मुग्धेन्दुशेखरः।
अर्थजातमशेषं तु धत्ते शर्वस्य वल्लभा।।

इत्यादिभिः प्रतीकैरभिहितमस्ति। यद्यपि वेदविज्ञानवादिनां सिद्धान्तः सुविदितोऽस्ति यन्मनः-प्राण-वाग्रूपस्यात्मनो यद् वाक्तत्त्वं तदेव हि सद्रूप-सृष्टिप्रपंचत्वेन व्यज्यते। तदेव हि नामरूपात्मकेनाविनाभावेन प्रकटीभवति यत्र हि नाम पदेन शब्दः स्फोर्यते, रूपपदेन चार्थः। सकलोऽयं सृष्टिप्रपञ्चः पदार्थत्वेन जिज्ञासितो व्याख्यातो, निरुक्तः, पारिभाषितश्चान्वीक्षिकीकारैः। सर्वमेतद् 'दर्शन' शास्त्रीयां वागारभटीं विस्तारयत् व्याख्याजातं शब्दार्थयोर्नित्यसाहचर्यमपि प्रकटयति। अत एव हि भाषाकवेर्गोस्वामितुलसीदासस्य मङ्गलाचरणपद्यं कालिदासीयां पूर्वोद्धृतां वाचमेवानुवदत्प्रतिभाति–

गिरा अरथ जल बीचिसम कहियत भिन्न न भिन्न।
बन्दौ सीताराम पद जिनहिं परम प्रिय खिन्न।।

अत्र हि गिरा-अर्थेति पदद्वयेनाऽसौ शब्दार्थावेवाभिप्रैति। शब्दार्थयोरनयोः सममेव गौरवम् तथापि बहुधा तादृशी विचारसरणिर्व्यलोक्यत विद्वत्सु, यदनयोरेकतरस्य बलीयस्त्वं केनचन व्यपदिष्टं वा? काव्यलक्षणं व्याचक्षाणो मम्मटस्तु ''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'' इति व्याहृतवान्, किन्तु जगन्नाथपण्डितराजो ''रमणीयार्थप्रतिपादकः शब्दः काव्यम्'' इत्याख्यातवान्। अत्र हि प्रासरन् विदुषां विवादाः लक्षणे प्रयुक्तौ शब्दार्थपदावधिकृत्य। किमिति जगन्नाथेन शब्दार्थयोः काव्यत्वमविख्याप्य शब्दस्य काव्यत्वं लक्षणेऽनुशिष्टमिति। यद्यपि स रमणीयार्थप्रतिपादकत्वेन शब्दं विशिनष्टि, न केवलं शब्दं काव्यत्ववहं व्यपदिशति,

तथापि, तादृशा विवादाः प्रमाणयन्ति यत् शब्दार्थयोः कतरो बलीयानित्याद्यपि विद्वद्भिः प्राचीनादेव कालाद्विचारितमस्ति। शब्दस्य प्रातिस्विकं महत्त्वं तु सर्वत्र सर्वैरेवाङ्गीकृतम्। भर्तृहरेः–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

इत्याप्तोक्तिः संस्कृतविदुषां कण्ठाभरणतामापन्नास्ति। वस्तुतो वैज्ञानिकदृशापि नितान्तं सत्यमिदम्। ज्ञानस्य मुख्य आधारो व्यञ्जकं माध्यमं च शब्द एवाऽस्ति, तदनुस्यूतोऽर्थः शब्दे उच्चारिते मनसि चित्ररूपेणोत्पद्यते, तेन च तात्पर्यावगमो भवतीति प्राचामस्माकं भारतीयानां विज्ञानविदां परा-पश्यन्तीत्यादिवाक्प्रयोजकः सिद्धान्तोऽर्वाचीनैस्तत्त्वविद्भिर्वैज्ञानिकैः शब्दविद्यानिष्णातैर्भाषावैज्ञानिकैरपि गवेषणानन्तरं सत्यापितः। तेऽप्येनमेव सिद्धान्तं विज्ञानग्रन्थेषु साधयन्ति। विश्वेस्मिन् सर्वमपि नवं विज्ञानं ज्ञानसामग्रीप्रकटनोद्देश्यक-नवशब्दाविष्करणा-वच्छेदकावच्छिन्नमित्यर्वाचीना वदन्ति [भाषाक्रीडा]

अर्थगर्भत्वं शब्दस्य–

वस्तुत आश्चर्यस्येदं वस्तु यदभिधा-लक्षणातात्पर्यादिवृत्तिविचारसरणौ ये ये सिद्धान्ताः, आकांक्षा-योग्यता-प्रत्यासत्यादीनां शब्दार्थावगमे साधनत्वम्, स्फोटसिद्धान्तः इत्यादयो विवेचिताः प्राग्भिः, सर्वेऽपीमेऽस्माकं प्राचीनाः सैद्धान्तिकाः वादाः पाश्चात्यभाषावैज्ञानिकैः स्वस्वदिशाऽनुसन्धानानन्तरमद्यापि तथैव व्याख्याताः यथा परःसहस्रवर्षपूर्वमस्माकं प्राचीनाचार्यैर्व्याख्याता अभूवन्। व्याकरणन्यायमीमांसासाहित्यादिशास्त्रेषु शब्दसम्बंधी यो विचारो भारतीयविद्यास्वस्ति स नितरां विज्ञानानुसारी इत्यनेन सिध्यति। ''प्रथमे हि विद्वांसो वैयाकरणा'' इति हि वैयाकरणानां यन्महत्त्वं साहित्यशास्त्रविद्भिरपि स्वीकृतं न तत्र कस्यचनापि विप्रतिपत्तिः।

शब्दस्य शब्दशास्त्रस्य चैवं महत्त्वे स्वीकृतेऽपि तदिदं खलु नितरामविस्मार्यं यच्छब्दस्य तावदेव महत्त्वं यावदिदमर्थावबोधकं भवति। नहि निरर्थकस्य शब्दस्य किमपि महत्त्वं, न वाऽर्थनिरपेक्षं किमपि महत्त्वं शब्दस्य। शब्दाः खल्वर्थबोधनस्य साधनं, न तु शब्दाः साध्यत्वभाजः। साध्यत्वं त्वर्थावबोधस्यैव, अर्थस्यैव। अल्पाल्पैः शब्दैरधिकाधिकस्यावबोधनमेव ज्ञानविज्ञानयोरुद्देश्यम्। अयमेव चासीदस्माकं भारतीयानां दृष्टिकोणः। प्रसिद्धं किल, ''अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः'' इति। अतएव हि प्राचामभिव्यक्तिशैली पूर्णतोऽर्थगर्भा, सारगर्भिता च भवति स्म। उपनिषत्सु, शंकराचार्यस्य भाष्येषु, सायणभाष्येषु, पातञ्जलमहाभाष्ये-सर्वत्र गद्यशैलीसारगर्भाऽर्थपूर्णा च विद्यते। भारतीयानां सूत्रविधायाः सारगर्भत्वं तु विश्वप्रसिद्धमेव।

विज्ञान-विवेचकानां शास्त्राणां शैलीनिश्चितमेवार्थपूर्णा भवति। शब्द प्रपञ्चेन, आलंकारिक-शैल्या च न तत्र किमपि कार्यम्। प्रसिद्धमपि- ''अस्माकूणां नैयायिकेषामर्थरि तात्पर्यं न तु शब्दरि।'' (अस्माकं नैयायिकानामर्थे तात्पर्यं न तु शब्दे।)

मध्यकालिकी स्थितिः–

शब्दस्य महत्त्वे स्वीकृतेऽप्यर्थपरत्वं शब्दानां यदि भवति, तदैव विज्ञानस्य दृष्टिरूपोद्बलनं लभते। अन्यथा व्यर्थशब्दजालेषु पतितस्य ज्ञानस्य वृद्धिस्तत्रैव कुण्ठिता भवतीत्येव न, शनैः शनैरुपचितं सर्वमपि ज्ञानं क्षीयते, शब्दा एव चावशिष्यन्ते इति हि सनातनो नियमः।

डॉ० रामविलासशर्मसदृशा आधुनिका हिन्दीविद्वांसः स्पष्टमभिदधति यद्वैदिकस्य ऋषेः शैली सहज–स्फुटतयाऽर्थसमर्पिका, शब्दाडम्बररहिता चास्ति। अत एव मन्त्रद्रष्टारस्ते इति ख्यातिः। वैदिका हि मंत्रा अविकलार्थबोधपराः, स्फुटाश्च। न कुत्रचन शब्दजालस्य, व्यर्थवाक्प्रसारस्य वा प्रवृत्तिरुपलक्ष्यते या मध्यकाले जटिलानां पदानां विस्तारणेन वागाडम्बर–प्रसारणेन च कतिपयैः प्रदर्शयितुमारब्धा। तादृशी हि वागफला, अपुष्पा चामन्यत। को न वेत्ति महर्षेरिमामृचं यत्र हि तेन विलक्षणयैव हृदयावर्जिकया सरण्या वाचो विभव उदाहृतः–

उतत्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु।
अधेन्वा चरति माययैव वाचं शुश्रुवाँ अफलामपुष्पाम्।।

एवं विधा अफला अपुष्पा च वाक् शब्दाडम्बरं प्रदर्शयतां मध्यकालीनानामालङ्कारिकाणां प्रपञ्चेषु शक्यते विलोकयितुं, न वेदोपनिषत्काले।

प्राचीने वैदिके काले, उपनिषत्काले, सूत्रकाले, भाष्यादिनिर्माणकाले आर्थगर्भत्वं शब्दानामनिवार्यमासीत्। तदैव च भारतीयं विज्ञानं सर्वजगत्यग्रगण्यमासीत्, भारतं च विश्वगुरुत्वेन प्रथितमभूत्। कालस्य करालशापः, को जानीते, कदा भारते लग्नो, यन्मध्यकालमारभ्य सेयं प्रवृत्तिः परिवर्तिता।

कविना माघेन तूदीरितम्– ''नालम्बते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।''

किन्तु मध्यकालमारभ्य शब्दानामेव महत्त्व प्रसृतम्, अर्थो विस्मृतः, आलंकारिकत्वं शब्दशैल्याः प्रधानत्वेनाभ्यसनीयं संजातं, शब्दजाले मुख्यत्वमापादितं, विज्ञानम्, अर्थगर्भत्वं, सर्वं कोणे पातितम्। अद्य त्वियं प्रसिद्धिर्यत्संस्कृतज्ञा एकेन शब्देन योऽर्थो बोधयितुं शक्यस्तदर्थे शब्दशतं प्रयुञ्जते, अतिशयोक्ति–अत्युक्तिप्रभृतीनामलंकाराणां तैः प्रसारिते जाले सत्यं तथ्यं च न जाने कुत्र निलीयते, केवलं शब्दा एव श्रूयन्ते।

बहुलशब्दप्रयोगस्य प्रवृत्तिरियमद्यापि प्राचीन–पद्धतेः संस्कृतपण्डितेषु सुतरां विलोकयितुं शक्यते एकस्यैवार्थस्य कृते केवलं मुखसुखार्थम्, पाण्डित्यप्रदर्शनाय, अलङ्कृति–प्रेमपारवश्येन वा पाण्डिताः बहूनां दीर्घदीर्घाणां शब्दानां प्रयोगं कुर्वाणाः श्रूयन्ते। भाषणात्पूर्वं 'मान्या विद्वांसः' इति वक्तव्ये ''अयि सुधीतल्लजा विद्धद्धौरेयाः विपश्चित्प्रवराः विद्यावदातवदनाः, शोभितशेमुषीकाः सुधीवरा'' इत्यादि विविधविशेषणपरम्परां प्रसारयन्तः पण्डिताः स्वल्पमर्थं दीर्घदीर्घशब्दजालेन प्रकटयन्ति इति प्रायोर्वाचीनाः समालोचयन्ति। विशेषणबाहुल्यं,

शब्दप्रपञ्चश्चास्माकं संस्कृतज्ञानां लक्षणमिव संवृत्तमस्ति। अस्माकं कवयोऽपि वहव एवं विधाः स्युर्ये परःशतं शब्दान् प्रयुज्य बहूनि पद्यानि विरचयेयुः किन्त्वर्थः स्वल्पीयानेव भवेदधिकचमत्कारजनको वा न स्यात्। नानाविधानि चित्रकाव्यानि, बन्धकाव्यानि, शब्दचमत्कारपूर्णानि एतस्या एव शब्दप्रियताया निदर्शनानि।

एतदतिरिक्तं प्राचीनैरुक्तस्यैकस्यैवार्थस्य पुनराम्रेडनं, तानेव शब्दान् प्रयुज्य नवीनान् वा शब्दानुच्चार्य तमेव प्राचीनमकमर्थं वारं वारं जनतायै बोधयितुं प्रवृत्तिः संस्कृतपण्डितानां प्रकृतेरविभाज्यमङ्गं संजातमस्ति। नवीनतत्त्वान्वेषणस्य शोधस्य च प्रवृत्तिर्नितरां विलुप्ताऽभूत्। शनैः शनैर्यथाकथञ्चित्सेयं प्रवृत्तिः पुनर्नवीनैर्विद्वद्भिःशोधपण्डितैश्चोत्थापयितुमारप्स्यते इति यद्यप्याशास्महे तथापि विषयस्यास्योपरि किञ्चन वक्तुं मां द्विजातिसुलभं चापलं प्रेरयति।

पदकृत्यम्–

इदं त्वहं निश्चप्रचं ब्रवीमि यद् यावदस्माकं भारतीयविद्यायां तत्त्वान्वेषणस्य, अर्थपरीक्षायाः, नवनवज्ञानालोडनस्य च प्रवृत्तिरासीत्, तावदेव तस्यां विज्ञानस्योन्मेषः, सर्वातिशायि तत्त्वामृतं विश्वगुरुत्वख्यापिनी महत्ता च विनिहिताऽऽसीत्। यदारभ्य च केवलं बाह्यस्वरूपस्य महत्त्वं प्रसृतं, शब्दानामेव प्रधानतया परिज्ञातव्यता ख्यापिता, जनैः सर्वमपि पुरुषायुषं केवलं शब्द-साधुत्वपरिज्ञाने एव व्यतिगमय्य स्वजीवनस्य वैदुष्यस्य चेतिकर्तव्यताऽभिमता,तदारभ्य भारतीयं विज्ञानं शनैः शनैर्लोपमाप्तम्, न किमपि नवीनमस्माभिरन्विष्टं, प्राचामपि या काचन ज्ञानसंपदासीत्साऽपि हारिता। स्व. म.म.पं. गिरिधरशर्मचतुर्वेदैः स्पष्टमुक्तं जयपुरात्प्रकाशमाप्तवतो मासिकपत्रस्य संस्कृतरत्नाकरस्य ''शिक्षाङ्के'', यदाधुनिकस्य व्याकरणशिक्षाक्रमस्य प्रवेशिका-परीक्षामारभ्याचार्यपर्यन्तमिदमेवोद्देश्यं यच्छात्रः सर्वमप्यधीत्य तदिदं जानीयात् यत् यदेव पाणिनिनोपदिष्टम् तत्सत्यम्। शतशो ग्रन्थाः केवलमिदमेव साधयितुं लिखिता व्याकरणे, ''यत्पाणिनेः सूत्रमिदं साधु। अयं शब्दः, अत्र प्रयुक्तः साधुः। नान्यः शब्दोऽत्र साधुरभविष्यत्।' 'पदकृत्य' मित्याख्या विवेचनप्रणाली एका व्याकरण-न्यायादिशास्त्रेषु सुप्रसिद्धा। तस्यामेकैकस्य पदस्य प्रयोगः किमर्थं कृतः, एतदभावे किमभविष्यत्-इत्यादि-विवादेन भूयान् समयो, बुद्धिः, मसीपत्रादिकं च व्ययीक्रियते। यद्यपि विवेचनासरणिरियं तीक्ष्णबुद्धेः प्रमाणं, मीमांसा-कौशलं च प्रकटयति तथापि महत्त्वपूर्णानन्यान् नवीनान् गवेषणीयांश्च विषयान् विहाय, केषाञ्चनोदीरितानां पदानामेव त्वगाकर्षणे, तदौचित्यसाधने च यावान् समयो, यावती तीक्ष्णा बुद्धिः, यावती च शक्तिरस्माभिर्व्यतियापिता तत्सर्वं यदि नवीनाविष्काराणां कृतेऽयोजयिष्यत तर्हि भारते बहुकालपूर्वमेव परमाणुबम्बं, वायुयानानि, धूमशकटानि च आविष्कृतानि अभविष्यन्।

आभ्यन्तरं तत्त्वं विहाय बाह्यावरणस्य मीमांसायां समययापनस्य सेयं प्रवृतिर्मध्यकाले जन्म लेभे। तदनन्तरं भारतस्य विगतं महत्त्वं न कदापि परावर्तत। अर्थस्य यदासीन्महत्त्वं, शब्दलाघवस्य याऽभून्महत्ता, सूत्रप्रणाल्यां संक्षेपेण भूयसोऽर्थस्य बोधने योऽभूच्चमत्कारः, विद्यायां, विज्ञाने च याऽभवन्महत्त्वबुद्धिस्तया खलु भारतस्यासीद् गौरवं, न खलु शब्दत्वगाकर्षणे,

इत्यस्माभिर्विस्मृतं, सर्वेष्वपि शास्त्रेषु शब्दप्रपञ्च एव महत्त्वमासादितवान्। पाश्चात्याः विद्वांसो ये खलु वेदोपनिषत्सूत्रकालिकीं भारतीयज्ञानपरम्परां दर्शं दर्शं चकिताः जायन्ते ते मध्यकालिकीं साम्प्रतिकीं च शब्दशवविदारणक्रियां, शब्दजालं च दृष्ट्वा संस्कृतज्ञानुपहसन्ति। वस्तुतो दुर्भाग्यपूर्णा भवेत्सा घटी यदा भारतीयैः शब्दानामेव चरमरूपेण बोध्यत्वं वैदुष्यस्य पराकाष्ठा च परिज्ञाता।

या हि वैदेशिकजातयो ज्ञानविज्ञानादिषु स्वकीयमग्रामित्वं विश्वस्मिन्नपि साधितवत्यस्तासु शब्दमेकमादाय, शब्दसाधुत्वं चोद्दिश्य न कदाप्येतावान् प्रपञ्चो विहितोऽस्ति। पाणिनिर्भगवान् भारतस्य सर्वमूर्धन्यो मनीषी, तमाधारीकृत्यैव भारतस्य गौरवं तावत्प्रसृतमित्यहं सर्वाधिकं जानामि, सर्वे च तदिदं मन्यन्ते। किन्तु येन पाणिनिना, येन च पतञ्जलिना जनव्यवहारं, शब्दप्रयोगं च शब्दनिर्माणापेक्षयाऽधिकं महत्त्वपूर्णं प्रख्याप्य ''उपायाः शिक्षमाणानां बालानामुपलालना'' इत्येतदर्थं जनव्यवहारे प्रचलितानां सर्वेषां (पृषोदरादीनामपि) पदानां साधुत्वस्य मार्गः प्रतिष्ठापितस्तस्यैव सूत्राण्यादाय वयं तान्येव पाण्डित्यस्य चरमोत्कर्षं मन्यामहे स्म। यदर्थं शब्दप्रयोगः क्रियते तद् वयं विस्मृतवन्तः। पतञ्जलेः प्रसिद्धं वाक्यं ''तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह, कुरु घटं कार्यमनेन करिष्यामीति, न त्वेवं शब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह 'कुरु शब्दान् प्रयोक्ष्ये', इति वयं पठामः किन्तु न जानीमो जनव्य[१]वहारस्योद्देश्यं, नवीनानां तथ्यानां बोधनायैव शब्दप्रयोगस्य शब्दनिर्माणस्य च सार्थकत्वमिति विस्मृतमस्माभिः।

पाणिनेरवदानम्–

एतस्य सर्वस्य कारणं सुबोधम्। विश्वस्य मूर्धन्येन भाषाविज्ञानाचार्येण पाणिनिना धातुभ्यः प्रत्ययोपसर्गादिप्रयोगद्वाराऽनन्तशब्दनिर्माणप्रक्रियामाविष्कृत्य या किल कामधेनुरस्मभ्यं प्रदत्ता तां वयं तत्त्वज्ञानार्थं न प्रयुञ्ज्महे किन्तु तस्या दुरुपयोगं वयं व्यर्थशब्दजालप्रसारणायां कुर्म इति संस्कृतस्य महद्दौर्भाग्यम्। पाणिनीयव्याकरणानुसारी शब्दप्रयोग एव साधुः, तद्व्यतिरिक्तः एकोऽप्यक्षरप्रयोगोऽधार्मिकः, पातकभाग् भवतीति डिण्डिमघोषः सुमहतीमुत्पातपरम्परां प्रसारितवन्तः। एतत्फलस्वरूपं जनाः केवलं पाणिनीयव्याकरणरटने एव सर्वं स्वमस्तिष्कं व्ययीकुर्वन्ति। केनचन किमपि व्याकरणाननुशिष्टं यद्युदीर्यते तर्हि तदर्थं पण्डिताः खड्गहस्ता भवन्ति, तमुपहसन्ति, प्रक्षिपन्ति, शास्त्रार्थायोग्य इति वदन्ति, मुष्टामुष्टि, कचाकचि, लगुडालगुडि चापि यदाकदा संपद्यन्ते – इति दृष्ट्वा वराकैः संस्कृताध्येतृभिः संस्कृतोच्चारणं, तद्व्यवहारश्चैव परित्यक्तः। तेन च, संस्कृतं मृता भाषा सञ्जातेति कतिपयैः प्रचार आरब्धः। भाषा केवलं पुस्तकस्थैव संपन्ना। ये च वराकास्तां प्रयोक्तुमिच्छन्ति, ते पूर्वं स्वकैशोर्यं यौवनं च टिड्ढाणञ् तिप्तस्झि– इत्यादि शब्दान् रटन्तः व्यतियापयन्ति, तदनन्तरं लक्षणैकचक्षुष्का भूत्वा एकैकं पदं, सूत्रतुलायां संतोल्य वैयाकरणेभ्यो भायं भायं, विचारं विचारं, प्रयुञ्जते। परिणामः सोयं भवति

---

१. 'लोकतोऽर्थप्रयुक्ते शब्दशास्त्रेण धर्मनियमः'। पातञ्जलमहाभाष्यम् १/१

यच्छब्दा एव तत्र दृश्यन्तं, अथः कुत्रचन गहनकन्दरायां निलीयते। पाठकोऽपि शब्दानामेव साधुत्वं मीमांसते, कोऽर्थः इति गौणरूपेणैव स विमृशति।

शब्दानामेव चरमत्वं, साध्यत्वं चेति सिद्धान्तः कुत्रचन शास्त्रे प्रत्यक्षं प्रतिपादितोऽनुशिष्टो वेत्यहं न जानामि, किन्तु व्यवहारे तदिदमेव सम्पन्नमिति सर्वेऽपि विचार-विचक्षणाः क्षणं विमर्शदृशा दृष्ट्वैव परिज्ञास्यन्ति।

वेदानां लापनम्–

वेदा अस्माकं ज्ञाननिधयः इति वयं सर्वत्र घण्टाघोषं कुर्वाणा न कदापि श्राम्यामः। तेषु वेदेषु निश्चितमेव कोऽप्यर्थो भवेत् स चार्थो महत्त्वपूर्णोऽपि भवेदिति स्वाभाविकमेव। ततश्च वेदाध्ययनस्यार्थः 'वेदस्यार्थावबोधनम्'' वैदिकपदस्य चार्थो वेदार्थज्ञ इति समुचितमेव। उक्तमपि 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।

किञ्च-''यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैंधो न तज्ज्वलति कर्हिचित्।''

किन्तु वेदस्यार्थबोधनमावश्यकमस्तीति सिद्धान्तो न जाने केन कदा विपरिवर्तितो यद्वेदस्य पदक्रमघन-जटादिनानाविधशब्दरटनमेव वेदपाण्डित्यस्य वेदज्ञानस्य च पराकाष्ठा इति विज्ञातुमारब्धमस्माभिः। गुं गुमित्यादि विचित्रध्वनिना सह हस्तप्रचालनस्य कुचेष्टाभिश्च साकं किंभूतकिमाकारपद्धत्या मुखं विदार्य शब्दरटनं वैदिकानां लक्षणं विज्ञातं वराकग्रमिजनैः। यजुषां, ऋचां च यस्तात्त्विकोऽर्थः स न विमृश्यते स्म किन्तु 'मन्त्राः' इति कृत्वाऽधिकतरं वैदिकैः संहितानां शब्दा एव रारट्यन्ते स्म, अर्थो न कदापि बोदधुं प्रयत्यते स्म। ब्राह्मणा आरण्यकाश्च मन्त्रभाष्याणां प्रख्यापनायैवोद्दिष्टा इति जानाना अपि वयमद्यापि कर्मकाण्डे वेदेप्यबाधश्रद्धापरा भूत्वा 'गणानां त्वा गणपतिं हवामहे' इत्यश्वमेधप्रसंगे समुदाहृतां शब्दावलीं गणेशस्तुतिपरां प्रख्याप्य जनान् प्रतारयामः यतोऽत्रादौ गणशब्द उदाहृतः। एवमेवादौ 'धू' इतिशब्दं दृष्ट्वैव 'धूरसि' इत्यादि रथस्य धुरमुद्दिश्य लिखितान् शब्दान् धूपज्वालनसमये मन्त्ररूपेण उच्चार्य लोकानामक्ष्णोर्धूलिप्रक्षेपं कुर्मः। दधि इति पदमादौ दृष्ट्वा 'दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः' इति 'दधिक्रावा' इत्याख्यस्य वाजिस्वरूपस्य देवस्य स्तुतिपरं पद्यं पञ्चामृते दधिप्रक्षेपस्य मन्त्रं साधयामः।

यद्यपि गच्छता कालेन विद्यावाचस्पतिमधुसूदनझासदृशाः विज्ञानवन्तो बुधाः, दयानन्दसदृशाः सुधारकाः, विश्वविद्यालयादिशिक्षासंस्थासु तत्त्वार्थविमर्शकाः विद्वांसश्च शनैः शनैर्वेदानामर्थं विविच्य गवेषणपूर्णं दृष्टिकोणं पुनरानेतुं प्रायतन्त, प्रयतमानाश्च सन्ति, ततश्चाद्य कर्मकाण्डिनामुपहसनीया एषा अर्थहीना बालचेष्टा अपि केवलमनभिज्ञप्रतारणा एवावशिष्टास्तथापि 'शब्दलिंगाः श्रुतयः' इत्यादि परम्पराघोषं प्रसार्य केवलं शब्दानेवादाय वेदस्य गभीरार्थं विकृतं

विधातुं यो बालिशानां प्रतारणावादः प्रसृतस्तस्य कृते एव दयानन्दादीनां ''पाखण्डखण्डन'' वादा घोषणीया आपतिता इत्यादि दिग्दर्शनं प्रदातुमेव मयाऽत्रोदाहृतं सर्वम्।

एवं खलु साधनरूपाणां शब्दानां साध्यत्वं प्रख्याप्य ये येऽनर्थः संस्कृतस्यार्थदग्धैर्मध्य-कालिकैस्तथाकथितैर्विद्वद्भिः कृतास्तेऽस्माकं गौरवं नितरां विलोपितवन्तः।

एतस्यैको दुष्परिणामः सोऽयमपि संपन्नो यदाधुनिकाः केचनाल्पज्ञाः, पाश्चात्यशिक्षादीक्षिताः वेदानां शास्त्राणां च वास्तविकं स्वरूपमविमृश्य मध्यकाले या केवलशब्दाम्रेडनस्य सरणिः प्रवृत्ता तामेव पश्यन्त भारतीयं धर्मं, संस्कृतिं शास्त्रपरम्परां चोपहसन्ति, खण्डयन्ति, सङ्कुचितां साधयन्ति, हास्यास्पदां प्रख्यापयितुं पत्रपत्रिकासु लेखान् लिखन्ति, पण्डितानवधीरयन्ति, संस्कृतज्ञाँस्तिरस्कुर्वन्ति, ''तान्महाभारतकालिका भग्नावशेषा'' इति परिहसन्ति, पाश्चात्यं ज्ञानं च विस्तृतमिति ख्यापयन्ति। (अत्र मयापि बहुशब्दप्रयोगः कृतः क्षम्येत विद्वद्भिः।) ततश्च नवीना सन्ततिः प्राचीनसंस्कृतिविरोधिनी जायते, पाश्चात्यविज्ञानेन प्रभाविता च भवति।

कः खल्विमानर्धदग्धान् प्रबोधयेद् यत् यां पाश्चात्यविज्ञानस्य शोधप्रणालीं, वैज्ञानिकं दृष्टिकोणं, तत्त्वविमर्शप्रवृत्तिं, तथ्यमीमांसासरणिं च यूयं महतो साधयथ, साऽस्माकं भारतादेव तैः शिक्षिता? यद्यहमद्य तदिदं ब्रवीमि तर्हि नवीना मामुपहसिष्यन्ति। अतो यद्य-हमांग्लभाषामाध्यमेनैव तानेतान् तदिदं सर्वं बोधयितुं प्रयतिष्ये तर्हि मन्ये ते श्रोतुं सन्नद्धा भवेयुः, नान्यथा।

अद्य तु गवेषकाः कथयन्ति यत्पाणिनिना पण्डितेभ्यो या शब्दनिर्माणप्रणाली प्रदत्ता, तस्य दुरुपयोगस्तैःकृत इति। बहुष्वंशेषु सत्यमिदमपि।

शब्दसाधुत्वम्–

साधव एव शब्दाः प्रयोक्तव्या इति नियमस्तु सम्यगेव किन्तु शब्दसाधुत्वार्थं वैदेशिकानां शब्दानां, 'देशी' शब्दानां च सत्यामप्यावश्यकतायां प्रयोगाकरणं, शब्दरटनाक्रमे चार्थस्य विस्मरणं तु नितरामवाञ्छनीयम्। एवमेव व्यकरणपाठनप्रणाल्यां यत् केवलं सूत्रघोषणं प्राक् प्रारभ्यते, तदनन्तरं 'साधनिकाऽऽख्या विवेचनप्रणाली च प्रचाल्यते तदपि न श्रेयस्करम्। एतस्य फलमिदं भवति यच्छात्रः केवलं सूत्रोपस्थितिं संपादयति, शब्दानां निर्माणस्य प्रक्रिया तेन विस्मर्यते! आङ्गलानामेकः सिद्धान्तोऽस्ति यद्व्याकरणस्य नियमानां कण्ठस्थीकरणापेक्षया व्यकरणस्य संस्कारः, स्वाभाविकं परिज्ञानं च श्रेयस्करम्। Grammar Sense is more important than grammar. किन्त्वस्माकं वैयाकरणाः व्याकरणलापनमेव (Grammar) जानन्ति, न व्याकरणम् (Gramamr Sense)।

अपरा प्रवृत्तिरस्ति शब्दानां साधूकरणस्य। आसीन्मध्यकालिकपण्डितानां प्रवृत्तिर्यद् यदि ते विदेशिशब्दानां प्रयोगं चिकीर्षन्ति तर्हि तेषां संस्कृतीकरणं विधाय पाणिनीयव्याकरणसंमतत्वं

पूर्वं साधयन्ति स्म। ध्वनिसाम्याधारेण एवंविधशब्दानां निर्माणं प्राचीनपण्डितानां मनोविनोदस्य साधनमभूत्।

संभवतो विदितं भवेद् भवतां यत् Max Muller इति विदुषो नाम 'मोक्षमूलर' इति संस्कृतीकृतम्। Keilhorn इत्यस्य संस्कृतं स्वरूपं 'केलिहरिणः', इति, पीटर्सन इत्यस्य पीतरशनः, मेकडॉनल इत्येतस्य मुग्धानल इति, एलक्जेंडर (Alexnder) इत्यस्य अलक्ष्येन्द्र, अलर्कसान्द्र इति वा कृतमभूत्पण्डितैः।

नूतनशब्दपरिकल्पनम्–

इदमत्र निवेदयितुमुचितं यदेवंविधानां शब्दानां निर्माणं न कदाचिदपि हानिकरम्। शब्दचमत्कारेण सह वाक्यालंकरणाय, पाणिनीयपद्धतेः सामर्थ्यसूचकाय च तदिदं सर्वं गौरवास्पदमेव। किन्तु एवंविधान् शब्दान् निर्माय– 'वैदेशिका अमी शब्दाः संस्कृतस्य एतेभ्यः शब्देभ्य एवोत्पन्नाः इति प्रख्याप्य स्वभाषायाः संस्कृतेश्च मुधा गौरवानुभूतिर्नितरामवास्तविकी। भाषावैज्ञानिकाः कथयन्ति यद् बहुधा एवंविधैः प्रवादैस्तत्त्वगवेषणायां बाधा भवति। सर्वे जानन्ति यत्संस्कृतस्य मूलभूता याऽऽर्यभाषाऽऽसीत्, तस्याःशब्देभ्य एव जेन्द–ग्रीकलैटिनादिभाषाणां बहवः शब्दा विकृत्या निष्पन्नाः, ततस्ते आङ्गलादिभाषास्वपि गताः। किन्तु कतिपये पण्डिताः बहूनां आंगलभाषाशब्दानां प्रत्यक्षमेव संस्कृतनिष्पन्नत्वं साधयितुं नियर (Near) इत्यादिशब्दानां 'निकट' इत्यादि शब्दोत्पन्नत्वं घोषयन्ति। अनेन 'गेहेनर्दी, गेहेशूर' इति दिशा स्वमनस्येव गौरवानुभवः कामं संपद्येत, किन्तु भाषाशास्त्रीयरीत्या वास्तविकः शोधो न कर्तुं शक्यत इति निश्चय एव। मत्पितृचरणाः स्व. भट्टमथुरानाथशास्त्रिणोऽपि ध्वनिसाम्यमाधारीकृत्य बहूनां वैदेशिकशब्दानां संस्कृतीकरणमभिरोचयन्ति स्म, 'बाइसिकल' (Bicycle) इत्यस्य 'वायुशकल' इति, खिड़की इत्यस्य 'खिड्क्किका' इति, मोटर इत्यस्य मस्तर, इत्यादिदिशा। परन्तु ते कथयन्ति स्म यदेवं विधाः प्रयत्नाः विदुषां विद्याविनोदः, मस्तिष्कव्यायामश्चैव तिष्ठन्त्विति वाञ्छनीयम्' यदि 'शब्दा इमे वैदेशिकशब्दानां मूलभूता' इति प्रचारेण वयं गौरवानुभवं कर्तुं वाञ्छामस्तर्हि वराकाणां भाषावैज्ञानिकानां शोधविदुषां च संमुखे महत्काठिन्यं भ्रमश्च समुत्पत्स्येते।

सर् यदुनाथसरकाराख्यो विद्वान् (यो हि जादुनाथ इति प्रसिद्धोऽभूत्) यदा मोगल–मरहट्ठाकालस्य भारतेतिहासे शोधमारभत तदा शिवाजीकालिकः पण्डितः संस्कृतीकृतान् पारसीकशब्दान् वीक्ष्य नितरां चकितोऽभूत्। शब्दा एते संस्कृतात्पारसीकैर्गृहीताः, पारसीकेभ्यो गृहीत्वा पण्डितैर्वा संस्कृतीकृता इति वराकोऽयं नापारयज्ज्ञातुम्। श्री सरदेसाईप्रभृति संस्कृतज्ञैर्बोधितोऽयं शब्दनिर्माणप्रवृत्तिं संस्कृतज्ञानां भृशमक्रोशत् अवदच्च यदियं प्रवृत्तिस्तत्त्वशोधने नितरां बाधिका भवतीति।

एवंविधाःप्रयत्नाः प्रायः शतपञ्चाशद्वर्षपूर्वं सर्वत्रैवाऽभवन्नित्यधुना स्मरामि। जयपुरस्य विख्याताः व्याकरणविद्वांसः श्रीशिवदत्तशर्ममहाभागाः ('लट्टूजी' इत्युपाह्वाः) कोषमेकं

निर्मातुमारब्धवन्तो यस्मिन् पारसीक-उर्दू-अंग्रेजी-प्रभृति-भाषाणां शब्दा ध्वनिसाम्यमाधारीकृत्य संस्कृताः, तेषां व्याकरणनिष्पन्नत्वं च साधितमभूत्। 'खर्च' इति शब्दः 'खं शून्यं रचयतीति खरचः' (व्ययः), 'जोरु' इति शब्दः 'जयो उरु यस्याः सा (पत्नी)' एवं तत्र शब्दा आसन्।

अपर एकः संस्कृतकोशः 'शब्दप्रदीप' इति नाम्ना श्रीतुलानन्दझाव्याख्यातः श्रीहेमपतिशर्मनिर्मितः श्रीश्यामानन्दझामहोदयेन संपादितो दरभंगातः प्रकाशितो यत्राधुनिकानां सर्वेषां शब्दानां संस्कृतानि रूपाणि प्रदत्तानि। अत्रापि बहूनाम् उर्दू-आङ्गलशब्दानां ध्वनिसाम्याधारेण संस्कृतीकरणस्य प्रयत्नः परिदृश्यते, एग्रीमेंट (Agreement) अग्रमंत्र, बन्दूक-बंधूकम्, मेलट्रेन-मेलत्वरेन इत्यादि। अत्र हि बहवः शब्दा एवं संस्कृतीकृता यद्भ्रमो भवति यावदेते शब्दा आङ्गलादिभाषाशब्दानां मूलं, अथवाऽन्यभाषाशब्दानां मूलमाश्रित्य निर्मिताः। यथा बेलन-वेल्लनम्।

शब्दसंकलनस्य दिक्-

यद्यपि नवशब्दनिर्माणप्रयत्नाः संस्कृतस्य शब्दभाण्डागारं समेधयन्ति, संस्कृतस्य शब्दनिर्माणप्रणालीं च प्रखरयन्तीति स्वागतार्हा एव यतो हि डा० रघुवीरादिविद्वद्भिः परोलक्षं शब्दा एवमेव निर्माय भारतसर्वकाराय प्रदत्ताः भाषावैज्ञानिकदृशाप्येवं जनव्यवहारद्वारा बहवः शब्दाः कोषे स्थानं लभन्ते। परन्तु ध्वनिसाम्यमत्र मा भूदाधारः। केवलं ध्वनिसाम्यमादाय 'अर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येन' इति प्राचामुक्तिदिशा केषाञ्चन शब्दानां प्रसह्य निर्माणं न तत्त्वावगाहि। अर्थच्छायामादाय, तत्सदृशार्थी धातुप्रकृतिमाधारीकृत्य, समानार्थकान् प्रत्ययोपसर्गांश्च संयोज्य लोकव्यवहारानुरोधेन, विविधानां शब्दांगानां निर्माणं, तेन प्रक्रियागतानां शब्दानां निष्पत्तिरिति भाषाविज्ञानानुमोदिता शब्दनिष्पादनसरणिः। डा. रघुवीराख्येन विदुषा सेयमेव सरणिराधारीकृता, आधुनिक-प्रयोगोचिताः भूयांसः शब्दाश्च निष्पादिताः भारतीय-व्याकरणस्य च गौरवं समेधितम्। एतेन संकलितः 'आंग्लहिन्दीकोषः' वस्तुतोऽद्यावधि प्रकाशितानां सर्वेषामपि कोषाणामुत्तमः आंग्ल-संस्कृतकोष इति मदोऽयं विनम्रं मतम्। अहं प्रार्थये यत्संस्कृतपण्डिताः संस्कृत्कोषमिमं पश्यन्तु, तत्र चानुसृतां शब्दनिर्माणशैलीं दृष्ट्वा भारतीयव्याकरणगौरवमनुभवन्तु, भाषाशास्त्रानुसारिणीं वैज्ञानिकीं च शब्दनिष्पादनप्रणालीं प्राच्यपाश्चात्योभयपद्धतिपरिज्ञानानन्तरं विमृशन्तु।

एवं खलु तत्वदृशा, शोधसरण्या, वैज्ञानिक्या पद्धत्या शब्दानां विमर्शः, निर्माणं, निष्पादनम्, अर्थावगमश्च भारतीयशब्दशास्त्रस्य लुप्तं गौरवं पुनर्विश्वस्मिन्नपि विश्वे प्रसारयितुं क्षमेत, संस्कृतविद्वांसोऽपि विश्वजनीनं भाषाशास्त्रं स्वकीयगहनाध्ययनादिभिः समेधेरन्, संस्कृतभाषा भारतस्य च मूर्धानं पुनरुन्नतं विदधीरन्।

समागतः सोऽयं समायो यदा वयमस्माकं प्रवृत्तिमधिकाधिकं वैज्ञानिकीं तत्वविमर्शिनीं च विदधीमहि। मध्यकालिकीमर्धदायां-भाषा-परिपाटीं च परित्यजेम शब्दप्रियत्वं न खलु दोषः, परन्त्वर्थावगमपुरःसरं नवनवतत्वान्वेषणस्योद्देश्येन शब्दानां समुचितः प्रयोगः साधीयान्। केवलशब्दजालप्रसारणं तु वाच्यतामेवावहेदित्यप्यस्माभिरवधेयम्।

कालिदासीयाः केचनापत्यप्रत्ययान्ताः

■ डॉ. जयकान्तसिंहशर्मा

रससिद्धानां कवीनां वाचि तात्पर्यानुकूलाश्शब्दाः स्वयमहमहमिकया समवेता भवन्ति। तत्र यथायथं कृदन्ततद्धितान्ताख्याताव्ययादयो भाषाप्रवाहे स्वयं प्रवहन्ति। नवनवोन्मेषशालिनी बुद्धिः प्रतिभा, अनुकूलशब्दार्थोपस्थितिः प्रतिभेति प्रतिभावतां काव्यानि दृष्ट्वा प्रतिभालक्षणद्वयमतः कृतमलङ्कारशास्त्रे। अत एव प्रतिभैव काव्यकारणम्, सा स्वाभाविकी आहार्या च, तत्र द्वितीया देवादिप्रसादलभ्या व्युत्पत्त्यभ्यासजन्या चेति द्विविधेत्युक्तम्। काव्यपरिशीलकैर्भावकैः कृदन्ततद्धितान्तादिशब्दप्रयोगसौष्ठवं समालोच्यते। रमणीयार्थप्रतिपादकः शब्दः काव्यमस्तु रसात्मकं वाक्यं वा अन्यदपि किमपि तल्लक्षणं भवतु सर्वत्रानुकूलशब्दार्थोपस्थितिरपेक्ष्यते, अन्यथा काव्यत्वहानिः स्यात्, काव्यत्वे नष्टे कुतस्तत्प्रयोजनावाप्तिः? किञ्च काव्यस्य यन्मुख्यं प्रयोजनद्वयं यच्च तत्काव्यमन्येभ्यश्शास्त्रेभ्यो व्यतिरेचयति, विगलितवेद्यान्तरसम्पर्कशून्यानन्दरूपं कान्तसम्मितोपदेशरूपञ्च यत् तादृशोचितानुकूलतात्पर्यप्रतिपादनासमर्थात्काव्यात् कथमपि न शक्यते लब्धुम्। तथाशब्दार्थोपस्थितिः कविशक्तिं द्योतयति काव्यञ्च तदात्मानन्दसम्पृक्तं साधयति। अत एव शास्त्रे दोषाः गुणाश्च काव्यानां विविच्यन्ते। उदाहरणाय कालिदासस्य श्लोकोऽयं काव्यशास्त्रिभिः समालोचितः "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः;[१] इह या शोचनीयता प्रतिपाद्या सा पिनाकिशब्दादिन्नन्तान्न सिद्ध्यति पिनाकधारिणः शिवस्यारिष्टशमनार्हतया स्पृहणीयत्वात्। 'कपालिनः' इति पदात्तु सिद्ध्यति, अपूतकपालधारिणस्तस्य काकतालीयस्पर्शोऽपि शोच्यतां नयति प्रार्थनालभ्यसमागमस्तु नितराम्। 'कपालिनः' इति पदस्यानुगुणत्वम्। इत्थम्भृतो विचारः काव्यशास्त्रेषु सर्वत्र लभ्यते प्रत्ययव्यङ्ग्यता चोद्घाट्यते। पिनाकिना भग्नमनोरथा सती[२]त्यत्र तु पिनाकिशब्दस्यानुगुणत्वम्, पार्वती भग्नमनोरथा कामदहनाज्जाता, दहनं यद्यपि नेत्राग्निना जातम्, तथापि पिनाकिसमक्षं गतस्य कामस्य नाशस्तु निश्चित एवेत्याद्यर्थस्तेन पदेन ध्वन्यते। इत्थं काव्यशास्त्र उपसर्गकर्मप्रवचनीयप्रातिपदिकधातुकारकतिङ्लप्रत्ययादीनां प्रयोगविशेषेण व्यञ्जकता वक्रता रसाद्यनुगुणता च प्रतिपादिताः। मयात्र निबन्धे केषाञ्चनापत्यप्रत्ययान्तानां कालिदासेन प्रयुक्तानां वैशिष्ट्यमाविष्कर्तुं प्रवृत्तम्।

तद्धितान्तप्रयोगाः दिनानुदिनं क्षीणाः जाताः, इदानीन्तनानां जनानां प्रवृत्तिः कृदन्ते सुबन्ते कदाचित्तिङन्ते। रचनापि कृदन्तबहुला, विततमपि तत्प्रकरणं साम्प्रतमुपेक्षितम्, विरल एव तदधीते तद्वेद। तत्प्रत्ययस्यार्थबाहुल्यं क्षेत्रं च विततं को न स्तवीति। बहवो भावास्तत्प्रयोगं विना न यथायथं प्रतिपाद्यन्ते, समांसमीना धेनुरुपास्या

---

१. कुमारसम्भवम् ५.१

२. कुमारसम्भव ५.१

मुक्तिश्चत्याज्येति ललितप्रयोगस्तु तदधीन एव । कान्दिशीका इमे भवन्तीत्यस्य स्थाने वाक्यप्रयोगेन कथङ्कारं निर्वाहः स्यात् । अथ किं तल्लक्षणमिति चेत् उच्यते तद्धिताः ४-१-७६ इत्यधिकारेऽष्टाध्याय्यां विहिताः प्रत्यया-स्तद्धिता इति । अयमधिकारो यूनस्तिः ४-१-७७ इत्यत आरभ्यापञ्चमाध्यायसमाप्ति, तथैव व्याख्यानात्स्वरितत्व-प्रतिज्ञानाच्च । पाणिनिना पृथक् सञ्ज्ञामकृत्वाधिकारेणैव ते सूचिताः । तद्धिता इति महासञ्ज्ञाकरणन्तु तेभ्यः प्रयोगेभ्यो हिता इत्यन्वर्थलाभाय, तेन यथाप्रयोगमेव स्युः । अतो दाशरथिः दाशरथ इत्युभयं साधु वासुदेवस्तु प्रयोक्तव्यः न तु वासुदेविरिति तथाप्रयोगादन्यथा चाप्रयोगात् । कियन्मात्रं जलं विप्रेति प्रश्ने मात्रचः प्रयोगं श्रुत्वा साधारणो जनस्तमेव प्रत्ययं प्रयुञ्जीत । किन्तु ऊरुदघ्नं नराधिपेति विप्रस्य दघ्नचः प्रयोगात् तस्य महावैयाकरण-त्वमनुमाय भोजेन लक्षं मुद्राणां दत्त्वा स समादृतः । एतेन ज्ञायते यत्तत्कालेऽपि तद्धितप्रयोक्तारोऽल्पीयांसोऽभव-न्निति । कठिनश्च तद्धितप्रयोगः, पटुपटुर्देवदत्त इत्यत्र धर्मलुप्ता तद्धितगोपमा प्रकारे गुणवचनस्येति सादृश्ये द्विर्भावविधानादित्यपय्यदीक्षितः । जगन्ना[१]थस्तु अत्र वाचकोऽपि लुप्त इति वाचकधर्मलुप्ताया इदमुदाहरणम् । न चात्र वाचकस्य द्विर्भावस्यैव सत्त्वान्नास्ति लोप इति धर्ममात्रस्येति वाच्यम् द्विर्भावस्य सादृश्यवाचकत्वोक्तेर्महा-भाष्यकैयटादिविरुद्धत्वात् । द्विर्भावः सादृश्यस्य द्योतको न वाचकः । एवञ्च पटुपटुः (पटुसदृशः) इति धर्मवाचक-लुप्तोदाहरणं न धर्मलुप्ताया इत्याह । रूपयौवनलावण्यस्पृहणीयतराकृतिः पुरतो हरिणाक्षीणामेष पुष्पायुधीयतीत्यत्र पुरतः इति तद्धितप्रयोगोऽपय्यदीक्षितकृतोऽपशब्द इति जगन्नाथः,[२] नगरवाचिनः पुरशब्दात्त-सिलि हरिणाक्षीणां नगरादित्यर्थस्यासङ्गतेः । न हि पूर्ववाचकः पुरशब्दः क्वापि श्रूयते, पूर्वशब्दात्तु 'पूर्वाध-रावराणामसिपुरधवश्चैषामित्यसौ पुरादेशे पुर इति भाव्यम् न तु "पुरतः" इति । अत एव 'अमुं पुरः पश्यसि देवदारु[३]'मिति कालिदासः । इत्थं जगन्नाथेन पुरत इति प्रयोगस्यासाधुत्वं प्रदर्शितम् परन्तु नागेशोऽत्राह-नात्र तसिल् किन्तु आद्यादित्वात्तसिः, पुरत इति निपातोऽप्यस्ति अतो नात्र प्रमादो दीक्षितस्य । अत एव इयञ्च तेऽन्या पुरतो विडम्बनेति[४] कालिदासः, 'पश्यामि तामित इतः पुरतश्च पश्चात्' इति भवभूतिश्चेति केचित् । अन्ये तु दक्षिणोत्तराभ्यामतसुच् इत्यत्रतसुचैव पुंवद्भावेन सिद्धेऽतसुज्-विधानमन्यस्मादपीति ज्ञापनायेति तेन पचाद्यज-न्तात्पुर शब्दात्तस्मिन्निष्टसिद्धिरित्याहुः । वस्तुतस्तु पुर अग्रगमने इति चौरादिकाण्णिजभावे इगुपधलक्षणे के सार्वविभक्तिस्तसिरिति बोध्यम् । इत्थं यत्र तद्धितप्रत्ययोऽसाधुरित्येकेनोक्तं तत्रान्यैः साधुत्वं दर्शितमिति तद्धि-तप्रयोगस्य काठिन्यं स्पष्टम् । अयमपि तत्प्रयोगे ह्रासहेतुः । अस्तु, प्रकृतमनुसरामः

सत्स्वपि नामान्तरेषु प्रत्यासन्नप्रकृतिमहिम्नापत्यप्रत्ययप्रयोगेन न केवलं तत्र कश्चिद्विशेषश्चमत्कार आविष्कृतो भवति, अपितु तादृशेष्वन्यतमप्रयोगद्वारा किञ्चिद्विलक्षणमेवानुगुण्यमुन्नीयते । तद्यथा इक्ष्वाकोरपत्यानि तु इक्ष्वाकवः एकत्वे पुनरैक्ष्वाक इति । बहुत्वेऽपत्यप्रत्ययस्य लुक्, एकत्वे निपातनाट्टिलोपः । जनपदशब्दात्क्षत्रि-यादञित्यञ् । कालिदासेनोभयमप्युपन्यस्य प्रयोगभेदः प्रादर्शि । इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धय इत्यत्र[५]

---

१. रसगङ्गाधरः पृ. २२४

२. रसगङ्गाधरः पृ. २२६

३. रघुवंशम्, २-३६

४. कुमारसम्भवम्, २-७०

५. रघुवंशम् १-७२

वसिष्ठस्य कुलगुरुत्वमामूलादिति स्फोरयता ककुत्स्थप्रभृतीनां सङ्ग्रहायोपन्यस्तम् । तेषु सर्वेषु विशेषतोऽनुगृहीत इक्ष्वाकुरेवेति तदुल्लेखः, यश्च वसिष्ठप्रसादाच्छतं पुत्राणां लेभ इति तादृशसामर्थ्यवति भवति विद्यमाने ममैकोऽपि नेति स्वात्मवेदनावेदनं तद्वश्यत्वञ्च पुरस्कृत्य दयनीयत्वमुपक्षिप्तम् । एवमेव गलितवयसामिक्ष्वाकूणामित्यत्र सदाचारस्यानुवर्तनस्यापरिहार्यत्वबोधनाय तत्पदम् । ननु इक्ष्वाकुरघुपदयोर्जनपदवाचित्वाभावात्प्रागदीव्यतीयेऽणि तद्राजत्वाभावात्तस्य कथं बहुषु तस्य लुगिति चेच्छृणु अत्र तदपत्ये लक्षणया प्रयोगः । ददर्श कञ्चिदैक्ष्वाकस्तपस्यन्तमधोमुखमित्यत्रैक्ष्वाकपदेन रामस्येक्ष्वाकोखि वर्णाश्रमधर्मपालनाभिसन्धिर्ध्वन्यते तद्यथा इक्ष्वाकुः स्वतनयं धर्मभ्रष्टं विज्ञायाचिरेण तत्याज तदपत्यत्वेनासावपि कथं कमप्यतिमर्यादं सहेतेति व्यज्यते । यथोक्तं श्रीमद्भागवते—

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाभिहितं नृप ।
देशान्निस्सारयामास सुतं त्यक्तविधिं रुषा ॥[१]

राघवपदगम्यार्थस्तु नितरामस्माद्भिन्न एव । लङ्घति ज्ञानसीमानमिति गत्यर्थकाद्धातोः रघुपदनिष्पत्तिः । यथोक्तं स्वयं कविना—

श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः ।
अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ॥[२] इति

एवमाप्तवचनात्स पौरुषं काकपक्षधरेऽपि राघव[३]इत्यादिषु राघवपदप्रयोगेन रघोरपत्यतया धैर्यवीर्यप्रतापत्यागास्तिक्यादिधर्मसहस्रं बोध्यते तद्यथा रघुर्देवेन्द्रस्य महीधरेष्वसह्यं वज्रं स्ववक्षसि मोघीकृत्येन्द्रपदाभिलाषिणं स्वपितरं स्वर्गाद् मोक्षाय प्रवर्तयति तद्वत्तदपत्यभूतेषु रामादिष्वपि तथात्वस्फोरणाय राघवपदोपन्यासः । राघवाय तनयामयोनिजामित्यत्र तु सत्क्षत्रियकुलप्रसूतत्वं रामस्य विज्ञाप्य तादृशकन्यापरिणययोग्यतां सूचयति कविः । रावणावरजा तत्र राघवं मदनातुरेत्य[४]मित्यत्र यथास्य पूर्वजः ककुत्स्थो देवेन्द्ररूपवृषांसे स्थितो बभौ तथासाविदानीमित्यपि लक्ष्यते । ककुदि वृषांसे तिष्ठतीति व्युत्पत्त्या लोकोत्तरपराक्रमधारणात्पुरञ्जयो नाम राजा तत्पदेन गीयते । अतः कालिदासोऽप्याह—काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेन्द्रा[५] इति । एवमेवायोध्यां प्रत्यागच्छन्रामोऽपि पौरैर्दृश्यमानस्तेनैव पदेन वर्ण्यते-काकुत्स्थः स्तिमितजवेन पुष्पकेणेति । अत्रापि विमानमारूढस्य तस्य स्वर्गादवतरता दैत्यजयिना ककुत्स्थेन रूपगुणक्रियादिभिः साम्यात्काकुत्स्थपदं काामप्यपूर्वां चमत्कृतिं भजते । नातः परमिक्ष्वाकुवंश्यानां गौरवाधायि पदमिति विमृश्य रामरावणयुद्धवर्णनावसरे दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः[६] इत्यत्रापि तदेव पदमुपन्यस्तम् । दाशरथ्यादिपदबोद्धव्यास्तु तद्व्यतिरिक्ताः । दशसु दिक्षु प्रस्थितो रथो यस्येति व्यधिकरणेन बहुव्रीहिना तन्निष्पत्तिः । एतादृशार्थवत्तायां रघुवंशस्थं यशसा दिक्षु

---

१. श्रीमद्भागवतमहापुराणम् ९-६-१०
२. रघुवंशम्-३-२१
३. रघुवंशम् ११-४२
४. रघुवंशम्-१२-३२
५. रघुवंशम् ६-११
६. रघुवंशम् १२-७२

दशस्वपि श्रुतमिति पद्यमेव[१] मानम् । यद्वा दशेन्द्रियाणि नियाम्यतया रथो यस्येति व्युत्पत्त्या तस्य विजितेन्द्रियत्वेनात्मवत्त्वं सूच्यते । असावपि भावः समधिगम्य समाधिजितेन्द्रिय इत्यादिना समर्थितः कविना । तस्यापत्यमित्यर्थेऽत इञ् इतीञ् । सोऽहं दाशरथिर्भूत्वेति[२] पद्ये दाशरथिपदेन गुणाधिक्यात्तस्य परमात्मपितृत्वयोग्यता सूचिता, यथोक्तं स्वयं कविना—

अनेन कथिता राज्ञो गुणस्तस्यान्यदुर्लभाः ।
प्रसूतिं चकमे तस्मिन्त्रैलोक्यप्रभवोऽपि यत् ।।[३]

एतेन तदानीं मर्त्यलोके दशरथस्य विद्यमानत्वात्स्वावतरणे क्षिप्रतां प्रकाश्य भगवतः परदुःखप्रहाणेच्छाप्राबल्यं ध्वनितम् । अतोऽत्रैक्ष्वाकादिपदैरपि नेष्टार्थलाभः । दाशरथिर्भूत्वेति स्वस्मिन्मानवत्वमारोप्यावतरिष्यामीति गम्यते, भूत्वेति गर्भवासादिकं सर्वं प्रातीतिकं न तु पारमार्थिकमिति बोधनाय । दाशरथिराददे धनुरिति[४] दाशरथिपदं "यो दशरथो देवैरर्थितो दैत्यानवधीत् युधि दुर्जयस्तदपत्यतया रामेऽपि विलक्षणधन्वित्वं द्योतयितुम् । अत एव एको दाशरथिः कामं यातुधाना सहस्रश इत्यत्रापि तत्प्रयोग एवौचितीं बिभर्ति । साक्षाज्जमदग्निपुत्रस्य परशुरामस्य कृते गोत्रापत्यप्रत्यययोगेन निष्पन्नस्य भार्गवपदस्य प्रयोगोऽपि यथाप्रसङ्गमेव सौष्ठवं धत्ते । तद्यथा-बालसूनुरवलोक्य भार्गवं स्वां दशाञ्च विषसाद[५] पार्थिव इत्यत्र भार्गवपदं सर्वथा युज्यते । सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृत इतिवचनाद् भृज्जतीति क्विपि भृक् ज्वाला तया सहोत्पन्न इत्यु इति निर्वचनाच्च, यः परमकोपनो भृगुर्निदोषस्यापि वक्षो विष्णोर्निदयं प्रजहार पादेन, तदपत्यमित्यसावपि तथैव स्याद्दुरतिक्रम इति व्यज्यते । अतस्तेन चण्डत्वं दुर्निवारत्वञ्च लभ्यते, अतो बालसुनोस्तस्य विषादोऽपि सङ्गच्छते हनुमदादिपदमुपेक्ष्य मारुतिपदप्रयोगेन कविः शब्दार्थचमत्कारविशेषमलौकिकं पुरस्करोति । तत्रेयं कालिदासपदधोरणी मारुतिः सागरं तीर्णः संसारमिव निर्मम[६] इति । मरुत्पदात्प्रज्ञादित्वात्स्वार्थेऽणि मारुतो वायुस्तदपत्यं पुमान् मारुतिर्हनूमान् । अत्रात्मा वै जायते पुत्र इति पितृतुल्याप्रमेयबलादिसूचनाय मारुतिरिति पदमुपात्तम् । यथोक्तं रामायणे—

त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ।
पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर[७] ।।

इति मारुतिः सागरं तीर्ण इत्यत्र मारुतो यथा स्वतन्त्रस्तथैवायमपि अप्रतिहतगतिरिति ध्वन्यते । अत्र हि सीतादिदृक्षया प्रस्थितस्य तस्य विघ्नभूतसिंहिकादीनां संहारपूर्वकं स्वामीष्टसाधनमेव निदर्शनम् । स मारुतिसमानीतमहौषधिहतव्यथ इत्यत्राप्ययमेव भावः । म्रियते प्राणी यस्याभावादिति व्युत्पत्या मृङ् धातेरुति प्रत्यये निष्पन्नस्य मरुच्छब्दस्य शरीरिणां प्राणरूपत्वं सिद्ध्यति अत एव यया प्राणिनः प्राणवन्त इति कविवचनं सङ्गच्छते, अतस्तद-

१. रघुवंशम्, ८-२९
२. रघुवंशम्-१०-४४
३. रघुवंशम्- १०-४३
४. रघुवंशम्, ११-४४
५. रघुवंशम् ११-६७
६. रघुवंशम्, १२-६०
७. श्रीमद्वाल्मीकिरामायणम् ५-१-१२०

पत्यतयात्र मारुतेरपि जीवप्राणरक्षकत्वं ज्ञाप्यते यथोक्तं वाल्मीकीयेअस्मिञ्जीवति वीरे तु हतमप्यहतं बलम्। हनुमत्युज्झितप्राणे जीवन्तोऽपि मृता वयमिति[१] वस्तुतस्तु मारुतस्य स्वभावः प्रकृत्यैवानुष्णाशीतः। स सर्वदा दुःखादिरहितास्तिष्ठति। अत एव तादृशसीतान्वेषणकार्यं राक्षसादीनां वधं लंकादहनं च कृत्वा वानराणां समक्षं वर्णनकाले राघवप्रसादेन मयैतदुपकल्पितमित्याह। किञ्च मारुतो यथान्यस्य प्रभावं नीत्वा प्रवहति तथैव मारुतिरन्यैरुत्साहितो भूत्वा कार्ये प्रवर्तत इति लोकप्रसिद्धम् इति गुरवो मिश्रचरणाः। अतो मारुतिपदप्रयोगेन पितुः सर्वे गुणा अत्र सन्निकृष्टा इति स्पष्टम्! एकस्यैव शब्स्योभयथा प्रयोगस्य चमत्कारविशेषं मनसि निधायोभयार्थसाहचर्यकौतुकं प्रस्तौति कविः, ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ[२] द्विज इति। अत्रैन्द्रिः काकजयन्तयोरिति कोषादुभयार्थयोरेकत्रान्वयो दर्शितः। एतेनेन्द्रापत्ये काकरूपे जयन्ते कामित्वपरोन्नत्त्यसहमानत्वाद्यनेके भावा व्यज्यन्ते। यदा-कदा योगरूढपदप्रयोगेऽपि तच्छक्तेरवयवार्थमात्र एव नियन्त्रितत्वादुक्तार्थप्रतीतये समुदायार्थवाचकरूढपदमेवोपन्यस्यते, अत एव ऐन्द्रिपदेनैव काकार्थबोधसम्भवेऽपि तदर्थबोधाय द्विज इति विशेषणं पृथगुपात्तम्। कः पौरवे वसुमतीमि[३]त्यभिज्ञानपद्ये पौरवपदं तथैव गौरवं धत्ते। पुरोरपत्यत्वेन दुष्यन्तोऽत्र पौरवः। अत्र मयीत्यनुक्त्वाऽविकत्थनत्वं द्योतयता तेन पुरुवंश्यानां रक्षणकलाविचक्षणत्वं ज्ञाप्यते तच्च पिपर्त्तीति पुरुरिति व्याकृत्त्यापि समर्थ्यते। पौरव! रक्ष विनयमित्यत्र तत्पदलभ्यार्थं भावयन् राघवभट्ट इत्थमाह रतेरनिर्वाहात्पौरवेति सम्बुद्धिरिति, पुरुप्रभृतीनां चारित्र्येण शौर्येण दानेन पावित्र्येण रूपेण स्यादिति। पश्य ते कुलव्रतम्, क्व च प्रवर्तनं ते। तथा पुण्यचरितानामपकीर्तिर्न ते केवलमिति ध्वन्यते। एतेन शकुन्तलायास्तद्वंशवेत्तृतया स्वात्मानुरूपता सूचिता। अत एव, "पौरव असंशयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीति एवागच्छतीत्यत्रापि तत्पदसम्बुद्धिः। सुरभेरपत्यं स्त्री सौरभेयी। स्त्रीभ्यो ढक्। इयं सागरमन्थनोद्गताया: सुरभेः पुत्री वसिष्ठहोमधेनुर्नन्दिनी। तां सौरभेयीं सुरभिर्यशोभि[४]रित्यत्र सौरभेयीपदेन गन्धवत्या गोरूपधरया पृथिव्योपमयन् चतुःसमुद्रसारभूतानि रत्नान्यपि दोग्धुमलमिति व्यञ्जयन् अस्या रक्षणं पृथिवीपालनवद् दुष्करमेवेति ज्ञापयन् उर्वीरक्षणमिवात्युग्रं व्रतान्तरमित्युपदिशति महाकविः। मातृतुल्यतान्त्वाह स्वयं नन्दिनी-न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्न मिति। अत्र वाक्यभेदेनान्वये सुरभिरिव सौरभेयीं जुगोपेतिबोधाद्राज्ञोऽप्रमत्तता ध्वन्यते।

एवमेव पर्यायतया प्रतीयमानेषु तात्पर्यविन्यासवैदग्ध्यदृशान्यतरप्रयोगेन किमपि भाववैचित्र्यजनितं रहस्यमाकलितं भवति। इत्याख्याते पवनतनयं मैथिलीवो[५]न्मुखी सेति मेघदूतपद्ये मैथिलीपदगम्यं भावं स्फोरयन्पूर्णसरस्वती आह—मैथिलीपदेन न तावत् सीरध्वजस्यैवापितु मिथिलाभवानामतीतानागतानां राजर्षीणामतिपवित्रेण निजचरित्रेण पावनी अलङ्कारभूतेति ध्वन्यते। मैथिलीव वीक्ष्येति यथा सीतादेवी वातात्मजं हर्षविस्मयबहुमानविश्वासोत्कण्ठासंवलितहृदयमवलोकितवती तथा त्वां मद्देहिनीति व्यज्यते। पुरमविशदयोध्यां मैथिलीदर्शनीना[६]मित्यत्र सीतेतिनाम्नोऽज्ञानात्कन्याजनिभुव एव प्रथमोपस्थितत्वात्प्रत्यासत्त्या तत्सम्बन्धिनाम्न

---

१. श्रीमद्वाल्मीकिरामायणम् ६-२२-७४

२. रघुवंशम्-१२-२२

३. अभिज्ञानशाकुन्तलम्-१-२१

४. रघुवंशम्, २-३

५. उत्तरमेघः, ३७

६. रघुवंशम्, ११-१३

उल्लेख कवे: प्रतिभां व्यनक्ति तेन च न दिदृक्षामात्रं, व्याजेनानेन प्रथमतस्तत्रागतायाः मिथिलागतसौशील्यादिभावसहस्रजिज्ञासुत्वं तासां गम्यते । महाभिजनत्वेन निष्कलङ्कचरित्रत्वन्तु सुतरां बोध्यते । जानकीपदगम्यार्थस्त्वतो नितरां भिद्यते । यद्यप्येषाऽयोनिजा तथापि जनकस्य देवयजनलाङ्गलपद्धतावाविर्भूतत्वादेवमुक्तिः, तेनाचिन्त्योदयस्थितिलया या सैव देवैः स्वकार्यसिद्ध्यर्थमाविर्भावितेति लभ्यते । राजर्षेर्जनकस्य ज्ञानितयात्मारामतया चास्या अपि तत्स्नेहपरिपालितत्वेन ब्रह्मविद्यारूपता स्फुटति । अत एव कालिदासोऽपि तादृशवर्णनप्रसङ्गे इदमेव पदमुपन्यस्य स्वस्य स्वार्थवैचित्र्याकलनदीष्णत्वं प्रख्यापयति—जानकी विषवल्लीभिः परीतेव महौषधिरिति । अत्र लङ्केश्वरवैभवमपि तुच्छमिव गणयन्ती विविधत्रासप्रलोभनादिकं सोढ्वापि स्वधर्मं पालितवतीति स्वयं कविरस्या इदमेव स्वरूपं महतादरेण वन्दमान आह-लङ्केश्वरप्रणतिभङ्गदृढव्रतं यद्वन्द्यं युगं चरणयोर्जनकात्मजाया इति । अत्र हि प्रस्तुतपदं वृत्तशीले कुले जातामाचारवति परमधार्मिके वंश आविर्भूतां सीतां लक्षयति, तां विहाय का वान्या राक्षसीभिः परीतापि महौषधिनोपमिता स्यात् ? एतेनास्याः योगमास्थितत्वं मनोनिग्रहादियोगिसुलभकर्मपरत्वं च व्यज्यते । महौषध्युपमानेन न केवलं राक्षसीविहितदारुणकष्टापमृष्टता अपितु तदुपासनस्य प्रकारान्तरेण भवरोगमहौषधप्रतिमत्वमपि ध्वन्यते । इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्मुनिरित्यत्र दुष्टाचरणस्यात्यन्तासंभावनीयत्वध्वननेनाश्रमोचितधर्मवेत्तृतया स्वाश्रमानयनयोग्यता तस्या उक्ता। यदासौ महाकविरस्या देहाध्यासराहित्यमाविष्कर्तुमीहते तदार्थविषयिणीं सूक्ष्मेक्षिकामनुसन्धायान्यत्पदमपहाय वैदेहीपदमुपादत्ते । तद्यथा-रामोऽपि सह वैदेह्या वने वन्येन वर्तय, न्निति । एतेनेयं स्वसुखाभिलाषं देहभावं परित्यज्यानुव्रजति न तु क्षणसौहृदेनेति गम्यते । अत एव भगवान् वाल्मीकिरप्येवं स्तौति-सर्वान् भोगान् परित्यज्य भर्तृस्नेहबलात्कृता, अचिन्तयित्वा कष्टानि प्रविष्टा निर्जनं वनम् इति । यत्रायोनिजात्वेन दिव्यत्वं प्रदर्शितव्यं भवति तत्र पार्थिवीपदमेव शब्दरहस्योन्मीलनकौशलप्रदर्शनमुखेन प्रयुज्य स्ववैदग्ध्यं प्रस्तौति कविः । पार्थिवीमुदवहद्रघूत्तम इत्यत्र मानुष्या व्यावर्तनात् ब्रह्मणा सह परिणययोग्यतोच्यते, पृथिवीवत्क्षमाशीलता च । तद्यथा-पृथिव्यां जनाः स्वसुखसाधनाय कर्षणखननाद्युपद्रवान् कुर्वते तान् ज्ञात्वापि सा किमपि प्रतिकारधिया कर्तुं नेहते प्रत्युत स्वव्यथामपि न प्रकटयति, तथैवेयमपि क्षमाविग्रहा जयन्तादिकृताक्षम्यापराधान् क्षाम्यति । तेन रत्नगर्भात्वं तु ध्वन्यत एव । उमाभवान्यादिपदमतिरिच्य प्रयुक्तं पार्वतीपदमपि यथाप्रसङ्गमतितरां सौष्ठवं भजति । निनिन्द रूपं हृदयेन पार्वतीत्यत्र सुखदःखाद्यनुभववैकल्यात्पर्वतो जडः, तज्जन्यतया तथात्वमारोपितापीयं पार्वती स्वात्मरूपं निनिन्देति तस्या दुःखस्यानन्त्यं ध्वन्यते, अदम्यधैर्यादिकं तु सम्बन्धिशब्दमहिम्ना गम्यत एव धैर्येण हिमवानिवेत्युक्तेः । एवमेवात आहर्तुमिच्छामि पार्वतीमात्मजन्मन इत्यत्र तादृशपुत्ररत्नोपादनक्षमत्वं सूच्यते, अत उक्तं कविनाअनन्तररत्नप्रभवस्य तस्येति । किञ्चैतेन रुद्ररेतोधारणक्षमतापि बोध्यते । दौष्यन्तिरप्रतिरथं तनयं निवेश्येति दौष्यन्तिपदेन स्वस्य सर्वज्ञत्वं द्योतयन् कण्वः तव कुक्षिगतं सत्त्वं दुष्यन्तप्रयुक्तमिति शकुन्तलां प्रति स्वात्मनिश्चयं ध्वनयति । तेन विदिताखिलरहस्योऽपि प्रसीदामीति व्यज्यते । राघवभट्टस्तु दौष्यन्तिपदेन महीधारक्षमत्वं ध्वन्यत इत्याह ।

इदञ्च न विस्मर्तव्यं सहृदयैर्यदस्य कालिदासीयशब्दसौष्ठवस्य सन्ति बहवः पक्षा विमर्शयोग्याः । विमृष्टाश्च भूम्ना केचित्सम्बन्धिनोऽपि पक्षा विद्वद्भिरिति चर्वितचर्वणं परिहरता मयात्रापत्यप्रत्ययान्तप्रयुक्तं वैशिष्ट्यं प्रकाशयितुमवलम्बितः कश्चिदात्मीय एव मार्गः । अत्र न शक्यन्ते सामग्र्येण भावाः सोपस्करं व्याख्यातुमिति दिङ्मात्रं प्रदर्शितम् ।

अथ शब्दानुशासनं पतञ्जलिकृतमेव

■ उदयचन्द्रझा

"अथ शब्दानुशासनम्"[१] इति वचनं युधिष्ठिरमीमांसकादयः विद्वांसः पतञ्जलिकृतं न मन्यन्ते। तेषां मते त्विदमष्टाध्याय्याः प्रथमं सूत्रं विद्यते।

अत्रास्य पाणिनीयत्वे निम्नलिखितानि प्रमाणानि प्रस्तूयन्ते–

तत्र प्रथमम्–(१) महर्षिपतञ्जलिः सूत्रमिदं व्याचक्षाणः प्राह–

"अथेतिशब्दोऽधिकारार्थः[२] प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्।" वाक्येऽस्मिन् प्रयुज्यते क्रियायाः कर्त्ता पतञ्जलिः, अधिकृतमित्यस्य कर्त्ता पाणिनिः यतो शास्त्रस्य रचयिता पाणिनिरेव। विभिन्नकर्त्तृस्वीकारेऽत्रैकवाक्यत्वन्न घटते।

(२) मूलपाणिनीयाष्टकस्य[३] बहुषु प्राचीनहस्तलेखेषु प्रारम्भः सूत्रेणानेन विद्यते।

(३) पाणिनीयाष्टकवृत्तिग्रन्थकाशिकायामन्यसूत्रवदस्य व्याख्यानं कृतमस्ति– "अथ शब्दानुशासनम्,[४] केषां शब्दानाम्? लौकिकानां वैदिकानाञ्च।"

(४) पाणिनीयाष्टकभाषावृत्तेः व्याख्याता सृष्टिधराचार्यः प्रोवाच– "व्याकरण शास्त्रमारभमाणो[५] भगवान् पाणिनिमुनिः प्रयोजननाम्नी व्याचिख्यासुः प्रतिजानीते।"

(५) मनुस्मृतेः व्याख्याता मेधातिथिः प्रोवाच– "पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाभिधानमाद्रियते।[६] तथाहि– भगवान् पाणिनिरनुक्त्वैव प्रयोजनम्–

"अथ शब्दानुशासन मिति सूत्रसन्दर्भमारभते।

(६) काशिकाव्याख्याता न्यासकारो जिनेन्द्रबुद्धिः प्रोवाच–

"शब्दानुशासनप्रस्तावादेव[७] हि शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वं रूपं गृह्यते नार्थपरनिर्देशः इति ज्ञापनार्थम्", इत्यभिप्रायकम् तत्रत्यव्याख्यानम्।

---

१. महाभाष्यम्- पृ.सं.–५
२. महाभाष्यम् तत्रैव।
३. लवपुरीय श्रीमद्दयानन्दमहाविद्यालयस्यानुसन्धानपुस्तकालये, एकमष्टाध्यायीपुस्तकं विद्यते यस्मिन्नेवेदमेव सूत्रमस्ति।
४. काशिका पृ. सं.–२
५. भाषावृत्तेष्टीका विवृत्तिः–पृ.सं.–१
६. मनुस्मृतिः– श्लोक–१
७. काशिकावृत्तिः– पृ.सं.–७

(७) महर्षिदयानन्दसरस्वती पाणिन्यष्टकव्याख्याने प्राह-

इद[१] सूत्रं पाणिनीयमेव प्राचीनलिखितपुस्तकेष्वादाविदमेवाऽस्ति। दृश्यन्ते च सर्वेष्वार्येषु ग्रन्थेष्वादौ प्रतिज्ञासूत्राणीति। यथा-

(१) अथ योगानुशासनम्- योगदर्शनम्, १.१

(२) अथातो धर्मं व्याख्यास्यामः- पूर्वमीमांसा- १.१.१

(३) अथातो ब्रह्मजिज्ञासा- उत्तरमीमांसा १.१.१

(४) अथातः त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः - सांख्य-१.१

परञ्च वचनमिदं पतञ्जलिकृतम्।[२] ''स्वपदानि च वर्ण्यन्ते'' इति भाष्यलक्षणेन महाभाष्ये[३] ''अथ शब्दानुशासनम्'' इत्यस्य तादृशव्याख्यानदर्शनेन वचनमिदं पतञ्जलिकृतमेव।

यत्तु विभिन्नकर्त्तृस्वीकारे एकवाक्यत्वन्न घटते, तत्तु न समीचीनम्, यतो हि ''स्वपदानि च वर्ण्यन्ते'' इत्यनुसारेण प्रयुज्यते क्रियायाः कर्त्ता पतञ्जलिरस्त्येवाधिकृतमित्यस्य कर्त्ता पाणिनिः। अत्रैकवाक्यत्वमेव नास्ति। यद्येकवाक्यत्वमपि तदापि विभिन्नकर्तृकत्वस्वीकारेऽपि न क्षतिः।

पक्षेऽस्मिन् प्रमाणानि प्रस्तूयन्ते-

(१) यद् ''अथ शब्दानुशासनम्'' इति पाणिनेः प्रथमं सूत्रं तदा कथं स्वयं भगवता भाष्यकारेण[४] ''वृद्धिरादैच्'' इति सूत्रव्याख्यानावसरे वृद्धिशब्दः मङ्गलार्थं व्याख्यातः- ''माङ्गलिक[५] आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकानि च भवन्ति आयुष्मत्पुरुषकानि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति प्रतिपादितम्। अनेन ''वृद्धिशब्दमादितः प्रयुङ्क्ते'' इति व्याख्यानेन सुतरां सिद्ध्यति यत् पाणिनेराचार्यस्यैव ''वृद्धिरादैच्'' इति प्रथमं सूत्रम्, न त्वथ शब्दानुशासनम्। अत्र प्रमाणन्तु स्वयं भाष्यकार एव।

(२) येत्वत्रादिपदस्य सामीप्यमूलकत्वं स्वीकुर्वन्ति, तत्वनुचितः परस्मिन् सति यस्मात् पूर्वो नास्ति स एवादिः। अतो युधिष्ठिरमीमांसकमहोदयस्येदं मतं निरस्तं भवति यद् ''वृद्धिरादैजित्यत्र[६] माङ्गलिको वृद्धशब्दः शास्त्रादिभूतस्य ''अथशब्दानुशासनम्' इति सूत्रस्य समीपस्थत्वादादिमङ्गलमेवेति।'' म.म. गिरिधरशर्म्मचतुर्वेदीमहोदयास्तु- ''शास्त्र[७] सूत्रमित्युक्त्वा तत् सूत्रघटकाद्यन्तमंगलशब्दस्य भाष्यकारेणोल्लेखः कृत इत्युक्तवन्तः। अतो वृद्धिरादैजि''

---

१. अष्टाध्यायीभाष्यम्- पृ.सं.-१
२. म.भा. छायाग्रन्थस्य मङ्गलाचरणे, पृ.सं.-१
३. महाभाष्यं, शास्त्रप्रयोजनाधिकरणम्- पृ.सं.-५
४. पा.अ.सू.सं- १.१.१
५. महाभाष्यम्- पृ. सं.-१६५
६. महाभाष्ये-''वृद्धिरादैच्'' इति सूत्रण्याख्याने।
७. महाभाष्यभूमिकायाम्।

त्येव प्रथमसूत्रं बोध्यम्। (३) अष्टाध्याय्याः गुरुपरम्परायां प्राचीनपुस्तकेषु च प्रतिपादमनुवाक् सूत्राणि दृश्यन्ते। तत्र प्रतिविंशति सूत्रसमुदायस्यादिभूतंसूत्रांशा उच्यन्ते। यथा– प्रथमाध्यायस्य प्रथमपादान्ते वृद्धिराद्यन्तव्ययीभावः प्रत्ययस्य लुक् श्लु लुप् इत्यादीनि पञ्चसूत्राणीति सर्वैकत्वेन पञ्चसप्ततिसूत्राण्यत्रपादे ज्ञातव्यानि। नात्र "अथ शब्दानुशासनम्" इत्यस्योल्लेखोऽस्ति।

(४) महाभाष्यकारपतञ्जलेः एतादृशी शैली लक्ष्यते यद् 'अथ' शब्दादारभ्य विषय-वस्तु निर्देशनम्। यथा– "अथ,[१] योगानुशासनम्" इति तथा अथ शब्दानुशासनम् इति।

(५) भट्टोजीदीक्षितः स्वशब्दकौस्तुभे प्राह–[२] "प्रेक्षावत् प्रवृत्तये व्याकरणस्य विषयं भगवान् भाष्यकारः प्रादर्शयत्–"अथ शब्दानुशासनम्" इति।

(६) पदमञ्जरीकारः हरदत्तः, प्रदीपकारः कैयटः, उद्योतकारः नागेशः, अन्ये च विद्वांसः, इदं भाष्यकारस्यैव वचनं मन्यन्ते।

(७) इदमपि विचारणीयं विद्यते यत् प्रथमाह्निकस्यार्थः भूमिका, भूमिकायां सूत्रव्याख्यानं यदि सत्यं तर्हि "अथ शब्दानुशासनम्" इति प्रथमं सूत्रं, तदनन्तरं "वृद्धिरादैच्" इति द्वितीयं सूत्रं तदा द्वितीयाह्निके[३] "अइउण्" इत्यस्य स्थाने वृद्धिरादैच्" इति सूत्रस्य व्याख्या कार्या।

अनेन सर्वैरपि ज्ञातुं शक्यते यद् भूमिकायां व्याख्यानं न कृतं विद्यते। अथ च सूत्रात् प्राक् माहेश्वरसूत्राणां व्याख्यानं भाष्यकारैः कृतं तदनन्तरं पाणिनेः सूत्राणां व्याख्यानं प्रारब्धमिति।

अतः ये वचनमिदं पाणिनेः सूत्ररूपं स्वीकुर्वन्ति तेषां मतं नोचितम्, किन्तु वचनमिदं पतञ्जलेरेव नान्येषामिति बोध्यम्।

---

१. योगसूत्रम्– १.१

२. शब्द कौस्तुभः –पृ. स.–१

३. माहेश्वरसूत्रम्

दर्शनेषु शब्दतत्त्वविमर्शः

■ प्रो० पारसनाथद्विवेदी

विभिन्नदर्शनानुसारमिह शब्दतत्त्वं विमृश्यते।

शब्दस्य व्युत्पत्तिः-

शब्दधातुश्चुरादौ पठ्यते। उपसर्गादाविष्कारेऽर्थे प्रतिशब्दयति आविष्करोति प्रतिश्रुतम्। भाषणेऽर्थे सोपसर्गाद् अनुसर्गादपि प्रयुज्यते=शब्दयति। तस्माच्छब्दधातोर्भावे घञि शब्दस्य व्युत्पत्तिः। कर्मणि वा घञ् शब्द्यत उच्चार्यते यः स शब्दः। अकर्तरि च कारके संज्ञायाम् (पा० ३-३-१९) इति घञि। तत्र द्वौ पक्षौ कार्यो नित्यश्चेति।

कार्यशब्दवादः-

शब्दो गुण इति नैयायिकाः। द्रव्यकर्मभिन्नत्वे सति समवायेन जातिमत्त्वात्, गुणत्वव्याप्यजातिमत्त्वात्, द्रव्यक्रियाभिन्नत्वे सति द्रव्ये समवायेनोत्पत्तिमत्त्वाद्वा। शब्दत्वञ्च श्रावणप्रत्यक्षविषयत्वे सति गुणत्वम्। शब्दो विशेषगुणः, लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये सति गुणत्वव्याप्यजातिमत्त्वात्, रूपवद् इत्यनुमानेन शब्दस्य विशेषगुणत्वसिद्धिः। प्रमात्वेऽतिव्याप्तिनिरासाय गुणत्वेऽपि। गुरुत्वेऽतिप्रसङ्गवारणाय सत्यन्तम्, संख्यात्वेऽतिव्याप्तिवारणाय द्वितीयसत्यन्तम्। शब्दश्च इत्याश्रितः गुणत्वाद् रूपादिवदित्यनुमानेन तस्य द्रव्याश्रितत्वतसिद्धिः। शब्दः पृथिव्याद्यष्टद्रव्यान्यद्रव्यसमवेतः, अष्टद्रव्यासमवेतत्वे सति द्रव्यसमवेतत्वात्, चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वाद् वा स्पर्शवत्। तत्र पारिशेष्यादाकाशद्रव्याश्रितत्वं सिध्यति। तथा हि-शब्दो न स्पर्शवद् विशेषगुणः, अग्निसंयोगासमवायिकारणत्वाभावे सत्यकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात्। कारणगुणपूर्वकाः जलीयतैजसवायवीयगुणाः। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकत्वम्, जलपरमाणौ व्यभिचारवारणाय प्रत्यक्षेति।

शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वात्, रूपवत्। नाप्यात्मगुणः बहिरिन्द्रियग्राह्यत्वाद् रूपवत्। इत्थं पारिशेष्याद् आकाशविशेषगुणः शब्द इति सिद्ध्यति। एतदेव पूर्वोक्तमनुमान-माकाशसद्भावे प्रमाणम्। प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गात् शिष्यमाणे सम्प्रत्ययः परिशेषः। एवं परिशेषाद् आकाशगुणत्वं शब्दस्य सिद्ध्यति।

केचन-वायुगुणाः शब्दः वायुपरमाणुद्व्यणुकावयवसूक्ष्मक्रमेणोत्पद्यमानत्वादिति वदन्ति। तन्न, शब्दो वायुविशेषगुणत्वाभाववान् आश्रयनाशाजन्यनाशप्रतियोगित्वाद् अयावदद्रव्यभावित्वाद् वा ज्ञानवत्। यावदाश्रयद्रव्यभावित्वं गन्धादेर्विशेषगुणस्य दृष्टम्। अतः प्रतिरोधस्य सद्भावात्।

केचन-शब्दनिमित्तकरणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वं तस्यैव श्रोत्रत्वञ्च वदन्ति। अन्ये पुनः भेरीमृदङ्गादेरेव गुणः शब्दो नाकाशस्येति वदन्ति।

वाक्यपदीये कार्यशब्दवादे-त्रयः पक्षा उपस्थापिताः।

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः॥ (ब्र०का० १०७)

कैश्चित् वायोः कैश्चिद् अणूनां, कैश्चित् ज्ञानस्य शब्दत्वापत्तिः शब्दाकारपरिणाम इष्यते। इत्येवं रूपेण दर्शनेषु सिद्धान्तेषु प्रवादेषु दृष्टिभेदो दृष्टपुरुषभेदाद् अस्थिरो निश्चेतुमशक्य इत्यर्थः।

वायोः शब्दपरिणामः—

तत्रैवेदं स्पष्टम्—

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते॥ (ब्र०का० १०८)

वक्तुरिच्छानुवर्तिना विवक्षाजन्येन प्रयत्नेनात्मनिष्ठव्यापारेण लब्धक्रियः प्रेरितः क्षुब्धो वायुरूर्ध्वमाक्रामन् स्थानेषु नाभ्युरः कण्ठताल्वादिषु अभिहतः सङ्घट्टितः शब्दत्वं शब्दाकारत्वं प्रतिपद्यते शब्दाकारतया परिणमति।

अत्र वायुपरिणामः कारणसामर्थ्याद् भवति शब्दः। न तु तादृशसामर्थ्यविशेषाद् वायौ गुणाः शब्दाः उत्पद्यन्ते। यदि च परिणाम एवोत्पत्तिर्नारम्भः द्रव्यपरिणामः द्रव्यतादात्म्यापन्नः गुणस्तदा वायुपरिणामः शब्दोऽपि गुण एव।

ननु कारणसामर्थ्याद् एकस्यापि वायोः परिणामः शब्दो यदि चेत् तदा शब्दस्यापि स्पर्शवद् त्वगिन्द्रियग्राह्यत्वापत्तिः स्यात्। अथवा वायुवत् तत्परिणामस्य शब्दस्यापि त्वचा अग्राह्यत्वाद् अन्येन तस्य वायुपरिणामस्याग्रहणाच्छब्दानुपलब्धिप्रसङ्गः स्यात्। अतो न वायुपरिणामः शब्दः। वायुपरमाण्वारब्धत्वपक्षेऽपि स एव दोषः, तस्माद् वायुः शब्दाभिव्यञ्जने तदुत्पत्तौ वा निमित्तत्वेनोपादीयते। न तु शब्दसमवायीति युक्तं प्रतिभाति।

अथवा भूतानां विलक्षणोऽपि परिणामो दृश्यते, यथा गोमयादेर्वृश्चिकादिपरिणामः। बलाहकस्य विद्युत् परिणामः। अतो वायुपरिणामः शब्दो भवेत्। वायुगुणत्वेऽपि शब्दस्य श्रोत्रग्राह्यत्वं न विरुध्यते। गुणगुणिनोरेकेन्द्रियग्राह्यत्वनियमाभावात्।

अणूनां शब्दत्वापत्तिः–

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमः शब्दभावेन परिणामिनः॥ (वा०प०ब्र०का० ११०)

अत्राणवो न वैशेषिकाभिमताः पार्थिवादिपरमाणवोऽभिप्रेताः। शब्दस्य परमाणुरूपत्व-तदारब्धत्वानभ्युपगमात्। अपि तु अणुस्तन्मात्रम्। सांख्यमते शब्दतन्मात्रं स्पर्शतन्मात्रमित्यादि स्वीक्रियते। तत्र तदेवेति तन्मात्रम्। तच्छब्दस्य मात्रशब्देन मयूरव्यंसकादित्वात्समासे तन्मात्रपदम्। मात्रपदं सूक्ष्माभिधायि। एवञ्च अणुपदेनात्र शब्दतन्मात्रमुच्यते। शब्दतन्मात्राण्यनन्तानि परस्परव्यावृत्तस्वभावानि।

तत्र पञ्च तन्मात्रेभ्यो भूतपरिणामो द्विधा दृश्यते। समेत्य परिणामः, असमेत्य च। तत्र पृथक् पृथग् एव पञ्च तन्मात्रेभ्यः पञ्च भूतानि स्थूलानि उत्पद्यन्ते, न च तेषां समेषां सम्मेलनं भवति। यथा सांख्यप्रक्रियायां शब्दतन्मात्राद् आकाशम्। स्पर्शतन्मात्राद् वायुरिति।

अद्वैतवेदान्तप्रक्रियायां त्वपञ्चीकृतभूतानि अज्ञानोपहितचैतन्यादुत्पन्नानि सूक्ष्माणि आकाशादीनि तन्मात्रपदेनोच्यन्ते। तेषां समेषां पञ्चीकरणप्रक्रियया सम्मिश्रणात् स्थूलानि आकाशादीनि भूतान्युत्पद्यन्ते।

अणवः सूक्ष्माः परमाणवो भेदसंसर्गवृत्तयः। भेदो विभागः, संसर्गः संयोगः, तौ वृत्तिर्व्यापारो येषां ते संयोगविभागवन्तः। तेषां संयोगविभागयोश्चादृष्टादिर्हेतुः। सर्वाः समस्ताः स्वस्वनानाकार्यानुकूलाः शक्तयो येषां ते सर्वशक्तयः तेषां भावः तस्मात्। छायाभावेनातपभावेन तमोभावेन शब्दभावेन च परिणामिनो भवन्ति। नीलरूपपरमाणवः छायातमोभावेन परिणमन्ति, शुक्लरूपपरमाणव आतपभावेन शब्दपरमाणवश्च शब्दभावेनेति विवेकः।

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः॥ (१११)

शब्दपरमाणूनां शब्दरूपत्वापत्तौ प्रकार उच्यतेऽनेन श्लोकेन। शब्दनाम्नाभिहिता परमाणवोऽदृष्टादिसहकृतप्रयत्नेन व्यज्यमानायां कार्योन्मुखत्वमापद्यमानायां स्वशक्तौ प्रचीयन्ते झटिति श्रोत्रग्राह्यस्थूलशब्दरूपतां प्रतिपद्यन्त अभ्राणीव। यथा अभ्राः सूक्ष्मा आकाशे व्यस्ता वायुप्रेरिताः प्रचित्य मेघरूपतां प्रतिपद्यन्ते।

अस्मिन् पक्षे शब्दाख्यपरमाणुभ्य एव शब्दोत्पत्तिरुक्ता। ते च परमाणवः नारम्भवाद इव द्व्यणुकादिक्रमेण आरम्भकाः, अपि तु अदृष्टादिवशाज् झटिति प्रचीयमानाः स्थौल्यं श्रवणगोचरतां गता भवन्ति। नन्वत्र पक्षे आरम्भो नास्ति चेन्मास्तु परिणामोऽपि कथं भवेत्। न हि तेषां प्रचय एव परिणामः। रूपान्तरत्वापत्तिः परिणाम उच्यते। नहि बालुकापुञ्जः बालुकापरिणाम उच्यत इति चेन्न प्रचयेऽपि परिणामत्वव्यवहारात्। सैकतपुञ्जोऽपि सिकतानां विकार एव। नहि विकृतावेव परिणामशब्दप्रयोगः। अविकारे रूपान्तरत्वेऽपि भवत्येव। दूरात् प्रत्येकम-

प्रत्यक्षत्वेऽपि सिकतासमुदायस्य पुञ्जीभूतस्य प्रत्यक्षत्वदर्शनात्। एवं प्रत्येकं शब्दपरमाणूनां श्रवणायोग्यत्वेऽपि प्रचये स्थौल्यात् श्रवणगोचरता भवत्येव। अतः स शब्दपरमाणुप्रचयः स्थूलः विकारः परिणाम एव। अतो नोक्तदोषः, अस्मिन् पक्षेऽपि शब्दस्य द्रव्यत्वमेवागतम्, न गुणत्वं द्रव्यरूपशब्दाख्यपरमाणुभ्यो जायमानत्वात्। गुणो द्रव्यपरिणाम एवेति पक्षेऽस्तु गुणत्वम्। अथवा जैनमते परमाणुपरिणामो बोध्यः।

ज्ञानस्य शब्दत्वापत्तिः–

अथायमन्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते।। (११२)
स मनोभावमापद्य तेजसा पाकमागतः।
वायुमादिशति प्राणमथासौ समुदीर्यते।। (११३)
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते।। (११४, वाक्यपदीयम् ब्र.का.)

अयमर्थः – सूक्ष्मं वाक्तत्त्वमेवात्मा चैतन्यरूपम्। तत्र वागात्मनि आन्तरो ज्ञाता मनः स्थितः। ज्ञाता ज्ञानवानुच्यते ज्ञानकर्ता वा। ज्ञानं नाम मनोवृत्तिः मनःपरिणामः। तादृशपरिणाम-रूपज्ञानवान्मन एवात्र ज्ञातृपदेनोच्यते। सूक्ष्मवागात्मस्थत्वात् ज्ञातरि मनस्यपि वागात्मत्वमभिप्रेतम्। सः मनोरूपो ज्ञाता स्वस्य व्यक्तये स्वस्य शब्दरूपस्य व्यक्तये ज्ञानात् पृथग्रूपेण व्यक्तये शब्दत्वेन परिणमति। कथमेवं परिणाम इत्युच्यते। सः सूक्ष्मरूपेण वागात्मना स्थितो ज्ञाता मनोभावं मनोरूपतामापन्नः तेजसा शारीरेण पाकं विषयग्रहणप्रकाशनयोग्यतामागतः विवक्षायत्नेन प्रेरितं प्राणं वायुमाविशति तादात्म्येन संयोगेन वा। स च मनस्तादात्म्यापन्नः प्राणवायुरुदीर्यते ऊर्ध्वं क्रामति। ततोऽन्तःकरणतत्त्वस्य मनस आश्रयतां गतो वायुः तद्धर्मेण मनोगतकत्व-खत्वादिधर्मेण समाविष्टः सम्प्राप्तः तेजसैव निमित्तेन विवर्तते परिणमति। तद्धर्मवानिव भवति।

एवमत्र पक्षे वागात्मनि स्थितमनस्तादात्म्यापन्नः प्राणवायुः प्रयत्नप्रेरितः नाभ्युरः प्रभृतिस्थानाभिघातेन तेजोयुक्तः शब्दरूपतामापद्यते। अयमेव ज्ञानस्य शब्दपरिणामः। एतच्च भगवत्पतञ्जलिमतम्। स च प्राणवायुः वर्णरूपतां ध्वनिरूपतां वापन्नो ग्रन्थिसदृशान् अवयवान् वर्णान् विभजन् प्रकाशयन् वर्णेष्वेवोन्मीलीयते।

भगवान् पाणिनिरपि प्राह–

आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरति मारुतम्।।
मारुतस्तूरसि चरन् वर्णान् जनयते स्वरान्।।

इत्यादि शास्त्रतोऽवगन्तव्यम्।

शब्दोऽन्त्यि इति नैयायिकाः प्रतिजानते। ते वदन्ति। शब्दा अनित्या एवेति प्रत्यक्षेण ज्ञायते। इन्द्रियव्यापारे सति नास्ति शब्दः उपशान्तः कोलाहल इत्येवमसन्दिग्धं विपर्यासरहितं ज्ञानं जायते। असति चेन्द्रियव्यापारे न जायत इत्यन्वयव्यतिरेकाभ्यां शब्दाभावः प्रत्यक्षेण गृह्यते। येनेन्द्रियेण या व्यक्तिर्गृह्यते तदभावस्तद्गता जातिश्च तेनैव गृह्यते। शब्दाभावं प्रत्यपि कर्णशष्कुल्या विशेष्यविशेषणभावसम्बन्धस्य सत्त्वात्।

अनुमानेनापि शब्दास्यानित्यत्वं तद्यथा – शब्दोऽनित्यः सामान्यवत्त्वे सति अस्मदादि-बाह्येन्द्रियग्राह्यत्वाद् घटादिवत्। आत्मनि व्यभिचारवारणाय बाह्येति। मनसि व्यभिचारवारणाय अस्मदादीति। घटत्वादौ व्यभिचारवारणाय सामान्यवत्त्वे सतीति।

शब्दोऽनित्यः तीव्रत्वादिधर्मयुक्तत्वात् सुखदुःखादिवत्। न च तीव्रत्वादिधर्मस्य शब्दव्यञ्जकनिष्ठत्वात् व्यभिचार इति वाच्यम्, व्यञ्जकस्वरूपानवधारणात्। वायुसंयोगस्य व्यञ्जकत्वे तन्निष्ठस्य तीव्रत्वादेः श्रोत्रग्राह्यत्वानुपपत्तेः। नहि वायोः तत् संयोगस्य वा श्रोत्रग्राह्यत्वमस्ति। दारुपरश्वादिसंयोगविशेषोऽभिव्यञ्जक इति चेन्न दूरस्थेन दारुपरश्वादिसंयोगे निवृत्तेऽपि शब्दोपलब्धेः। नहि व्यञ्जकनिवृत्तौ व्यङ्ग्यस्योपलब्धिर्दृष्टा। न हि प्रदीपे निवृत्ते घटादेर्व्यङ्ग्यस्योपलब्धिः।

किञ्च कार्यत्वपक्षे इच्छाप्रयत्नानुविधायित्वं दृष्टं यादृशं शब्दम् उच्चारयितुमिच्छति तादृशमुच्चारयति नान्यत्। नित्यत्वपक्षे च व्यञ्जकापेक्षायां तस्य चेच्छाप्रयत्नानुविधायित्वाभावात् नादेन ध्वनिना संयोगविशेषेण वा व्यञ्जकेन अन्यस्यापि शब्दस्याभिव्यक्तिरनिवार्या स्यात्, नहि घटाय प्रज्ज्वलितो दीपः पटं न प्रकाशयति। एवं तीव्रत्वाद्यपि शब्दधर्म एव इच्छाप्रयत्नसाध्यात् तीव्रभेर्याघातात् तीव्रं मन्दाघातान् मन्दं शब्दमुत्पादयति।

अत एव शब्दोऽनित्यः कार्यत्वाद् घटवदित्यप्यनुमानम्। न च कार्यत्वमसिद्धम्, कण्ठताल्वाद्यभिघाताद् उत्पद्यमानस्य शब्दस्य सर्वेषां नः प्रत्यक्षसिद्धत्वात्। न च व्यञ्जकस्यैव तादृशाभिघाताद् जन्मेति वाच्यम्, व्यञ्जकस्यानिरूपणात्। वायुसंयोगरूपनादस्याभिव्यञ्जकत्वे तस्याश्रावणत्वप्रसङ्गात्। संयोगविशेषस्य विभागविशेषस्य वाभिव्यञ्जकत्वे तन्निवृतौ शब्दानुपलब्धेः। न च श्रोत्रग्राह्यध्वनिरेव व्यञ्जकस्तस्यैव नादाख्येति नाश्रवणगोचरताप्रसङ्ग इति वाच्यम्, तर्हि तस्यैव शब्दत्वात् वृथाभिव्यञ्जककल्पना।

ननु ध्वनिरूपस्य वर्णात्मकस्य शब्दत्वं तस्योच्चरितप्रध्वंसित्वेन समुदायाभावाद् अर्थासम्प्रत्ययः सङ्गतिग्रहाभावात्। न चान्त्यवर्ण एव शक्त्याश्रयः सञ् श्रुतिगोचरः अर्थं प्रत्याययिष्यतीति वाच्यम्, इतरेषां वर्णानां वैयर्थ्यप्रसङ्गात् तस्माच्छब्दनित्यत्वमङ्गीकर्त्तव्यम्। नित्ये शब्दे च संगतिग्रहः सुलभः। उत्पादविनाशौ ध्वनिधर्मौ शब्दे तादृशे उपचर्येते इति चेन्न पूर्वपूर्ववर्णजनितसंस्कारसहकृतान्त्यवर्णस्यैव वाचकत्वाभ्युपगमात् तस्यैव शक्त्याश्रयत्वाद् अर्थप्रत्ययस्य सम्भवात्। शब्दनित्यत्वस्य व्यञ्जककल्पनस्य च व्यर्थत्वात्।

किञ्च भेर्यादिसंयोगः किमिन्द्रियं प्राप्याभिव्यञ्जक उताप्राप्य। नाद्यः, तस्य इन्द्रियप्राप्त्यभावात्। न द्वितीयः, सर्वजनं प्रति व्यञ्जकत्वप्रसङ्गात्।

किञ्च व्यापकस्य नित्यस्य शब्दस्याभिव्यक्तिरपेक्षिता उताव्यापकस्य? उभयथापि नोपपद्यते। प्रथमे व्यापकस्य सर्वशब्दस्यैकदेशस्थत्वाद् युगपद् अभिव्यक्तिप्रसङ्गः सर्वपुरुषो-पलब्धिप्रसङ्गश्च। सर्वपुरुषेन्द्रिय सम्बद्धस्यैव व्यापकस्याभिव्यक्तवात्। द्वितीये अव्यापकस्या-भिव्यक्तौ यत्र यत्र भेर्याघातादि तत्र तत्र शब्दानुपलब्धेरव्यापकत्वादेव।

अतो व्यञ्जकस्यानिरूपणाद् अयुक्तोऽयं शब्दनित्यत्ववादः। शब्दानित्यत्वपक्षे च वीचीतरङ्गन्यायेन श्रोत्रदेशोत्पन्नशब्दो गृह्यते यथा वीचीतरङ्गसन्तानस्तथा शब्दस्यापि स्वजन्मशब्दसन्तानः। स च शब्दान्तरारम्भः न स्वावच्छिन्नप्रदेशे न वान्तरालं विहाय श्रोत्रावच्छिन्नप्रदेशे, अपि तु स्वावच्छिन्नप्रदेशसमीपतरवर्त्तिप्रदेश एव शब्दान्तरारम्भ इति नास्ति अस्मिन् पक्षे दोषः।

जैनशास्त्रे– परमाणुपरिणामः शब्दः। अयमाशयः वाचकः शब्दो द्विविधः सामान्यरूपं विशेषरूपञ्च। सर्वशब्दव्यक्त्यनुयायि शब्दत्वं सामान्यरूपं भेरीमृदङ्गादि तीव्रमन्दोदात्तादिरूपभेदाद् भिन्नमनेकरूपं द्वितीयम्। एतस्य सामान्यविशेषात्मकत्वं परमाणुपरिमाणत्वे (पौद्गलिकत्वे) एव सम्भवति। तथा हि शब्दः सामान्यविशेषात्मकः पौद्गलित्वाद् रूपादिवद् इत्यनुमानेन तस्य सामान्यविशेषात्मकत्वं सिद्धम्। शब्दः पौद्गलिकः इन्द्रियार्थत्वाद् रूपादिवदित्यनुमाने तस्य पौद्गलिकत्वं सिद्धम्। न च शब्दः पौद्गलिकत्वाभाववान् स्पर्शशून्याश्रयकत्वाद् इत्यनुमानात् तदभाव इति वाच्यम्। शब्दस्य स्पर्शशून्याश्रयकत्वासिद्धेः। शब्दाश्रयः स्पर्शवान् अनुवात-प्रतिवातयोर्विकृष्टनिकटशरीरिणा उपलभ्यमानुपलभ्यमानेन्द्रियार्थवत्त्वात् तथाविधगन्धाधारद्रव्य-परमाणुवद् इत्यनुमानेन प्रतिवारणात्। तदेवं शब्दस्य पौद्गलिकत्वं सिद्धम्। एतदेवोक्तं वाक्यपदीये वायोरणूनां ज्ञानस्येति।

तत्त्वार्थसूत्रे उमास्वामिनाप्युक्तम्–

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः (५-२३), शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थान-भेदतमश्छायाऽऽतपोद्द्योतवन्तश्च (५-२४) इति सूत्रयोः। शब्दो न वैशेषिकमतवद्गुणः, अपि तु पुद्गल परिमाणः निमित्त भेदाद् अनेकभेदवन्तः। यथा भाषाततविततघनशुषिरसंघर्षादिभेदेन अनेके शब्दाः सन्ति। ततः–मृदङ्गादेशब्दः, विततः वीणादिशब्दः। घनः घण्टादिनादः। संघर्षः काष्ठादिसंयोगविभागजः। एवञ्च शब्दः परमाणु-परिणामो द्रव्यमेव। पुद्गलाः "अणवः स्कन्धाश्च" (५-२५) इति द्विभेदाः। स्कन्धयुद्गलोः द्रव्यमेव समुदायरूप इति।

बौद्धमतङ्क्षेपः–

वौद्धदर्शने-सर्वं क्षणिकमिति स्वीकाराच्छब्दस्यापि क्षणिकत्वम्। घोषः शब्दः। घोषो ध्वनिः। अतद्व्यावृत्याऽपोहवाचकानां शब्दानां सार्थकानां कण्ठताल्वाद्यभिघातजन्यानां रूपद्वयं

नाम पदञ्चेति। नाम संज्ञा सुबन्तं तिङन्तमुच्यते। पदं वाक्यम्। पद्यते गम्यतेऽर्थोऽनेनेति व्युत्पत्तेः। पदं वाक्यञ्च सङ्केतसम्बन्धेन वाचकम्। अनयोराधारभूता अवयवध्वनयो व्यञ्जनानि वर्णा उच्यन्ते। वर्णानामपि सूक्ष्मा ध्वनयः सन्ति। अन्ततः शब्दपरमाणवोऽभ्युपगन्तव्याः। तथा च शब्दपरमाणुपुञ्जः शब्दः। शब्दपरमाणव एव पुञ्जीभूताः स्वपरश्रवणगोचराः शब्दाः। पञ्चज्ञानेन्द्रियाणि पञ्च च रूपादयो विषयाः प्रतिघातकाः परमाणुसञ्चयरूपाः सन्ति। एतेऽपि क्षणिकाः प्रतीत्यसमुत्पादाः। शब्दपरमाणूनां निरवयवत्वेऽपि नित्यत्वं नाङ्गीकुर्वन्ति। शब्दो धर्मः श्रोत्रेन्द्रियग्राह्यः। हेतुप्रत्ययाधीनोत्पत्तिकोऽनित्यः। तेषां वायुसङ्घट्टेन जन्म। परमाणुपुञ्जादतिरिक्तो नित्यः स्फोटरूपः कश्चिद् शब्दो नाङ्गीक्रियते। विस्तरस्तु तच्छास्त्रे द्रष्टव्यः। एवं शब्दानित्यत्ववादः संक्षेपेण प्रदर्शितः।

अथ शब्दनित्यवादः– शब्दनित्यत्ववादिनो वैयाकरणाः योगशास्त्रविदो मीमांसकाश्च सन्ति। तत्र तावत् प्रथमं वैयाकरणानां स्फोटवादो विविच्यते-स्फोट एव शब्दः, स च नित्यो विभुरेकोऽखण्डः। व्यञ्जकैः श्रुतिगोचरै र्ध्वनिभिरभिव्यज्यते। स एव स्फोटो ब्रह्म शब्दतत्त्वमुच्यते। उदात्तत्वकत्वखत्ववर्णत्वपदत्ववाक्यत्वादिधर्मा ध्वनिगतास्तत्र व्यङ्ग्ये स्फोटाख्ये ब्रह्मणि आरोप्यन्ते। वर्णादिध्वनिभिरेक एव भिन्नतयावच्छिद्यते। स च स्फोटो ब्रह्म शब्दार्थोभयप्रपञ्चविवर्तोपादानम्। यदुक्तं हरिणा -

अनादिनिधनं ब्रह्म शब्दत्तत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

यदाद्यन्तपरिच्छेदशून्यं सर्वविकल्पातीतं व्यापकं कूटस्थं ब्रह्म तच्छब्दतत्त्वं शब्दस्वरूपम्। यतो यस्मिन् यस्माद् वा जगतः प्रपञ्चस्य शब्दार्थोभयरूपस्य प्रक्रियाव्यवहारो विवर्तते प्रथते, तदेव ब्रह्म शब्दार्थरूपेण अन्यथा विवर्तते प्रथते, न तु परिणमतीति भावः। अत एव शब्दस्य परिणामोऽयमित्याम्नायविदो विदुरित्यत्रापि परिणामो विवर्तः। अथवा अविद्योपाधिकस्य शब्दब्रह्मणः परिणामः। अविद्याया एवोपाधेः परिणामात्। यदेकं प्रक्रियाभेदैः ब्रह्म शब्दतत्त्वं बहुधा प्रविभज्यते। स च स्फोटाख्यः शब्दः ध्वनिना शब्देन वर्णाद्याकारेण गृह्यते। उक्तञ्च वाक्यपदीये -

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते।।४४।।

द्वौ शब्दौ ध्वनिस्फोटरूपौ। एको ध्वनिरूपः शब्दानां ग्रहणे निमित्तम्, अपरः स्फोटः अर्थप्रकाशकत्वेन प्रयुज्यते। ध्वनिश्च स्फोटरूपाविभागेनैव गृह्यते। स्फोटस्य चाभिव्यक्तिर्ध्वनि-रूपरूषिततयैव भवति, न तु केवलस्य। अत एव स्फोटस्यैकत्वेऽपि न सर्वार्थवाचकत्वम्। स्फोट एव शक्त्याश्रयः स च पदादिरूपरूषिततयैवार्थवाचकः तादृशस्यैव शक्तिग्रहसम्भवात्। स्फुटति अर्थोऽस्मादिति स्फोटः। स चाष्टविधः वर्णपदवाक्यतज्जात्यखण्डपदवाक्यभेदात्। वाक्यस्फोटस्यैव मुख्यत्वं तत्रैवार्थपरिसमाप्तेरन्येषां चामुख्यशास्त्रप्रक्रियानिर्वाहकतया कल्पनम्। उक्तञ्च वाक्यपदीये-

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न हि।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥७३॥ (ब्र. का.)

स्फोटे ब्रह्मणि शास्त्रकृत् कल्पिता एव वर्णपदवाक्यादिविभागा तदर्थविभागाश्च न तु वास्तवाः प्रकृतिप्रत्ययादिकल्पनालाघवेन व्युत्पत्त्यर्था।

तत्र ध्वनिरपि द्विविधः-प्राकृतो वैकृतश्च। तत्र प्राकृतो नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते। वैकृतस्तु येन अभिव्यक्तं स्फोटरूपं पुनरविच्छेदेन चिरकालमुपलभ्यते। उक्तं हि सङ्ग्रहे-

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥

अयं भावः - प्राकृते स्फोटस्वभावे भवः प्राकृतो ध्वनिः। न हि प्राकृतेन ध्वनिना विना स्फोटोऽभिव्यज्यते, अभिव्यज्यते चेत् तद्रूपरूषित एव। शब्दाभिव्यक्तिकाले प्राकृतध्वनि-स्फोटयोर्विवेको न भवति। अतः प्राकृतो ध्वनिः कण्ठताल्वाद्यभिघातजन्मा उदात्तत्वादिह्रस्व-त्वादिकत्वखत्वादिधर्मवान्। तत्तादात्म्यापन्न स्फोटोऽप्यभिव्यक्तस्तत्तत्पदादिरूपस्तत्तत्प-दाद्यर्थपरिच्छेदेन वाचकः। स च ध्वनिः स्फोटाभिव्यक्तेः पूर्वं जातः। अतः स्फोटग्रहणे हेतुः। वैकृतस्तु स्फोटाभिव्यक्तौ पश्चाद् भवः द्रुतमध्यमादिवृत्तिहेतुः। कालापरिच्छिनस्य स्फोटस्य कालकृतपरिच्छेदकरः। चिरत्वक्षिप्रत्वादिधर्मारोपकः।

ननु कथं द्विविधो ध्वनिरनुभूयताम्। एक एव तु कण्ठताल्वादिघातजन्मा ध्वनिः कर्णगोचरः। स च प्राकृतो वा स्याद् वैकृतो वा स्यात् कण्ठादेः द्वितीयव्यापारस्यादर्शनादिति चेन्न, एक एव ध्वनिः। यदा क्षिप्रमुच्चार्यते चिरं वा उच्चार्यते तत्र झटिति पदादिस्फोटाभिव्यक्तौ जातायां यद् पश्चात् निःस्वनं रवणं वा श्रूयते अनुभूयते स एव वैकृत पदेनोच्यते, न तु अन्यः कश्चित् ध्वनिः पुनः क्रियते। व्यक्तमेवानुभूयते श्लोकवाक्योच्चारणे केचित् क्षिप्रमेव पठन्ति केचित् तारस्वरेण केचित् गायं गायं वदन्तीति। अतः कालकृतद्रुतादिभेदकारी वैकृतो ध्वनिः। न्यायमते तु द्रुतविलम्बितत्वादिधर्मा शब्दस्यैव। ध्वनिरूपस्यैव श्रवणगोचरस्यानित्यस्य शब्दत्वाङ्गीकारात्। वस्तुतः कालकृतपरिच्छेदशून्यः स्फोटः द्वाभ्यामपि ध्वनिभ्यां न भिद्यते। तद्ध्वनिगतधर्माश्च तत्रोपचर्यन्ते। ननु किमर्थं स्फोटोऽङ्गीक्रियत इति चेद्, अत्रोच्यते - शब्दाद् अर्थप्रत्ययः सर्वसम्मतः। तत्रातिप्रसक्तिभिया शब्देऽर्थस्य सम्बन्धी वृत्तिरूपोऽवश्यमङ्गीकर्त्तव्यः सर्वैरेव तीर्थकरैः। तत्रः कः शक्त्याश्रयः। न तावद् वस्वादिशब्देषु वकारादयो वर्णाः, तेषां प्रत्युच्चारणमन्यत्वेन आनन्त्यात् शक्तिग्रहासम्भवात्। न च सकलवसुशब्दे आनुपूर्वी-साम्याच्छक्तिग्रहः। उच्चरितप्रध्वंसिनां वर्णानामानुपूर्व्यसम्भवात्। उच्चरितप्रध्वसित्वञ्चोच्चारणा-धिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वम्।

किञ्च इमे वर्णाः प्रत्येकमर्थमभिदधीरन् मिलिता वा। न तावत् प्रथमः। एकवर्णो-च्चारणानन्तरमर्थप्रत्ययादर्शनाद् वर्णान्तरोच्चारणवैयर्थ्याच्च। न द्वितीयः। उच्चरितप्रध्वंसिनां

तेषां मेलनासम्भवात्। न च स्वरूपतः साहित्याभावेऽपि संस्कारद्वारकं साहित्यं भविष्यति। अपूर्वद्वारा आग्नेयादीनां यागानामिवेति वाच्यम्। विकल्पासहत्वात्। तथा हि यथाग्नेयादीनां फलकरणत्वान्यथानुपपत्याऽवसेयमपूर्वम्, एवं वर्णानामपि अर्थप्रत्ययान्यथानुपपत्त्या सिद्धः संस्कारः। स च संस्कारः अर्थापत्तेः प्रागविदितः अत एवापूर्वः, अथवा वर्णोपलम्भजो वर्णो स्मृतिकरः। न तावत् प्रथमः। नहि शब्दः स्वरूपतोऽङ्गतोऽविदितोऽविदित सङ्गतिरर्थधीहेतुर्दृष्टः। उच्चरितस्यागृहीत- सङ्गतेर्वार्थप्रत्ययादर्शनात्। तस्माद् अपूर्वाभिधानोऽस्य संस्कारः अर्थप्रत्ययनात् प्रागवगन्तव्यः। न तस्य तदावगमोपायोऽस्ति। अर्थप्रत्ययात्तु तदवगमः तदवगमाच्चार्थप्रत्यय इत्यन्योन्याश्रयापत्तेः, न च संस्कारस्य प्रत्यक्षत्वमस्ति। आग्नेयादीनां तु अनारब्धफलानां वेदेन फलकरणत्वावगमात् अर्थापत्त्या शक्यमपूर्वावधारणम्। वर्णानां तु नार्थधीहेतुत्वे मानमस्ति। न द्वितीयो भावनाख्यः संस्कारः स्मृतिप्रसवसामर्थ्यवानेव दृष्टः, न चार्थप्रत्यायनसामर्थ्यमपि तस्य क्वचिद् दृष्टम्।

अत एव पूर्वपूर्ववर्णजनितसंस्कारसहितस्यान्त्यवर्णस्यापि न वाचकत्वम्, संस्काराणाम- प्रत्यक्षत्वात् तादृशान्त्यवर्णास्याप्यप्रतीतेः। अप्रतीतस्य प्रत्यायकत्वाभावात्। अपि च व्युत्क्रमेणो- च्चारितेभ्यो वर्णेभ्योऽपि स एवास्ति वर्णसंस्कारः स्मृति बीजम्। अतः तेभ्योऽपि अर्थप्रत्ययापत्तेः। अतो नास्ति कश्चित् कार्यशव्देवादं शक्त्याश्रयः। शक्त्याश्रयात्वान्यथानुपपत्त्या वर्णेभ्योऽतिरिक्तः स्फोटः पूर्वोक्तरूपः कल्प्यः। स एव शक्त्याश्रयः। स च मध्यमानादांशः चिद्रूपः। अत्रेदं बोध्यम् - वाचः भेदाः परा-पश्यन्ती-मध्यमा-वैखरीरूपाः सन्ति।

यथोक्तम्-

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्‌भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्।। (वा.प.ब्र.का.)

उक्तायाः त्रय्या वाचः परं पदं स्थानं व्याकरणमिति भावः। अत्र पश्यन्त्या इति पराया अप्युपलक्षणम्। उक्तञ्च-

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठगा स्मृता।।

तन्त्रशास्त्रमाश्रित्यास्यायमर्थः श्रीनागेशभट्टैर्महावैयाकरणैर्भाष्यमर्मज्ञैरप्युक्तः तथा हि- ''सृष्टिकाले कल्पादौ अपिरिपक्वप्राणिकर्मफलप्रदानाय परमेश्वरे सिसृक्षात्मिका मायावृत्तिर्जायते। ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते इदमेव शक्तितत्त्वम्। तस्य बिन्दोः अचिदंशो बीजम्। चिदचिन्मिश्रो नादः। चिदंशोबिन्दुरिति। अचिच्छब्देन च शब्दार्थोऽभयसंस्काररूपाऽविद्योच्यते।''

अद्वितीयस्य ब्रह्मणो रमणेच्छैवोत्पन्ना शक्तिः।

तदुक्तं काशीखण्डे-

यदेकलो न शक्नोषि रन्तुं स्वैरचरप्रभो।
तदिच्छा तव चोत्पन्ना सैव शक्तिरभूत्तव॥
त्वमेको द्वित्वमापन्नः शिवभक्तिप्रभेदतः।

तस्माद्बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं, ज्ञानप्रधानं सृष्ट्युपयोग्यावस्थाविशेषं चेतनमिश्रं नादमात्रमुत्पद्यते। एतदेव जगदुपादानं रव परादिशब्दैर्व्यवह्रियते। तदुक्तम्–

विन्दोस्तस्माद् भिद्यमानाद् रवोऽक्तात्मकोऽभवत्।
स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते॥ (प्रपञ्च सा.तं.पट.१-४३)

सा परा सर्वगतापि मूलाधारे प्राणिनां संस्कृतपवनचलनेनाभिव्यज्यते। संस्कारश्च ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव। तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठया निष्पन्दं परा वाग् इत्युच्यते। अनादिभिधननित्यादिना हरिणाप्युक्तम्। तदुक्तम् प्रपञ्चसारे–

सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः॥
परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः॥
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायः समाख्यातः सर्वागमविशारदैः॥
भिद्यामानात् पराद्बिन्दोरव्यक्तात्मा ततोऽभवत्।
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः॥

कोऽयं मूलाधार इति? उच्यते, देहमध्यभागः।

पाय्ववन्ताद् द्व्यङ्गुलादूर्ध्वं लिङ्गाच्च द्व्यङ्गुलादधः।
मध्यमेकाङ्गुलं यच्च देहमध्यं प्रचक्षते॥

षण्णवत्यङ्गुला देहायामः। तत्राङ्गुलार्धसहितसप्तचत्वारिंशदङ्गुलात्मकमधः उपरि च परित्यज्याङ्गुलपरिमितं मध्यं मूलाधारः। स एव चतुर्दलात्मकं मूलचक्रपङ्कजमुच्यते, तत्र महदादिभिर्वेष्टिता कुण्डलिनी तिष्ठति। मूलाधारचक्रादेव प्राणवायोरुत्थानं तत एव सर्वनाडीषु तत् प्रचारः।

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम्।
अस्ति कुण्डलिनी ब्रह्म शक्तिराधारपङ्कजे॥ (सङ्ग.रत्ना. १/२/१११)

तत्र मूलाधारे प्रयत्नयोगसंस्कृतः प्राणवायुरूर्ध्वं क्रामति। तेन नाभिपर्यन्तमागतेन संस्कृतवायुनाभिव्यक्तं शब्दतत्त्वं पश्यन्तीत्युच्यते। एवं परा पश्यन्तीत्येद्द्वयं सूक्ष्मतमसूक्ष्मतर-रूपमीश्वराधिदैवं योगिभिः निर्विकल्पकसविकल्पकसमाधिगम्यं भवति।

ततस्तेनैव वायुना हृदयपर्यन्तमागच्छता हृदयदेशेऽभिव्यक्तं तत्तदर्थविशेषतत्तच्छब्द-विशेषविषयया बुद्ध्या विषयीकृतं शब्दब्रह्म मध्यमा वाग् इत्युच्यते हिरण्गर्भदेवत्या परश्रोत्र-ग्रहणायोग्येन सूक्ष्मा। स्वयं कर्णापिधाने श्रूयमाणा। एतदवस्थात्रयं सूक्ष्मसूक्ष्मतरसूक्ष्मतमप्रणवरूपम्।

तेनैवास्यपर्यन्तमागच्छता वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेषु अभिव्यक्ता परश्रवणगोचरा विराडधिदेवत्या वैखरी वाग् इत्युच्यते। प्रणव एव व्यानोदानाभ्यां स वैखरीरूपं प्रतिपद्यते। एतदेव हरिणोक्तं - वैखर्येत्यादि। तत्र - वैखरी स्वपरप्रत्यक्षा, मध्यमा स्वकर्णापिधाने स्वगोचरा, पश्यन्ती तु व्यवहारातीता सविकल्पकसमाधिगम्या। परा तु निर्विकल्पकसमाधिगम्या।

तदुक्तम् महाभारते-

स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निर्वतते।।

ऋग्वेदेऽप्युक्तम्-

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति।। इति।

व्याख्यातञ्च भगवता पतञ्जलिना पस्पशायाम्। इत्येतत् सर्वं मञ्जूषायां विस्तरेण प्रतिपादितं श्रीमता नागेशभट्टेन अतस्तमेव विस्तरेण द्रष्टव्यम्।

न च वर्णातिरिक्तस्यालौकिकस्य तस्य स्फोटस्यानुभवो नास्तीति वाच्यम्। गौरित्येकं पदं गामानयेति वाक्यमिति नानावर्णातिरिक्तैकपदवाक्यावगतेः सर्वजनीनत्वात्। न चेयमवगतिर्भ्रमः, बाधकाभावात्। नाप्यौपाधिकी, उपाधेरनिरूपणात्। तथा हि उपाधिः खलु एकधीग्राह्यता वा स्याद् एकार्थधीहेतुता वा। प्रथमोऽसम्भवः। न खलु एकधीगोचराणां धवखदिरपलाशान्तमेकनिर्भासः समस्ति। तथात्वे धवखदिरापलाशा इति जातु न स्यात्। न द्वितीयोऽपि, अन्योन्याश्रयापत्तेः। एकार्थधीहेतुत्वेन साहित्यकल्पनं साहित्याच्चैकार्थधीहेतुत्वमिति। अत उक्ता एकपदवाक्य-प्रतीतिरभ्रान्ताऽसन्दिग्धानुपाधिश्च वर्णातिरिक्तवाचकं स्फोटमेवालम्बते।

तमेतं स्फोटं वर्णध्वनयः प्रत्येकं व्यञ्जयन्तोऽपि न झटिति विशदयन्ति। अपि तु रत्नतत्त्वपरीक्षणवत् द्वित्रिचतुष्पञ्चषट्दर्शनजनितसंस्कारपरिपाकसचिवलब्धजन्मनि चरमे चेतसि चकास्ति। अतो नानर्थक्यमुत्तरेषां ध्वनीनां नापि प्राचां विशदविशदतरादित्वबोधनात्।

उक्तञ्च वाक्यपदीये-

नादैराहितबीजायामन्त्येन ध्वनिना सह।

आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥ ब्रह्मकाण्डे।

तस्मान्नित्यः स्फोट एव वाचको न वर्णाः तेषामनित्यत्वात्। स्फोटो वैयाकरणनिकाये प्रतिपादितो विस्तरेण तत्र द्रष्टव्यम्। महाभाष्ये प्रथमाह्निके ''अथ गौरित्यत्र कः शब्द इत्युपक्रम्य द्रव्यादीनां शब्दत्वं निराकृत्य येनोच्चारितेत्यादिना, अथ च प्रतीतपदार्थक इत्यादिना च स्फोटध्वनिरूपयोः शब्दयोर्लक्षणं कृतम्। प्रदीये च व्याख्यातं कैयटेन'' - ''वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्, अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावात्। एकस्मृत्युपारूढानां वाचकत्वे सरः रसः इत्यादावर्थप्रतिपत्त्यविशेषप्रसङ्गात्। तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचक इति'' येनोच्चारितेन=प्रकाशितेनेत्यर्थः कृतः। वाक्यपदीयमञ्जूषाभूषणादिग्रन्थे विस्तरेण स्फोटो व्याख्यातः।

योगशास्त्रेऽपि स्फोट एवाभिमतः। तथा हि -

शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत् प्रविभागसंयमात् सर्वभूतरूतज्ञानम् (यो०सू० ३/१७) तत्र विभूतिपादे शब्दार्थप्रत्ययानामितरेतराध्यासात् साङ्कर्ये-जाते तत् प्रविभागे ध्यानधारणासमाधिरूपसंयमाद् योगिनां सर्वभूतानां पशुपक्षिसरीसृपादीनां रूतज्ञानं भाषितज्ञानं भवति। तत्र वाचकशब्दः स्फोट इति व्यासभाष्ये, तत्त्ववैशारद्यां श्रीवाचस्पतिमिश्रेण स्फुटीकृतः स्फोटः। तत्रत्योऽयं भावः - तत्र वाग् वर्णेष्वेवार्थवती, न वाचकः। श्रोत्रं ध्वनिपरिणाममात्रविषयम्, न तु वाचकविषयम्। पदं वाचकम्। नादानुपसंहारबुद्धिर्निग्राह्यम्। यथा प्रतीतिसिद्धान् नादान्-वर्णान् प्रत्येकं गृहीत्वा अनु=पश्चात् या संहरति एकत्वमापादयति गौरित्येकं पदमिति तया पदं गृह्यते। वर्णव्यतिरिक्तैकबुद्धिविषयः नादाभिव्यङ्ग्यो मनोग्राह्यः शब्द एव वाचकः स च स्फोट इति। एवं तत्र सम्यक् स्फोटस्य प्रतिपादनं मिश्रपादैः कृतम्। विस्तरभयान्नेह वितन्यते।

साहित्यशास्त्रेऽपि

स्फोट एवाभिमतः। यद्यपि साहित्यशास्त्रे विशेषतः वाचकवाच्यादेश्चर्चा नास्ति। तथापि शब्दार्थत्रैविध्यं काव्यप्रकाशादावुक्तम् वाचको लक्षको व्यञ्जकश्चेति त्रिधा शब्दः। अर्थोऽपि वाच्यो लक्ष्यो व्यङ्ग्य इति तात्पर्योऽप्यर्थ इति वर्णितम्। तत्र अभिधया गम्यो वाच्यम् तदाश्रयश्च वाचक इत्यादि तत्र वर्णितम्। काव्यप्रकाशे सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वेति कारिकाव्याख्यायाम् उपाधावेव सङ्केत इति सिद्धान्तप्रतिपादने उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छा सन्निवेशितश्च। तत्र वक्तृयदृच्छासन्निवेशितः शब्दरूपव्याख्यान उक्तम्-डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्तृयदृच्छया डित्थादिष्वर्थे उपाधित्वेन सन्निवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मकः शब्दः। व्याख्यातञ्चैतद् वाक्यं स्फोटपरत्वेन (काव्य० ३३ पृ० प्रदीपोद्योते) तत्रैव प्रदीपोद्यतयोः श्रीमहानैयायिकैः श्रीगोविन्दठक्कुरैः, महावैयाकरणैः श्रीनागेशभट्टैश्च। अनेन काव्यविदामपि स्फोटः सम्मतः।

मीमांसकाद्वैतशास्त्रमतम्–

मीमांसकाः शब्दस्य नित्यत्वं सङ्गिरन्ते। तथा हि मीमांसाशास्त्रे जैमिनीये प्रथमाध्याये वेदस्य स्वतः प्रामाण्याधिकरणे ''औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात् (१-१-५) इति सूत्रेण शब्दार्थसम्बन्धस्य स्वाभाविकत्वं नित्यत्वं स्वीकृतम्। न तु साङ्केतिकः सम्बन्धः स्वीकृतः। अन्यथा पुरुषसङ्केतसम्बन्धस्यानित्यस्यापेक्षणाद् अनपेक्षंत्वरूपं प्रामाण्यं धर्मे वेदस्य न स्यात्। तस्य धर्मस्य ज्ञानं=ज्ञानकरणमुपदेशः। स चानुपलब्धेः प्रत्यक्षादिप्रमाणैरगोचरेऽर्थे अर्थाव्यभिचारी दृश्यते, अतः इतरानेपक्षत्वात् अर्थाव्यभिचाराच्च विधिवाक्यरूपोपदेशः धर्मे प्रमाणमिति बादरायणस्याचार्यस्यानुमतम्। एतदुक्त्वा शब्दानित्यत्वं पूर्वपक्षत्वेनोपपाद्य- सतः परमदर्शनं विषयानागमात् (१-१-१३) इत्यादिसूत्रैरुत्पत्त्यभिव्यक्तिपक्षयोः शब्दस्य क्षणमात्रश्रावणोपलब्धिसमत्वेऽपि अभिव्यक्तिपक्षस्य समर्थनं कृतम्, उत्पत्तिपक्षस्य खण्डनं कृतम्। एवं नित्यस्तु स्यात् दर्शनस्य परार्थत्वाद् इत्यादिसूत्रैः व्यञ्जकस्यानित्यत्व-माश्रित्य शब्दस्य नित्यत्वं समर्थितम्। एवमर्थस्यापि जातिरूपस्य नित्यत्वमास्थाय शब्दार्थतत्सम्बन्धानां त्रयाणामपि नित्यत्वमङ्गीकृतम्। विस्तरभयान्नेह वितन्यते, तत एव जिज्ञासुभिर्द्रष्टव्यम्।

बादरायणस्यापि शब्दनित्यत्ववादोऽभिमतः। परन्तु अद्वैतवादे ब्रह्मातिरिक्तस्य सर्वस्यानित्यत्वाद् मिथ्यात्वाच्च शब्दादीनां न परमार्थनित्यत्वमपि तु व्यावहारिकं नित्यत्वं सत्यत्वञ्चेति भेदोऽस्ति। एवं शब्दस्य नित्यत्वेऽङ्गीकृतेऽपि न मीमांसकानामद्वैतिनाञ्च स्फोटोऽभिमतः। किन्तु वर्णानामेव नित्यत्वं वाचकत्वं तैरङ्गीकृतम्। उपपादितञ्चैतत् भगवत्पादैर्देवताधिकरणे ब्रह्मसूत्रे प्रथमाध्याये तृतीयपादे भाष्ये उपवर्षाचार्यादिसम्मतत्वेन वर्णनित्यत्वम्। तथा हि -

तत्र देवादीनां शास्त्रेऽधिकारोऽस्ति नास्ति वेति विचारे प्रक्रान्ते देवादीनामप्यधिकार इति तदुपर्यपि बादरायणः सम्भवात् (१-३-२६) सूत्रेण प्रतिपाद्य विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनाद् (१-३-२७) इति सूत्रेण देवादीनां विग्रहत्त्वे कर्मणि अधिकारे च विरोधमुपपाद्यानेकप्रतिपत्तिदर्शनादिति समाधाय पुनः ''शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् (१-३-२८) इति सूत्रेण शब्दविरोध उपक्षिप्य समाधीयते। तथा हि औत्पत्तिकस्तु शब्देनार्थस्य सम्बन्धमाश्रित्यानपेक्षत्वाद् वेदानां प्रामाण्यं स्थापितं देवादीनां विग्रहवत्त्वे तद् विरूध्यते। ऐश्वर्य योगात् तेषामनेकयागेषु युगपत् सन्निधावपि अस्मदादीनामिव तेषामपि विग्रहवत्त्वे जन्ममरणादिसम्भवात् तैः सह शब्दसम्बन्धस्यानित्यत्वात् सापेक्षत्वात् सङ्केतस्य वेदानामनपेक्षत्वरूपं प्रमाण्यं न स्यादिति। तत्र परिहार उक्तः ''नातः प्रभवात् प्रत्यक्षानुमानाभ्यामिति सूत्रांशेन जात्या शब्दस्यौत्पत्तिकः सम्बन्धः सिध्यतीति।''

वेदादेव देवादीनां सृष्टिरित्यत्र हेतुमाह प्रत्यक्षानुमानाभ्यामिति। प्रत्यक्षं श्रुतिः, अनुमानं स्मृतिः अनपेक्षत्वात् सापेक्षत्वाच्च प्रामाण्यं प्रति। श्रुति र्हि शब्दपूर्विकां सृष्टिं दर्शयति ''एत

इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इत्यादि। स मनसा वाचं मिथुनं समभवत् (वृ० १-२-४) स्मृतिरपि अनादिनिधना दिव्या वागुत्सृष्टा स्वयंभुवा-आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः।

नाम रूपं च भूतानां कर्मणां च प्रवर्तनं वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे (मनु०) एवं प्रजापतेः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः पश्चात्तदनुगतानर्थान् ससर्जेति। स भूरिति व्याहरत् स भूमिमसृजत (तै०ब्रा० २/२/४/२)

तत्र किमात्मकाच्छब्दाद् जगत्प्रभव इति जिज्ञासायां भगवत्पादैः स्फोटरूपादित्यक्त्वा स्फोटं व्युत्पाद्य पुनः वर्णात्मकं नित्यं शब्दं जगत्प्रभवहेतुत्वेन प्रतिपादयामासुः। भामत्याञ्च श्रीवाचस्पतिमिश्रैः शाङ्करमतं समर्थितम्।

तत्र हि वर्णा एव तु भगवानुपवर्ष इत्युपक्रम्य वर्णनित्यत्वपक्षः समर्थितः। वर्णव्यतिरिक्तः स्फोटः किमर्थोऽङ्गीक्रियते? वर्णानां क्षणिकत्वेन अशक्यसङ्गतिग्रहत्वाद् वा व्यस्तानां समस्तानां वा तेषां वाचकत्वासम्भवाद् वेति।

न तावत् प्रथमः - वर्णानामुत्पन्नप्रध्वंसित्वरूपक्षणिकत्वे मानाभावात्। सोऽयमकार इत्यादिप्रत्यभिज्ञानात् स्थैर्यस्य सिद्धत्वात्। न चेदं प्रत्यभिज्ञानं सादृश्याज्जायमानं सोऽयं केशः, सोऽयं नखः, सोऽयं दीपकलिकेत्यादिवद् भ्रम एवेति वाच्यम्। तस्य प्रमाणान्तरेण बाधाभावात्। न चेदं प्रत्यभिज्ञानं गत्वादिजातिनिबन्धनं न गाकारादिव्यक्तिनिबन्धनं तासां प्रतिपुरुषं भेदोपलम्भात् सोमशर्माऽयमधीते न विष्णुशर्मेति वाच्यम्। सोऽयमकार इत्यादिना व्यक्तिप्रत्यभिज्ञानात्। बहुषु गकारमुच्चारयत्सु योऽयं गकारेषु परस्परं भेदानुभवः स निपुणं निरीक्ष्यताम्। स किं व्यक्तिभेदावमर्शपुरः सरं जातिविषयः, उत औपाधिकभेदवदेक व्यक्तिविषयः। निरूपणानन्तरं ज्ञायते यद् औपाधिकृतभेदमन्तरेण स्वाभाविकव्यक्तिभेदो न भासते। स चोपधिर्ध्वनिः। नहि प्रत्युच्चारणमन्या वर्णव्यक्तयः प्रतीयन्ते। अत एव द्विर्गोशब्द उच्चारितः त्रिर्गोशब्द उच्चारित इति प्रतीतिः। व्यक्तिभेदे सति द्वौ गोशब्दौ उच्चारयति त्रीन् गोशब्दान् उच्चारयतीति प्रतीतिः स्यात्। यच्चोच्चारणभेदेन शोमशर्मादिपाठेषु वर्णभेदप्रतीतिः, सा तु व्यञ्जकोपाधिवशादेव, न वर्णभेदात्। अत उक्तप्रत्यभिज्ञानं वर्णविषयकं न जातिविषयकम्।

अपि च स्वरूपतो वर्णव्यक्तिभेदवादिनामपि प्रत्यभिज्ञानसिद्धये कत्वखत्वादिवर्णाकृतयः कल्पयितव्याः। तासां वर्णाकृतीनां भेदसिद्धये तेषु वर्णेषु ध्वनिगतोदात्तत्वादयो धर्मा औपाधिका कल्पयितव्याः इति भवति गौरवम्। तद्वरं जातिमकल्पयित्वा एकैक एव ककारखकारादिवर्णः कल्प्यताम्। तत्र तत्र चोपाधिभेदाद् उदात्तत्वादिरूपेण भेदाः कल्प्यन्तां लाघवात्। एवञ्च सोऽयं गकार इत्यादौ स्वरूपत एकत्वादेव प्रत्यभिज्ञानं परोपाधिकश्च भेद प्रत्यय इति न जातिविषयकमुक्त प्रत्यभिज्ञानं सिध्यति। तत् प्रत्यभिज्ञानादेव वर्णस्यैकत्वं नित्यत्वं च सिध्यति। व्यञ्जकोपाधिवशादेव वर्णो नष्ट उत्पन्न इत्यादिव्यवहारः। स्फुटभेदोपलम्भे सत्येव गोव्यक्तिषु गोत्वकल्पना दृश्यते। अत्र तु गकारादिव्यक्तिषु नास्ति स्फुटो भेदोपलम्भः। भेदप्रत्ययश्चौपाधिकः।

ननु कोऽयं व्यञ्जकः। उदात्तादयस्तु व्यञ्जका न भविष्यन्ति तेषां वर्णधर्मत्वाद् व्यञ्जक धर्मत्वाध्यासः। व्यञ्जकास्तु वर्णानां वायवः। तेषामाश्रयणत्वे तद्धर्माणामपि अश्रावणत्वप्रसङ्गात् इति चेन्न वायूनां।

श्रोत्राग्राह्यत्वेऽपि शब्दाभिव्यञ्जकध्वनीनां वायवीयानां श्रोत्रग्राह्यत्वे बाधकाभावात्। भवति हि भूम्युदकाकाशानां घ्राणरसनाश्रोत्राग्राह्यत्वेऽपि तद्गुणानां गन्धरसशब्दानां तैस्तैरिन्द्रियैर्ग्राह्यत्वं सर्ववादिसिद्धम्।

वर्णव्यञ्जको ध्वनिः कर्णगोचर एव। स क इति जिज्ञासायामुच्यते-यो दूराद् आकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति। प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेष्वासञ्जयति स ध्वनिः। एवञ्च यथा एकस्य मुखस्यैव मणिकृपाणदर्पणाद्युपधानवशाद् नानादेशपरिमाणभेदभ्रमः। एवमेकस्यापि वर्णस्य व्यञ्जकध्वनिनिबन्धनोऽयं विरूद्धनानोदात्तत्वादि- धर्मसंसर्गविभ्रमः, न तु स्वाभाविको नानाधर्मसंसर्ग इति।

किञ्च नित्येभ्यो वर्णेभ्योऽर्थसंप्रत्ययसम्भवाद् व्यर्था स्फोटकल्पना। न च व्यस्तसमस्तप्रकारद्वयासम्भवेन वाचकत्वासम्भवः। तथा हि, रामादिपदानां नित्यवर्णात्मकवात् तत्र किं प्रत्येकं वर्णा वाचका मिलिता वा। प्रथमे वर्णान्तरोच्चारणवैयर्थ्यम्। द्वितीये मेलनासम्भवः। नित्यानां विभूनां तवाभिमतानां वर्णानां साहित्यं न सम्भवति। व्यापकत्वादेव पौर्वापर्याभावात्। न च स्वरूपसन्तो नापि क्रमज्ञानविधुरास्ते अर्थप्रत्यायका भवन्ति अतिप्रसङ्गाद् इति वाच्यम्। व्यञ्जकध्वनिकृतपौर्वापर्यस्य सम्भवात् साहित्यस ।वात्।

